This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
श्रीमद्भागवत ~~श्रीमद्भागवदगीता~~ अवमस्कंध	–	धर्मशास्त्र	पूर्ण	–	4/14	560	संस्कृत	कागद				

M-2843

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ अथाष्टमे चतुर्विंशत्यध्यायैर्मनुवर्णनम् । तत्सुतैर्ऋषिदेवेन्द्रैर्मूर्तिभिश्च हरेः सह ॥ १ ॥ प्रतिमन्वंतरं चैव मन्वाद्याः षट् पृथक्पृथक्। प्रवर्तयंति सद्धर्मान् पालयंत्याचरंति च ॥ २ ॥ अतो मन्वंतरस्योक्तं सद्धर्म इति लक्षणम् । येनैव क्रियमाणेन नरो न निरयं व्रजेत् ॥ ३ ॥ तत्र तु प्रथमे स्वायंभुवः स्वारोचिषस्तथा । उत्तमस्तामसश्चेति चतुर्मनुनिरूपणम् ॥ ४ ॥ स्वायंभुवैंतरेऽनंतदुरंतगुणवर्णनात् । मुदितः परिपप्रच्छ सर्वमन्वंतरस्थितिम् ॥ ५ ॥ राजोवाच ॥ हे गुरो ! स्वायंभुवस्य मनोर्वंशो विस्तरात् मया श्रुतः । यत्र मनुकन्यासु मरीच्यादीनां पुत्रादिसर्गः ॥ अन्यान्

ॐनमो भगवते वासुदेवाय ॥ राजोवाच ॥स्वायंभुवस्येह गुरो वंशोऽयं विस्तराच्छ्रुतः॥यत्र विश्वसृजां सर्गो मनून्न्यान्वदस्व नः ॥ १ ॥ यत्रयत्र हरेर्जन्म कर्माणि च महीयसः ॥ गृणंति कवयो ब्रह्मंस्तानि नो वद शृण्वताम् ॥ २ ॥ यद्यस्मिन्नन्तरे ब्रह्मन् भगवान्विश्वभावनः ॥ कृतवान्कुरुते कर्ता ह्यतीतेऽनागतेऽद्य वा ॥ ३ ॥ ऋषिरुवाच ॥ मनवोऽस्मिन्व्यतीताः षट् कल्पे स्वायंभुवादयः ॥ आद्यस्ते कथितो यत्र देवादीनां च संभवः ॥ ४ ॥ आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः ॥ धर्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः ॥ ५ ॥ कृतं पुरा भगवतः कपिलस्यानुवर्णितम् ॥ आख्यास्ये भगवान्यज्ञो यच्चकार कुरूद्वह ॥ ६ ॥ विरक्तः कामभोगेषु शतरूपापतिः प्रभुः ॥ विसृज्य राज्यं तपसे सभार्यो वनमाविशत् ॥ ७ ॥ सुनंदायां वर्षशतं पदैकेन भुवं स्पृशन् ॥ तप्यमानस्तपो घोरमिदमन्वाह भारत ॥ ८ ॥

मनून् वद यत्रयत्र हरेर्जन्मानि कर्माणि च कवयो गृणंति तानि वद ॥ २ ॥ तथा भगवान् गतमन्वंतरे यत् कृतवान् भविष्ये यत् करिष्यति वर्तमाने यत् कुरुते तदपि ब्रूहि ॥ ३ ॥ श्रीशुक उवाच ॥ अस्मिन् कल्पे स्वयंभुवादयो मनवः षट् गताः । तत्राद्यो मनुस्ते कथितः ॥ ४ ॥ स्वायंभुवस्य कन्ययोराकूतिदेवहूत्योर्धर्मज्ञानोपदेशार्थं हरिः पुत्रतां गतः ॥ ५ ॥ तत्र कपिलकृतं कथितम् । यज्ञो यच्चकार तदाख्यास्ये ॥ ६ ॥ अथ स्वायंभुवो मनुर्विरक्तः सन् राज्यं हित्वा सभार्यो वनं प्रविश्य ॥ ७ ॥ सुनंदायां नद्यां वर्षशतं घोरं तपस्तप्यमानः इदमाह ॥ ८ ॥

१ धर्मकपिलमूर्तिभ्याम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुरुवाच । येन विश्वं चेतनीभवति विश्वं तु यं न चेतनीकरोति जनं सुप्ते यो जागर्ति तं जनो न वेद स इमं तु वेद ॥ ९ ॥ लोकेशं सर्वमीश्वरेण सत्ताचैतन्याभ्यां संव्याप्यमतस्तेनैव दत्तं भुंक्ष्व । स्वार्थं कस्यचित् धनं मा कांक्षीः ॥ १० ॥ यं पश्यंतं जनो न पश्यति यस्य पश्यतो ज्ञानं न नश्यति तं देवं भजध्वम् ॥ ११ ॥ यस्याऽऽद्यंतादीनि न संति विश्वस्य तु तानि यस्माद् भवंति ॥ १२ ॥ स विश्वकायो मायया विश्वस्य

मनुरुवाच ॥ येन चेतयते विश्वं विश्वं चेतयते न यम् ॥ यो जागर्ति शयानेऽस्मिन्नायं तं वेद वेद सः ॥ ९ ॥ आत्मा वास्यमिदं विश्वं यत् किंचिज्जगत्यां जगत् ॥ तेन त्यक्तेन भुंजीथा मा गृधः कस्य स्विद्धनम् ॥ १० ॥ यं न पश्यति पश्यंतं चक्षुर्यस्य न रिष्यति ॥ तं भूतनिलयं देवं सुपर्णमुपधावत ॥ ११ ॥ न यस्याद्यंतौ मध्यं च स्वः परो नांतरं बहिः ॥ विश्वस्यामूनि यद्यस्माद्विश्वं च तदृतं महत् ॥ १२ ॥ स विश्वकायः पुरुहूत ईशः सत्यः स्वयंज्योतिरजः पुराणः ॥ धत्तेऽस्य जन्माद्यजयात्मशक्त्या तां विद्ययोदस्य निरीह आस्ते ॥ १३ ॥ अथाग्रे ऋषयः कर्माणीहंतेऽकर्म हेतवे ॥ ईहमानो हि पुरुषः प्रायोऽनीहां प्रपद्यते ॥ १४ ॥ ईहते भगवानीशो न हि तत्र विषज्जते ॥ आत्मलाभेन पूर्णार्थो नावसीदंति येऽनु तम् ॥ १५ ॥ तमीहमानं निरहंकृतं बुधं निराशिषं पूर्णमनन्यचोदितम् ॥ नृन् शिक्षयंत निजवर्त्मसंस्थितं प्रभुं प्रपद्येऽखिलधर्मभावनम् ॥ १६ ॥ श्रीशुक उवाच ॥ इति मंत्रोपनिषदं व्याहरंतं समाहितम् ॥ दृष्ट्वाऽसुरा यातुधाना जग्धुमभ्यद्रवन् क्षुधा ॥ १७ ॥

जन्मादीनि धत्ते । तदपीच्छारहितः आस्ते ॥ १३ ॥ मुनयः आदौ मोक्षार्थं कर्माणि कुर्वंति ॥ १४ ॥ भगवानात्मलाभेन पूर्णार्थः । अतः कर्मसु न विषज्जते ॥ १५ ॥ तं भगवंतं कृष्णाद्यवतारैर्वेदोक्तं कर्म कुर्वंतं सर्वधर्मप्रवर्तकं प्रभुं शरणं प्रपद्ये ॥ १६ ॥ श्रीशुक उवाच ॥ एवं समाधौ मंत्रोपनिषदमुच्चारयंतं मनुं दृष्ट्वाऽसुराः यातुधानास्तं भक्षितुमभ्यद्रवन् ॥ १७ ॥

१ भूतजातम् । २ सत्यम् । ३ परिपूर्णं ब्रह्म । ४ विश्वं कायो यस्य सः । ५ बहुनामा । ६ तमनुवर्तमानाः । ७ निरहंकृतादीनि रामाद्यवतारस्य जीववैलक्षण्यद्योतकानि । ८ निजावतारानुरूपमार्गसंस्थितम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदाऽऽकूतिपुत्रो यज्ञः स्वपुत्रैर्यामदेवैर्वेष्टितः सन् तान् हत्वा स्वर्गं पालयामास । अथ मन्वंतराण्याह । तत्राद्यः स्वायंभुवो मनुः १ प्रियव्रतोत्तानपादौ पुत्रौ २ यामादयो देवाः ३ मरीचिप्रमुखाः ऋषयः ४ यज्ञोऽवतारः ५ स एवेंद्रः ६ ॥१८॥ततो द्वितीयोऽग्नेःपुत्रः स्वारोचिषो मनुः । द्युमत्सुषेणरोचिष्मदादयस्तत्सुताः ॥ १९ ॥ तत्र रोचननामेंद्रः तुषितादयो देवाः ऊर्जस्तंभादयः सप्त ऋषयः ॥ २० ॥ वेदशिरसः ऋषेस्तुषितायां विभुरित्यवतारो जातः॥२१॥तस्मादष्टाशीतिसहस्राणि ऋषयो ब्रह्मचर्यव्रतमशिक्षन्त ॥ २२ ॥ ततस्तृतीयः प्रियव्रतसुत उत्तमो नाम मनुः।

तांस्तथावसितान् वीक्ष्य यज्ञः सर्वगतो हरिः ॥ यामैः परिवृतो देवैर्हत्वाऽऽशासत्त्रिविष्टपम् ॥ १८ ॥स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत् ॥ द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः ॥ १९ ॥ तत्रेंद्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ॥ ऊर्जस्तंभादयः सप्त ऋषयो ब्रह्मवादिनः ॥ २० ॥ ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् ॥ तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः॥२१॥ अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः ॥ अन्वशिक्षन्व्रतं तस्य कौमारब्रह्मचारिणः॥२२॥तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः॥ पवनस्सृंजयो यज्ञहोत्राद्यास्तत्सुता नृप ॥२३॥वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः॥सत्या वेदश्रुता भद्रा देवा इंद्रस्तु सत्यजित्॥२४॥धर्मस्य सूनृतायां तु भगवान्पुरुषोत्तमः ॥ सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह॥ २५ ॥सोऽनृतव्रतदुश्शीलानसतो यक्षराक्षसान् ॥ भूतद्रुहो भूतगणांस्त्वधीत सत्यजित्सखः॥२६॥चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः ॥ पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः ॥ २७ ॥सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ॥ ज्योतिर्धामादयः सप्त ऋषयस्तामसेंतरे ॥ २८ ॥

पवनसृंजयाद्यास्तत्सुताः॥२३॥वसिष्ठात्मजाः प्रमदादयः सप्त ऋषयः । सत्यादयो देवाः । सत्यजिदिंद्रः ॥ २४ ॥ धर्मात् सूनृतायां सत्यसेनो नाम हरेरवतारः ॥ २५ ॥ स इन्द्रसखः यक्षराक्षसान् जघान ॥ २६ ॥ ततश्चतुर्थः उत्तमभ्राता तामसो मनुः पृथुः १ ख्यातिः २ नरः ३ केतुः४ इत्याद्याः दश तत्सुताः ॥ २७ ॥ सत्यकाः हरयः वीराः देवाः । त्रिशिखनामेंद्रः । ज्योतिर्धामाद्याः सप्त ऋषयः ॥ २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्येपि विधृतेस्तनयाः वैधृतयो देवाः यैः कालेन नष्टाः वेदाः स्वतेजसा विधृताः ॥ २९ ॥ तत्र हरिमेधसो विप्रस्य हरिण्यां स्त्रियां हरिर्जातः येन ग्राहाद् गजेंद्रो मोचितः ॥ ३० ॥ राजोवाच ॥ हे शुक ! हरिर्यथा गजेंद्रं मोचयामास तद्वयं श्रोतुमिच्छामः॥३१॥ तत्कथासु महत् पुण्य यत्रोत्तमश्लोको हरिर्गीयते ॥ ३२ ॥ सूत उवाच ॥ राज्ञैवं कथासु प्रेरितः शुको मुनीनांसदसि परीक्षितं जगाद॥ ३३ ॥इति श्रीभाग० अष्टम० चू०प्रथमोऽध्यायः॥१॥तुर्ये मन्वंतरे प्रोक्तं गजेंद्रस्य विमोक्षणम् । द्वितीयादित्रिभिस्तत्तु विस्तरेणोपवर्ण्यते ॥ १ ॥ द्वितीये तु गजेंद्रस्य गजीभिः

देवा वैधृतयो नाम विधृतेस्तनया नृप ॥ नष्टाः कालेन यैर्वेदा विधृताःस्वेन तेजसा॥२९॥तत्रापि जज्ञे भगवान् हरि
ण्यां हरिमेधसः ॥ हरिरित्याहृतो येन गजेंद्रो मोचितो ग्रहात् ॥३०॥राजोवाच ॥बादरायण एतत्ते श्रोतुमिच्छामहे
वयम् ॥ हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत्॥३१॥तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं शुभम् ॥ यत्रयत्रोत्तमश्लो
को भगवान् गीयते हरिः॥३२॥सूत उवाच॥परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः ॥ उवाच
विप्राः प्रतिनंद्य पार्थिवं मुदा मुनीनांसदसि स्म शृण्वताम्॥३३॥इतिश्रीभा०महा०अष्ट०मन्वंतरानुचरितादिप्रश्नो नाम
प्रथमोऽध्यायः॥१॥ श्रीशुक उवाच ॥ आसीद्गिरिवरो राजंस्त्रिकूट इति विश्रुतः ॥ क्षीरोदेनावृतः श्रीमान्योजनायतमु
च्छ्रितः॥१॥तावता विस्तृतः पर्यक् त्रिभिः शृंगैःपयोनिधिम्॥दिशः खंरोचयन्नास्ते रौप्यायसहिरण्मयैः॥२॥अन्यैश्च
ककुभः सर्वा रत्नधातुविचित्रितैः॥नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झरांभसाम्॥३॥सचावनिज्यमानांघ्रिः समंतात् पयऊ
र्मिभिः ॥ करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ॥ ४ ॥

क्रीडतो जलो दैवाद्ग्राहगृहीतस्य हरिस्मृतिरुदीर्यते ॥ २ ॥ श्रीशुक उवाच ॥ हे राजन् । कश्चित् त्रिकूटनामा गिरिः क्षीरोदेनावृतोऽयुत
योजनोच्छ्रितः तावता विस्तृतोस्ति ॥ १ ॥स रौप्यलोहहिरण्मयैः. शृंगैर्दिशः खं प्रकाशयन्नास्ते ॥ २ ॥ अन्यैः रत्नधातुमयैः शृंगैर्दिशः
शोभयन्नास्ते ॥ ३ ॥ हरिन्मरकताश्मभिः श्यामां भूमिं करोति ॥ ४ ॥

१ परितः । २ अवनिज्यमानाः क्षाल्यमानाः अंघ्रयः प्रान्तभागाः यस्य सः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रीडद्भिः सिद्धचारणगंधर्वादिभिश्छादितशिखरः ॥ ५ ॥ यत्र किन्नरादीनां गीतनादेन सिंहाः परशंकया गर्जंति ॥६ ॥ अरण्यपशूनां यूथयुक्ता भिर्द्रोणीभिः शोभायमानः आस्ते यत्रोद्यानेषु मधुरस्वनाः विहंगमाः संति ॥७॥यः स्वच्छोदकैः सरित्सरोभिर्युतो मणिमयवालुकैः पुलिनैर्युतः ॥८॥ एवंभूताचलस्य द्रोण्यां वरुणस्य ऋतुमन्नामोद्यानम् । तस्मिन् सुरस्त्रीणां क्रीडास्थानम् ॥ ९ ॥ किंच मंदारपारिजाताऽशोकचंपकचूत

सिद्धचारणगंधर्वविद्याधरमहोरगैः ॥ किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंदरः ॥५॥ यत्र संगीतसन्नादैर्नदद्धहममर्षया ॥ अभिगर्जति हरयः श्लाघिनः परशंकया ॥६॥ नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः ॥ चित्रद्रुमसुरोद्यानकलकंठविहंगमः ॥ ७॥ सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः ॥ देवस्त्रीमज्जनामोदसौरभांब्वनिलैर्युतः ॥८॥ तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः ॥ उद्यानमृतुमन्नाम आक्रीडं सुरयोषिताम् ॥ सर्वतोलंकृतं दिव्यैर्नित्यं पुष्पफलद्रुमः ॥ ९॥ मंदारैः पारिजातैश्च पाटलाशोकचंपकैः ॥ चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि ॥ १० ॥ क्रमुकैर्नारिकेलैश्च खर्जूरैर्बीजपूरकैः ॥ मधूकैः सालतालैश्च तमालै रसनार्जुनैः ॥ ११ ॥ अरिष्टोदुम्बरप्लक्षैर्वटैः किंशुकचंदनैः ॥ पिचुमंदैः कोविदारैः सरलैः सुरदारुभिः ॥१२॥ द्राक्षेक्षुरंभाजंबूभिर्बदर्यक्षाभयामलैः ॥ बिल्वैः कपित्थैर्जंबीरैर्वृतो भल्लातकादिभिः ॥१३॥ तस्मिन् सरस्सुविपुलं लसत्कांचनपंकजम् ॥ कुमुदोत्पलकह्लारशतपत्रश्रियोर्जितम् ॥ मत्तषट्पदनिर्घुष्टं शकुंतैश्च कलस्वनैः ॥ १४ ॥ हंसकारंडवाकीर्णं चक्राह्वैः सारसैरपि ॥जलकुक्कुटकोयष्टिदात्यूहकुलकूजितम् ॥ १६ ॥ मत्स्यकच्छपसंचारचलत्पद्मरजःपयः ॥ कदंबवेतसनलनीपवंजुलकैर्वृतम् ॥ १६ ॥

पनसाम्रातकनारिकेलखर्जूरबीजपूरकतालतमालासनार्जुनोदुम्बरप्लक्षवटकिंशुकचंदनपिचुमंदसुरदारुद्राक्षेक्षुरंभाजंबूबदर्यामलकबिल्वकपित्थजंबीरभल्लातकादिभिर्वृक्षैर्वेष्टितस्त्रिकूटः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ तत्र सरोवरं कथंभूतम् । लसत्कांचनपंकजं कुमुदोत्पलादीनां श्रिया शोभितम् ॥ १४ ॥ हंसकारंडवादिभिर्व्याप्तं जलकुक्कुटादीनां कुलैः कूजितम् ॥ १५ ॥ मत्स्यकच्छपादीनां संचारेण व्याप्तोदकम् । कदंबवेतसनल

१ असहनेन । २ श्लाघ्याः । ३ पद्मरजसा युक्तं पयो यस्मिन् तत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुन्दकुरवकाशोकशिरीषकुटजेंगुदकुब्जकस्वर्णयूथीनागपुन्नागजातिमल्लिकादिभिरन्यैश्च तीरजैर्वृक्षैः शोभितम् ॥१६॥ १७॥१८ ॥ तत्रैकदा गिरिका ननाश्रयो गजेंद्रः करेणुभिः कंटककीचकवेणुवेत्रादिगुल्मं भजन् सन् बभ्राम॥१९॥ यद्गंधमात्रात् सिंहगजेंद्रव्याघ्रादयो व्यालमहोरगाश्च भयात् प लायंते॥२०॥क्षुद्राः वृकवराहहरिणादयस्तद्दृष्टिपथं हित्वा यत्कृपयाऽभीताश्चरंति॥२१॥एवं भ्रमन् घर्मतप्तो गजो गजैर्गजीभिः कलभैश्चाऽनुद्रुतः

कुंदैः कुरबकाशोकैः शिरीषैः कुटजेंगुदैः ॥ कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः ॥१७॥ मल्लिकाशतपत्रैश्च माधवीजालकादिभिः ॥ शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलं द्रुमैः ॥ १८॥ तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन् ॥ सकंटकान्कीचकवेणुवेत्रवद्विशालगुल्मं प्ररुजन्वनस्पतीन् ॥ १९ ॥ यद्गंधमात्राद्धरयो गजेंद्रा व्याघ्रादयो व्यालमृगाश्च खड्गाः ॥ महोरगाश्चापि भयाद्रवंति सगौरकृष्णाः शरभाश्चमर्यः ॥ २० ॥ वृका वराहा महिषर्क्षशल्या गोपुच्छसालावृकमर्कटाश्च ॥ अन्यत्र क्षुद्रा हरिणाः शशादयश्चरंत्यभीता यदनुग्रहेण ॥ २१ ॥ स घर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः ॥ गिरिं गरिम्णा परितः प्रकंपयन्निषेव्यमाणोऽलिकुलैर्मदाशनैः ॥२२॥ सरोऽनिलं पंकजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः ॥ वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्याशमथागमद्द्रुतम् ॥ २३ ॥ विगाह्य तस्मिन्नमृतांबु निर्मलं हेमारविंदोत्पलरेणुवासितम् ॥ पपौ निकामं निजपुष्करोद्धतमात्मानमद्भिः स्नपयन्गतक्लमः ॥ २४ ॥ स पुष्करेणोद्धतशीकरांबुभिनपाययन्संस्नपयन्यथा गृही ॥ घृणी करेणूः कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया ॥ २५ ॥

स्वगरिम्णा गिरिं प्रकंपयन् ॥२२॥ दूरादेव पंकजरेणुमिश्रं सरोऽनिलं जिघ्रन् तृषार्दितेन स्वयूथेन वृतः सन् द्रुतं सरोवरं प्राप॥२३॥ तत्र प्रविश्य गतक्लमः सन् निर्मलं सुवासितं जलं यथेच्छं पपौ ॥ २४ ॥ करेणूः कलभांश्च स्नपयन् पाययन् प्राप्तं कष्टं नाचष्ट ॥ २५ ॥

१ नित्यमृतवः फलपुष्पादिहेतवो येषां तैः । २ चेति शेषः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र कश्चिद् दैवप्रेरितो बलीयान् ग्राहो रुषा तं चरणेऽग्रहीत् । एवं दुःखं प्राप्तो गजो यथाबलं विचक्रमे॥२६॥ तथाविध तमन्ये गजाः मोचयितुं नाशकन् । करेणवः आतुरं यूथपतिं दृष्ट्वा विचुक्रुशुः ॥२७॥ एवं गजेंद्रनक्रयोर्मिथो विकर्षतोर्वर्ष सहस्रं जगाम॥२८॥ततो दीर्घकालेन गजेंद्रबलस्य व्ययो जातः । नक्रस्य बलाधिक्यं जातम् ॥२९॥ एवं गजेंद्रो यदा संकटं प्राप तदा चिरं ध्यात्वेमां बुद्धिं प्रत्यपद्यत॥३०॥ अहो इमे गजाः

तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाऽग्रहीत्॥यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे ॥ २६ ॥तथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा ॥विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् ॥ २७ ॥ नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतो बहिर्मिथः ॥ समाः सहस्रं व्यगमन्महीपते स प्राणयोश्चित्रममंसतामराः ॥२८॥ ततो गजेंद्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः ॥ विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोभूत्सकलं जलौकसः॥ २९॥इत्थं गजेंद्रः स यदाप संकटं प्राणस्य देही विवशो यदृच्छया॥ अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत ॥ ३० ॥ न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवंति मोचितुम् ॥ ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणम् ॥ ३१॥ नः कश्चनेशो बलिनोंतकोरगात्प्रचंडवेगादभिधावतो भृशम् ॥ भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि॥३२॥
इति श्रीं भाग० महापु० अष्टमस्कंधे मन्वंतरानुवर्णने गजेन्द्रोपाख्यानं नाम द्वितीयोऽध्यायः ॥ २॥

आतुरं मां मोचितुं न समर्थाः करिण्यः कुतः अहं ग्राहरूपेण विधातुः पाशेन वेष्टितोपि तमीश्वरं शरणं यामि ॥३१॥यः ईशः प्रचंडवेगेन धावतो मृत्युसर्पाद्भीतं जनं पाति तं शरणं व्रजेम ॥ ३२ ॥ इति श्रीभागवते अष्टमस्कंधे चूर्णिकायां गजेंद्रोपाख्यानं नाम द्वितीयोऽध्यायः ॥ २ ॥

१ मनः उत्साहः बल शारीरमोजः एंद्रियम् । २ विपरीतमाधिक्यम् । ३ बलादि ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृतीये तु गजेंद्रेण स्तुतो हरिरुपेत्य यम् । समुद्धार तं ग्राहाद् ग्राहं देवलशापतः॥१॥श्रीशुक उवाच ॥एवं बुद्धया विचार्य गजेंद्रो मनः स्थिरं कृत्वा पूर्वजन्मनि शिक्षितं श्रेष्ठं स्तोत्रं जजाप ॥१॥ गजेंद्र उवाच ॥ यतश्चिद्रूपाद् देहादिकं सचेतनं भवति तस्मै पुरुषाय केवलं नमनं ध्यायेम कायप्रणतेरशक्यत्वात् ॥२॥ यः कार्यकारणात् परः तं स्वयंभुवं शरणं व्रजामि ॥ ३॥स्वात्मनि विश्वं क्वचिच्छीनं क्वचित् प्रकाशितं तदुभयं कार्य

श्रीशुक उवाच ॥ एवं व्यवसितो बुद्धया समाधाय मनो हृदि ॥ जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम् ॥१॥ गजेंद्र उवाच ॥ नमो भगवते तस्मै यत एतच्चिदात्मकम् ॥ पुरुषायादिबीजाय परेशायाभिधीमहि ॥ २ ॥यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ॥ योऽस्मात्परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम् ॥ ३ ॥ यः स्वात्मनीदं निजमायया र्पितं क्वचिद्विभातं क्व च तत्तिरोहितम् ॥ अविद्धदृक् साक्ष्युभयं तदीक्षते स आत्ममूलोऽवतु मां परात्परः ॥४॥ का लेन पंचत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु ॥ तमस्तदासीद्गहनं गभीरं यस्यास्य पारेऽभिविराजते विभुः ॥५॥न यस्य देवा ऋषयः पदं विदुर्जंतुः पुनः को ऽर्हति गंतुमीरितुम्॥ यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स माऽवतु ॥ ६ ॥ दिदृक्षवो यस्य पदं सुमंगलं विमुक्तसंगा मुनयः सुसाधवः ॥ चरंत्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे गतिः॥७॥न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा ॥ तथापि लोकाप्ययसंभवाय स्वमायया तान्यनुकालमृच्छति ॥ ८ ॥

कारणे ईक्षते स मां पातु ॥ ४ ॥ कालेन सर्वेषु नाशं प्राप्तेषु सत्सु तमः आसीत् तस्मिन् यो विराजते ॥ ५ ॥ अहो देवाः ऋषयो यस्य स्वरूपं न विदुः तं कोपि जंतुर्ज्ञातुं वक्तुं वाऽर्हति किं स मां पातु ॥६॥ यस्य पदे द्रष्टुमिच्छवो मुनयो वने ब्रह्मचर्यादिव्रतं चरंति स मे गतिरस्तु ॥७॥ आपि च यस्य जन्मादीनि न संति तथापि लोकानामुत्पत्तिनाशार्थं जन्मादीनि यो धत्ते ॥ ८ ॥

१ अलुप्तदृक् । २ स्वयंप्रकाशः । ३ दुरवगाहम् । ४ अनंतम् । ५ दुर्गमचरितः । ६ अच्छिद्रम् । ७ भूतेष्वात्मदृष्टयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मै परेशाय ब्रह्मणे आश्चर्यकर्मणे नमः ॥ ९ ॥ परमात्मने सर्वसाक्षिणे कैवल्यनाथाय मोक्षानंदानुभूतये नमोऽस्तु ॥१० ॥ ११ ॥ शांताय स
त्त्वादिधर्मानुकारिणे ॥ १२ ॥ क्षेत्रज्ञाय ॥ १३ ॥ सर्वेंद्रियगुणद्रष्ट्रे सदाभासाय ॥ १४ ॥ सर्वकारणरूपाय ते नमोनमः ॥ १५ ॥ विधिनि

तस्मै नमः परेशाय ब्रह्मणेऽनंतशक्तये ॥ अरूपायोरुरूपाय नम आश्चर्यकर्मणे ॥ ९ ॥ नम आत्मप्रदीपाय साक्षिण
परमात्मने ॥ नमो गिरां विदूराय मनसश्चेतसामपि ॥ १० ॥ सत्त्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता ॥ नमः
कैवल्यनाथाय निर्वाणसुखसंविदे ॥ ११ ॥ नमः शांताय घोराय मूढाय गुणधर्मिणे ॥ निर्विशेषाय साम्याय नमो
ज्ञानघनाय च ॥ १२ ॥ क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे ॥ पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥१३॥ सर्वे
न्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे ॥ असतां छाययोक्ताय सदाभासाय ते नमः॥१४॥नमोनमस्तेऽखिलकारणाय निष्कार
णायाद्भुतकारणाय ॥ सर्वागमाम्नायमहार्णवाय नमोऽपवर्गाय परायणाय ॥ १५ ॥ गुणारणिच्छन्नचिदूष्मपाय तत्क्षो
भविस्फूर्जितमानसाय ॥ नैष्कर्म्यभावेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि ॥१६ ॥ मादृक् प्रपन्नपशुपाशवि
मोक्षणाय मुक्ताय भूरिकरुणाय नमोऽलयाय ॥ स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते
॥ १७ ॥ आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुष्प्रापणाय गुणसंगविवर्जिताय॥ मुक्तात्मभिः स्वहृदये परिभाविताय
ज्ञानात्मने भगवते नम ईश्वराय ॥ १८ ॥ यं धर्मकामार्थविमुक्तिकामा भजंत इष्टां गतिमाप्नुवंति ॥ किं त्वाशिषो
रात्यपि देहमव्ययं करोतु मेऽदभ्रदयो विमोक्षणम् ॥ १९ ॥

षेधरहिताय स्वयंप्रकाशाय ॥ १६ ॥ मादृक्प्रपन्नपशुपाशविमोक्षणाय भूरिकरुणाय नमोऽस्तु ॥ १७ ॥ देहपुत्राप्तगृहवित्तजनेषु सक्तैः प्राप्तुमश
क्याय गुणसंगविवर्जिताय नमोऽस्तु ॥ १८ ॥ यं धर्मार्थकाममोक्षकामाः भजंतः इष्टां गतिं प्राप्नुवंत्येव । य आशिषो ददाति स

१ मोक्षानंदानुभूतये । २ सत्त्वादिगुणानुकारिणे । ३ सर्वे प्रत्ययाः इन्द्रियवृत्तयो ज्ञापकाः यस्य तस्मै । ४ असता अहंकारादिप्रपंचेन छाययाऽसद्रूपया जलस्थप्रतिबिंबेन बिंबमिव उक्ताय दर्शिताय ।
५ सद्रूपो विषयेष्वाभासो यस्य तस्मै । ६ गुणा एवारणिस्तेन च्छन्नो ज्ञानाग्निर्येन तस्मै । ७ गुणक्षोभेण कार्ये विस्फूर्जितं बहिर्वृत्तकमानसं यस्य तस्मै । ८ विवर्जिताः आगमाः यैस्तेषु स्वयं प्रकाशते तस्मै ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मे केवलं मोक्षं करोतु । नाधिकं प्रार्थये ॥ १९ ॥ अहो यस्यैकांतभक्ताः किंच न वांछंति ॥२०॥तं परेशं परिपूर्णं स्तौमि॥२१॥ब्रह्मादयो देवाः वेदाः लोकाश्च नामरूपभेदेन यस्यांशेन कृताः ॥ २२ ॥ यथाऽग्नेरर्चिषः उद्भवंति लीयंते तथा मनोबुद्ध्यादिगुणसंप्रवाहो यतो भवति लीयते ॥ २३ ॥ अत एव यः देवाऽसुरमर्त्यतिर्यक् स्त्री षंडः पुमांश्च न भवति स परमात्मा मद्विमोक्षाय प्रकटो भवतु॥२४॥ अहं ग्राहात् शरीरमोक्षणेन

एकांतिनो यस्य न कंचनार्थं वांछंति ये वै भगवत्प्रपन्नाः ॥ अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्रमग्नाः ॥ ॥ २० ॥ तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम् ॥ अतींद्रियं सूक्ष्ममिवातिदूरमनंतमाद्यं परिपूर्णमीड ॥२१॥ यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः ॥ नामरूपविभेदेन फल्ग्व्या च कलया कृताः ॥२२॥ यथाऽर्चिषोऽग्नेः सवितुर्गभस्तयो निर्यांति संयांत्यसकृत्स्वरोचिषः ॥ तथा यतोऽयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गः ॥२३॥ स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षंडो न पुमान्न जंतुः ॥ नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयता दशेषः ॥२४॥जिजीविषे नाहमिहाऽमुया किमंतर्बहिश्चावृतयेभयोन्या ॥इच्छामि कालेन न यस्य विप्लवस्तस्यात्म लोकावरणस्य मोक्षम् ॥२५॥ सोहं विश्वसृजां विश्वमविश्वं विश्ववेदसम् ॥ विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ॥ २६ ॥ योगरंधितकर्माणो हृदि योगविभावित ॥ योगिनो यं प्रपश्यंति योगेशं तं नतोऽस्म्यहम् ॥२७॥ नमोनम स्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय ॥ प्रपन्नपालाय दुरंतशक्तये कदिंद्रियाणामनवाप्यवर्त्मने ॥२८॥नायं वेद स्वमात्मानं यच्छक्त्याऽहंधिया हतम् ॥ तं दुरत्ययमाहात्म्यं भगवंतमितोऽस्म्यहम् ॥ २९ ॥

जीवितुं नेच्छामि किं त्वज्ञानं दूरीकर्तुमिच्छामि॥२५॥सोऽहं मुमुक्षुः केवलं ब्रह्म प्रणतोऽस्मि न तु तं जानामि॥२६॥योगिनो यं हृदिपश्यंति तं योगेशं नतोऽस्मि॥२७॥ हे ईश ! दुरंतशक्तये प्रपन्नपालाय तुभ्यं नमोऽस्तु ॥२८॥ अयं जनः यं स्वमात्मानं न वेद तमीश्वरं श्रितोऽस्मि॥२९॥

१ आवृतया अविवेकेन व्याप्तया । २ आत्मलोकः आत्मप्रकाशकः । ३ विश्वं वेदो धनमुपकरणं यस्य तम् । ४ शक्तयो गुणाः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवं मूर्तिभेदं विना वर्णितं परं तत्त्वं येन तं गजेंद्रं विविधमूर्तिभेदाभिमानिनो ब्रह्मादयो यदा नोपजग्मुः तदा सर्वदेवमयमूर्तिर्हरिः प्रादुरासीत् ॥ ३०॥ततो जगन्निवासो दुःखितं गजेंद्रं ज्ञात्वा तत्स्तोत्रं च निशम्य स्तुवद्भिर्देवैः सह हरिर्गरुडमारुह्य चक्रं गृहीत्वा शीघ्रं तत्रागमत्॥३१॥तदा गजेंद्रः सरसि बलीयसा ग्राहेण गृहीतः आर्तः सन् गरुडे धृतचक्रं हरिं दृष्ट्वा शुंडोद्धृतं कमलं प्रक्षिप्य "हे नारायणाखिलगुरो

श्रीशुक उवाच ॥ एवं गजेन्द्रमुपवर्णिततर्निर्विशेषं ब्रह्मादयो विविधलिंगभिदाऽभिमानाः ॥ नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासीत् ॥३०॥ तं तद्वदार्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः ॥ छंदोमयेन गरुडेन समुह्यमानश्चक्रायुधोऽभ्यगमदाशु यतो गजेंद्रः ॥ ३१ ॥ सोंतःसरस्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम्॥ उत्क्षिप्य सांबुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते॥ ॥ ३२॥ तं वीक्ष्य पीडितमजः सहसाऽवतीर्य सग्राहमाशु सरसः कृपयोज्जहार ॥ ग्राहाद्विपाटितमुखादरिणा गजेन्द्रं संपश्यतां हरिरमूमुचदुच्छ्रियाणाम् ॥३३॥ इति श्रीभागव० म० अष्टमस्कंधे गजेंद्रोपाख्याने गजेंद्रमोक्षणं नाम तृतीयोऽध्यायः ॥ ३ ॥ श्रीशुक उवाच ॥ तदा देवर्षिगंधर्वा ब्रह्मेशानपुरोगमाः॥ मुमुचुः कुसुमासारं शंसंतः कर्मतद्धरेः ॥ १ ॥नेदुर्दुंदुभयो दिव्या गंधर्वा ननृतुर्जगुः ॥ ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमम् ॥ २ ॥ योऽसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक् ॥ मुक्तो देवलशापेन हूहूर्गंधर्वसत्तमः ॥ ३ ॥

भगवन्नमस्ते" इति दीनां गिरं जगाद ॥३२॥ तदाऽजः आर्तं गजं वीक्ष्य गरुडादवतीर्य कृपया सरोवरात् सग्राहं तमुज्जहार । ततो देवेषु पश्यत्सु हरिश्चक्रेण ग्राहं विदार्य गजेंद्रं मोचयामास ॥३३॥ इति श्रीभागव० अष्टम० चू० तृतीयोध्यायः॥३॥चतुर्थे तु तयोर्ग्राहः प्राप गंधर्वतां पुनः ॥ गजं स्वपार्षदं कृत्वा हरिर्निन्ये निजं पदम् ॥१॥ श्री शुक उवाच । तदा देवर्षिगंधर्वब्रह्मशिवादयो हरेः कर्म शंसंतः पुष्पवृष्टिं चक्रुः॥ १ ॥ दुंदुभयश्च नेदुः । गंधर्वाः ननृतुः जगुश्च ॥ २ ॥ हे राजन्! योऽयं ग्राहः स हूहूर्गंधर्वः । असौ देवलशापेन ग्राहो जातः । एवमत्र प्रसिद्धा कथा ।

१ अतिशैड्यायेदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदाचित् हूहूर्गंधर्वः सरसि स्त्रीभिः सह क्रीडन् स्नातुंप्रविष्टं देवलं पादे ग्रगृह्य विचकर्ष।स च कुपितो ग्राहो भवेति शशाप। ततः प्रसादितःसन् जगाद एवमेव गजेंद्रं गृह्णीष्व ततश्च गजेंद्रमुद्धरन् हरिस्त्वामपि मोचयिष्यतीति॥३॥स सद्यो मुक्तः सन् हरिं प्रणम्य स्तुतिं चक्रे॥४॥ततः ईशेनाऽनुकंपितः सन् पुनस्तं प्रणम्य परिक्रम्य च स्वं लोकमगात्॥५॥ततो गजेंद्रो भगवत्स्पर्शात् मुक्तो भगवद्रूपं प्राप॥६॥हे नृप! स द्रविडदेशे पांड्यो विष्णुव्र तपरायणः इंद्रद्युम्ननामा राजाऽऽसीत् ॥७॥स मलयाद्रावेकदा धृतमौनो जटाधरोऽच्युतं पूजयामास ॥८॥तत्र यदृच्छया सशिष्यो ऽगस्त्यः आ

प्रणम्य शिरसाऽधीशमुत्तमश्लोकमव्ययम् ॥ अगायत यशो धाम कीर्तन्यगुणसत्कथम् ॥ ४ ॥ सोऽनुकंपित ईशेन परिक्रम्य प्रणम्य तम् ॥ लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ॥ ५ ॥ गजेंद्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञान बंधनात् ॥ प्राप्तो भगवतो रूप पीतवासाश्चतुर्भुजः ॥ ६ ॥ स वै पूर्वमभूद्राजा पांड्यो द्रविडसत्तमः ॥ इंद्रद्युम्नइति ख्यातो विष्णुव्रतपरायणः ॥ ७ ॥ स एकदाऽऽराधनकाल आत्मवान् गृहीतमौनव्रत ईश्वरं हरिम् ॥ जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः ॥८॥ यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः परिश्रितः॥ तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ॥९॥तस्मा इमं शापमदादसाधुरयं दुरात्माऽकृतबुद्धि रद्य॥ विप्रावमंता विशतां तमोऽन्धं यथा गजः स्तब्धमतिः स एव ॥१० ॥श्रीशुक उवाच॥ एवं शप्त्वा गतोऽगस्त्यो भगवान्नृप सानुगः॥ इंद्रद्युम्नो ऽपि राजर्षिर्दिष्टं तदुपधारयन्॥११॥आपन्नः कौंजरीं योनिमात्मस्मृतिविनाशिनीम्॥ हर्यर्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः ॥१२ ॥ एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः॥ गंधर्वसिद्धविबुधैरुपगीयमानकर्माद्भुतं स्वभवनं गरुडासनोऽगात् ॥ १३ ॥

गमत्।तमकृतार्हणादिकं तूष्णीं स्थितं वीक्ष्य मुनिश्चुकोप॥९॥आह च।अयंविप्रावमंता गजवत् स्तब्धमतिः अतो गज एव भवतु॥१०॥श्रीशुक उवाच॥एवं शप्त्वाऽगस्त्योगतः। इंद्रद्युम्नोऽपि दैवप्रापितं सर्वंपश्यन्॥११॥ आत्मस्मृतिविनाशिनीं कौंजरीं योनिमापन्नः हर्यर्चनानुभावेन गजत्वे पिस्मृतिर्जाता॥१२॥एवं भगवान् गजेंद्रं विमोक्ष्य पार्षदगतिंप्रापेन गजेंद्रेण युक्तः सन् विबुधादिभिःस्तूयमानो गरुडासनः स्वभवनं जगाम॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे राजन् ! एवं मया तव कृष्णानुभावो वार्णितः । इदं गजेंद्रमोक्षणं शृण्वतां स्वर्ग्यं यशस्यं पापापहं दुस्स्वप्ननाशकमस्ति॥ १४॥ अतः श्रेयस्कामा द्विजाः प्रातरुत्थाय दुस्स्वप्नशांतये कीर्तयंति ॥ १५॥ हरिर्गजेंद्रमिदमाह ॥१६॥श्रीभगवानुवाच । हे गजेंद्र ! ये मां त्वामिदं सरोगिरिकंदरकाननं वेत्रकीचकवेणूनां गुल्मानि वृक्षान् ॥ १७॥ ब्रह्मणो मे शिवस्य च स्थानानि क्षीरोदं श्वेतद्वीपम्॥१८॥श्रीवत्सं कौस्तुभं मालां गदां सुदर्शनं शंखं

एतन्महाराज तवेरितो मया कृष्णानुभावो गजराजमोक्षणम्॥ स्वर्ग्यं यशस्यं कलिकल्मषापहं दुस्स्वप्ननाशं कुरुवर्य शृण्वताम् ॥ १४ ॥ यथाऽनुकीर्तयंत्येतच्छ्रेयस्कामा द्विजातयः ॥ शुचयः प्रातरुत्थाय दुस्स्वप्नाद्युपशांतये ॥ १५ ॥ इदमाह हरिः प्रीतो गजेंद्रं कुरुसत्तम ॥ शृण्वतां सर्वभूतानां सर्वभूतमयो विभुः ॥१६॥ श्रीभगवानुवाच ॥ ये मां त्वां च सरश्चेदं गिरिकंदरकाननम् ॥ वेत्रकीचकवेणूनां गुल्मानि सुरपादपान् ॥ १७ ॥ शृंगाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च ॥ क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरम् ॥ १८ ॥ श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम॥ सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरम् ॥ १९ ॥ शेषं च मत्कलां सूक्ष्मां श्रियं देवीं ममाश्रयाम् ॥ ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च ॥२० ॥ मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे ॥ कर्माण्यनंतपुण्यानि सूर्यं सोमं हुताशनम् ॥२१॥ प्रणवं सत्यमव्यक्तं गोविप्रान् धर्ममव्ययम् ॥ दाक्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि ॥ २२ ॥ गंगां सरस्वतीं नंदां कालिंदीं सितवारणम् ॥ ध्रुवं ब्रह्मऋषीन् सप्त पुण्यश्लोकांश्च मानवान् ॥ २३ ॥ उत्थायापररात्रांते प्रयताः सुसमाहिताः ॥ स्मरंति मम रूपाणि मुच्यंते ह्येनसोऽखिलात् ॥ २४॥ ये मां स्तुवंत्यनेनांग प्रतिबुध्य निशात्यये ॥ तेषां प्राणात्यये चाहं ददामि विमलां मतिम् ॥ २५ ॥

गरुडम् ॥ १९ ॥ शेषं श्रियं ब्रह्माणं नारदं भवं प्रह्लादम् ॥ २० ॥ मत्स्याद्यवतारकर्माणि सूर्यं सोमम् ॥ २१ ॥ प्रणवं सत्यम् ॥ २२ ॥ गंगा सरस्वतीं नंदां पुण्यश्लोकान् ॥ २३ ॥ इत्यादीनि मे रूपाणि स्मरंति ते पापात् मुच्यंते ॥ २४ ॥ प्रातस्त्वत्कृतस्तोत्रेण ये मां स्तुवंति तेषां प्राणांत्यये विमलां मतिं ददामि ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच । एवमुक्त्वा भगवान् शंखं वादयित्वा देवान् हर्षयन् जगाम ॥ २६ ॥ इति श्रीभाग० अष्टम० चू० चतुर्थोऽध्यायः ॥४॥ अमृता ख्यानमष्टाभिरध्यायैरनुवर्ण्यते । स्वभक्तपक्षपातेन यत्र योषायितं प्रभोः ॥१॥ पंचमे पंचमं चाथ षष्ठं चाकथयन्मनुम् । विप्रशापाच्च निःश्रीकैः कृता देवैर्हरेः स्तुतिः ॥२॥ श्रीशुक उवाच ॥ हे राजन् ! हरेः पापनाशनं कर्म गजेंद्रमोक्षणं कथितम् । अथ रैवतमन्वंतरं शृणु ॥१॥ पंचमो रैवतो नाम मनुः तत्पुत्राः बलिर्विंध्यादयः॥२॥विभुरिंद्रः । भूतरयाद्याः देवाः । हिरण्यरोमादयः सप्त ऋषयः॥३॥शुभ्रस्य विकुंठायां वैकुंठोऽवतारः ॥४॥

श्रीशुक उवाच ॥ इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमम् ॥ हर्षयन्विबुधानीकमारुरोह खगाधिपम् ॥ २६ ॥ इति श्रीभाग० महा० अष्टमस्कन्धे गजेन्द्रोपाख्याने गजेन्द्रस्य वैकुण्ठगमनं नाम चतुर्थोऽध्यायः ॥४॥ श्रीशुकउवाच ॥ राजन्नुदितमेतत्ते हरेः कर्माघनाशनम् ॥ गजेंद्रमोक्षणं पुण्यं रैवतं त्वंतरं शृणु ॥१॥ पंचमो रैवतो नाम मनुस्तामससो दरः ॥ बलिर्विंध्यादयस्तस्य सुता अर्जुनपूर्वकाः ॥२॥ विभुरिंद्रः सुरगणा राजन्भूतरयादयः ॥ हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ॥ ३ ॥ पत्नी विकुंठा शुभ्रस्य वैकुंठैः सुरसत्तमैः ॥ तयोः स्वकलया जज्ञे वैकुंठो भगवान्स्वयम् ॥ ४ ॥ वैकुंठः कल्पितो येन लोको लोकनमस्कृतः ॥ रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ॥ ५ ॥तस्यानुभावः कथितो गुणाश्च परमोदयाः ॥ भौमान्रेणून्स विममे यो विष्णोर्वर्णयेद्गुणान् ॥ ६ ॥ षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः ॥ पुरुः पुरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ॥ ७ ॥ इंद्रो मंत्रद्रुमस्तत्र देवा आप्यादयो गणाः ॥ मुनयस्तत्र वै राजन्हविष्मद्वीरकादयः ॥ ८ ॥ तत्रापि देवः संभूत्यां वैराजस्याभवत्सुतः ॥ अजितो नाम भगवानंशेन जगतः पतिः ॥ ९ ॥ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा ॥ भ्रममाणोंभसि धृतः कूर्मरूपेण मंदरः ॥ १० ॥

लक्ष्म्याः प्रियकाम्यया येन वैकुंठलोको निर्मितः ॥ ५ ॥ तस्य प्रभावगुणादयस्तृतीयस्कंधादिषु कथिताः ॥ ६॥ षष्ठश्चाक्षुषनामा मनुः ॥ पुरुः पुरुषाद्यास्तत्पुत्राः ॥ ७ ॥ मंत्रद्रुमः इंद्रः । आप्यादयो देवाः । हविष्मद्वीरकादयः सप्त ऋषयः ॥ ८ ॥ वैराजात् संभूत्यामजितो नामावतारः ॥ ९ ॥ येन पयोनिधिं निर्मथ्य सुराणाममृतं साधितं कूर्मरूपेणांभसि मंदराद्रिर्धृतः ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ हे ब्रह्मन् ! यथा भगवता क्षीराब्धिर्मथितःयदर्थमद्रिं स दधार ॥११॥ यथा च सुरैरमृतं प्राप्तम् अन्यदपि यद्यदभवत् तत् हरेः कर्म वद ॥ १२॥त्वया कथ्यमानेन हरेर्महिम्ना मे चित्तं न तृप्यति ॥ १३॥ सूत उवाच ॥ एवं पृष्टः शुको हरेर्वीर्यं कथितुमुद्योग चक्रे॥ १४॥श्रीशुक उवाच ॥ यदा युधि दैत्यैः पीड्यमानाः देवाः गतप्राणाः पतिताः सन्तो न पुनर्जीवंति स्म ॥१५ ॥ किंच हे नृप ! यदा दुर्वाससःशापात्त्रयो लोकाः गतश्रियो बभूवुः तदा यज्ञादिक्रियाः नष्टाः । दुर्वाससा हि कदाचिन्मार्गे गच्छंतमिंद्रं दृष्ट्वा स्वकंठस्था माला तस्मै दत्ता। इंद्रेण च श्रीमदे

राजोवाच ॥ यथा भगवता ब्रह्मन्मथितः क्षीरसागरः॥यदर्थं वा यतश्चाद्रिं दधारांबुचरात्मना॥११॥ यथामृतं सुरैःप्राप्तं किं चान्यदभवत्ततः ॥ एतद्भगवतः कर्म वदस्व परमाद्भुतम् ॥१२॥ त्वया संकथ्यमानेन महिम्ना सात्वतांपतेः॥ नातितृप्यति मे चित्त सुचिरं तापतापितम् ॥१३॥ सूत उवाच॥संपृष्टो भगवानेवं द्वैपायनसुतो द्विजाः॥अभिनंद्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे ॥१४॥श्रीशुक उवाच ॥ यदा युद्धेऽसुरैर्देवा बाध्यमानाः शितायुधैः ॥ गतासवो निपतिता नोत्तिष्ठेरन्स्म भूयशः ॥ १५ ॥ यदा दुर्वाससः शापात्सेंद्रा लोकास्त्रयो नृप ॥ निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः ॥१६ ॥निशम्यैतत्सुरगणा महेंद्रवरुणादयः ॥ नाध्यगंच्छन्स्वयं मंत्रैर्मंत्रयंतो विनिश्चयम् ॥ १७ ॥ ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्धनि सर्वशः ॥ सर्वं विज्ञापयांचक्रुः प्रणताः परमेष्ठिने ॥ १८ ॥ स विलोक्यैद्रवाय्वादीन्निस्सत्त्वान्विगतप्रभान् ॥ लोकानमंगलप्रायानसुरानयथा विभुः ॥ १९ ॥

नानादृत्यैरावतस्य कुंभयोर्निक्षिप्ता । स च गजो मत्तः पद्भ्यां तां मालां चूर्णीचकार । ततः कुपितो दुर्वासास्तं शशाप । त्रिभिर्लोकैः सह त्वं निश्श्रीको भवेति ॥ १६ ॥ ततो महेंद्रवरुणादयः एतद्यज्ञनाशादिकं निशम्य स्वयं विचारयंतो निश्चयं न प्रापुः ॥ १७ ॥ ततो मेरोर्मूर्धनि ब्रह्मसभां गत्वा प्रणताः संतो ब्रह्मणे सर्वं निवेदयामासुः ॥१८॥ तदा ब्रह्मा तान् निस्सत्त्वान् दृष्ट्वा दैत्यांश्च तेजीयसो दृष्ट्वा ॥ १९ ॥

१ दैववैलक्षण्येन ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनसा हरिं स्मरन् देवानुवाच ॥ २० ॥ हे देवाः ! अहं भवो यूयं मनुष्यादयश्च एते सर्वे यस्यांशाः तं शरणं व्रजामः ॥ २१ ॥ यस्य कश्चित् वध्यो रक्षणीयश्च न तथापि यः सत्त्वादिगुणान् धत्ते ॥ २२ ॥ अयं कालः स्थितिपालनरूपो वर्तते । अतस्तं जगद्गुरुं शरणं व्रजामः ॥ २३ ॥ श्रीशुक उवाच ॥ इति ब्रह्मा देवान् संभाष्य देवैः सह क्षीराब्धिं जगाम ॥ २४ ॥ तत्राऽदृष्टरूपस्य वैदिकीभिर्गीर्भिः स्तुतिं चकार ॥ २५ ॥

समाहितेन मनसा संस्मरन् पुरुषं परम् ॥ उवाचोत्फुल्लवदनो देवान्स भगवान्परः ॥ २० ॥ अहं भवो यूयमथोऽसुरादयो मनुष्यतिर्यग्द्रुमधर्मजातयः ॥ यस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं तमव्ययम् ॥ २१ ॥ न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः॥अथापि सर्गस्थितिसंयमार्थं धत्ते रजस्सत्त्वतमांसि काले॥२२॥ अयं च तस्य स्थितिपालनक्षणः सत्त्वं जुषाणस्य भवाय देहिनाम् ॥ तस्माद्व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः ॥ २३ ॥ श्रीशुक उवाच ॥ इत्याभाष्य सुरान्वेधाः सह देवैरर्रिदम ॥ अजितस्य पदं साक्षाज्जगाम तमसः परम् ॥ २४ ॥ तत्रादृष्टस्वरूपाय श्रुतपूर्वाय वै विभो ॥स्तुतिमब्रूत दैवीभिर्गीर्भिस्त्ववहितेन्द्रियः ॥२५॥ ब्रह्मोवाच ॥ अविक्रियं सत्यमनंतमाद्यं गुहाशयं निष्कलमप्रतर्क्यम् ॥ मनोऽग्रयानं वचसाऽनिरुक्तं नमामहे देववरं वरेण्यम्॥२६॥ विपश्चितं प्राणमनोधियात्मनामर्थेन्द्रियाभासमनिद्रमव्रणम् ॥ छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥ २७ ॥ अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पंचदशारमाशु ॥ त्रिणाभि विद्युच्चलमष्टनेमि यदक्षमाहुस्तमृतं प्रपद्ये ॥ २८ ॥

ब्रह्मोवाच ॥ हे ईश ! अविक्रियं सत्यं देववरं त्वां ननाम ॥ २६ ॥ प्राणादींद्रियाणां ज्ञातारं व्यापिनं तं शरण व्रजाम ॥ २७ ॥मायया प्रेर्यमाणं जीवचक्रं यस्याऽधिष्ठानं तं सत्यं शरणं प्रपद्ये ॥ २८ ॥

१ लोकालोकात्परतो यन्नमस्तस्मात्परम् । २ सर्वांतरम् । ३ निरुपाधिम् । ४ अविद्या तन्निवर्तिका विद्या च । ५ जीवपक्षपातिनौ । ६ त्रियुगेष्वाविर्भवतम् । ७ जीवस्य । ८ दशेन्द्रियाणि पंचप्राणाश्चेति पंचदशाराः । ९ सत्त्वादिगुणाः नाभिरिव मध्ये यस्य तत् । १० अष्टौ प्रकृतयो नेमिरिव यस्य तत् । ११ षोऽक्षो यस्य तं यदाधिष्ठानम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धीराः योगरथेन यमुपासते ते हरिं नमामि॥२९॥यस्य ते मायां कश्चिदपि नातिक्रामति यया जनो मुह्यन् सन् स्वरूपं न वेद तं परेशं नमाम॥३०॥
हे देव !इमे देवाःवयं यस्य तव सत्त्वेन सृष्टा अपि निरुपाधित्वां न विद्मः। रजस्तमोमयाः दैत्याः न विदुरिति किं वक्तव्यम्॥३१॥यस्य पादौ
मही यत्र चतुर्विधभूतसर्गः ॥३२॥यद्रेतोंभः यतो लोकाः जायंते॥३३॥यस्य मनः सोमः यतो देवानामन्न बलमायुश्च भवति॥३४॥यस्य मुख

य एकवर्णं तमसः परं तदलोकमव्यक्तमनंतपारम् ॥ आसां चकारोपसुपर्णमेनमुपासते योगरथेन धीराः॥ २९ ॥ न यस्य कश्चातितितर्ति मायां यया जनो मुह्यति वेद नार्थम्॥तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरंतम्॥ ॥ ३० ॥ इमे वयं तत्प्रिययैव तन्वा सत्त्वेन सृष्टा बहिरंतराविः ॥ गतिं न सूक्ष्मामृषयश्च विद्महे कुतोऽसुराद्या इतर प्रधानाः ॥ ३१ ॥ पादौ महीयं स्वकृतेव यस्य चतुर्विधो यत्र हि भूतसर्गः॥स वै महापूरुष आत्मतंत्रः प्रसीदतां ब्रह्म महाविभूतिः॥३२॥अंभस्तु यद्रेत उदारवीर्यं सिध्यंति जीवंत्युत वर्धमानाः ॥ लोकास्त्रयोऽथाखिललोकपालाः प्रसीदतां ब्रह्म महाविभूतिः॥ ३३ ॥ सोमं मनो यस्य समामनंति दिवौकसां वै बलमंध आयुः ॥ ईशो नगानां प्रजनः प्रजानां प्रसीदतां नः स महाविभूतिः॥ ३४ ॥अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकांडनिमित्तजन्मा॥अंतस्समुद्रेऽनुपचन्स्वधातून्प्रसीदतां नः स महाविभूतिः॥३५॥यच्चक्षुरासीत्तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यम्॥ द्वारं च मुक्तेरमृतं च मृत्युः प्रसीदतां नः स महाविभूतिः॥३६॥प्राणादभूद्यस्य चराचराणां प्राणः सहो बलमोजश्च वायुः॥अन्वारम सम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः॥३७ ॥ श्रोत्राद्दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः ॥प्राणेन्द्रियात्माऽसुशरीरकेतं प्रसीदतां नः स महाविभूतिः॥ ३८ ॥बलान्महेन्द्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धिषणाद्विरिंचः॥ खेभ्यश्च छंदांस्यृषयो मेढ्रतः कः प्रसीदतां नः स महाविभूतिः ॥ ३९ ॥

मग्निः यतः उदरमध्येऽन्नादिकं पचति ॥३५॥यस्य चक्षुः सूर्यः यो मुक्त्यमृतमृत्यूनां द्वारं भवति ॥ ३६ ॥ यस्य प्राणात् चराचराणां प्राणः ॥ ३७ ॥ यस्य कर्णाद् दिशो हृदयाद्देहगतच्छिद्राणि ॥ ३८ ॥ यस्य प्रसादाद् देवाः क्रोधाद् रुद्रो बुद्धेर्ब्रह्मा शिश्नात् प्रजापतिः ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वक्षसः श्रीः । छायायाः पितरः । स्तनाद् धर्मः । पृष्ठतोऽधर्मः । मस्तकात् स्वर्गः । विहारादप्सरसः ॥४०॥ यस्य मुखाद् विप्रो वेदाश्च । यस्य भुजयोः क्षत्रं बलं च । यस्योर्वोर्वैश्यो वार्ता च । यस्यांघ्रितः अवेदः शुश्रूषा शूद्रश्च॥४१॥यस्याधरात्लोभः । ऊर्ध्वोष्ठात् प्रीतिः । नासिकायाः कांतिः । स्पर्शेन कामः॥४२॥भूतानि कालं कर्मगुणान् भौतिकप्रपंचं च यस्य योगमायाविहितानि वदंति स महाविभूतिर्नः प्रसीदताम् ॥ ४३॥

श्रीर्वक्षसः पितरश्छाययाऽऽसन्धर्मः स्तनादितरः पृष्ठतोऽभूत्॥द्यौर्यस्य शीर्ष्णाऽप्सरसो विहारात्प्रसीदतां नः स महा विभूतिः॥ ४०॥विप्रो मुखं ब्रह्म च यस्य गुह्यं राजन्य आसीद्भुजयोर्बलं च ॥ ऊर्वोर्विडोजोंघ्रिरवेदशूद्रौ प्रसीदतां नः स महाविभूतिः॥४१ ॥ लोभोऽधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यः स्पर्शेन कामः ॥ भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रसीदतां नः स महाविभूतिः॥४२॥द्रव्यं वयः कर्मगुणान्विशेषं यद्योगमायाविहितान्वदंति॥ यद्दुर्विभाव्यं प्रबुधापबाधं प्रसीदतां नः स महाविभूतिः॥४३ ॥नमोऽस्तु तस्मा उपशांतशक्तये स्वाराज्यलाभप्रतिपूरितात्मने ॥ गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नभस्वदूतये ॥ ४४ ॥ सत्वं नो दर्शयात्मानमस्मत्करणगोचरम्॥प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखाम्बुजम् ॥ ४५ ॥ तैस्तैः स्वेच्छाधृते रूपैः कालेकाले स्वयं विभो ॥ कर्म दुर्विषहं यन्नो भगवांस्तत्करोति हि ॥ ४६॥ क्लेशभूर्यल्पसाराणि कर्माणि विफलानि वा ॥ देहिनां विषयार्तानां न तथैवार्पितं त्वयि ॥४७ ॥ नावमः कर्मकल्पोपि विफलायेश्वरार्पितः ॥ कल्पते पुरुषस्यैष स ह्यात्मा दयितो हितः ॥ ४८ ॥ यथा हि स्कंध शाखानां तरोर्मूलावसेचनम्॥ एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥ ४९ ॥

तस्मै उपशांतशक्तये ते नमोऽस्तु ॥ ४४ ॥एवंभूतस्त्वं प्रपन्नानां नः सस्मितं मुखांबुजं दर्शय ॥ ४५ ॥ त्वं काले काले स्वेच्छाधृतरूपैर्नो दुर्विषहं कर्म स्वयं करोषि ॥ ४६ ॥ देहिनां भूरिक्लेशानि स्वल्पफलानि कर्माणि त्वत्पदेर्पितानि सफलानि भवंति ॥ ४७ ॥ अल्पोपि कर्माभासः ईश्वरार्पितश्चेद् विफलाय न कल्पते ॥ ४८ ॥ वृक्षमूलावसेचनेन शाखानामिव विष्णोराराधनेन सर्वेषामाराधनं भवति ॥ ४९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनंताय निर्गुणाय सांप्रतं सत्त्वस्थाय तुभ्यं नमः ॥ ५० ॥ इति श्रीभाग० अष्टम० चूर्णिकायां पंचमोऽध्यायः ॥ ५ ॥ षष्ठे पुनः स्तुतिर्विष्णा वाविर्भूते सुरैः कृता ॥ तन्मंत्रेणासुरैः साकममृताथ महोद्यमः ॥ १ ॥ श्रीशुक उवाच ॥ हे राजन् ! एवं सुरगणैः स्तुतो भगवान् सहस्रार्कोदयद्युतिः प्रादुरभूत् ॥ १ ॥ तदा देवास्तत्तेजसा खं दिशो नापश्यन् ॥ २ ॥ ततः शिवेन सह ब्रह्मा आविर्भूतां तां तनुं मरकतश्यामां कमललोचनाम्

नमस्तुभ्यमनंताय दुर्वितर्क्यात्मकर्मणे ॥ निर्गुणाय गुणेशाय सत्त्वस्थाय च सांप्रतम् ॥ ५० ॥ इति श्रीभाग० म० अष्टम स्कंधेऽमृतमथने पंचमोऽध्यायः ॥ ५ ॥ श्रीशुक उवाच ॥ एवं स्तुतः सुरगणैर्भगवान्हरिरीश्वरः ॥ तेषामाविरभूद्राजन् सहस्रार्कोदयद्युतिः ॥ १ ॥ तेनैव महसा सर्वे देवाः प्रतिहतेक्षणाः ॥ नापश्यन्खं दिशः क्षोणिमात्मानं च कुतो विभुम् ॥ ॥ २ ॥ विरिंचो भगवान्दृष्ट्वा सह शर्वेण तां तनुम् ॥ स्वच्छां मरकतश्यामां कंजगर्भारुणेक्षणाम् ॥ ३ ॥ तप्तहेमावदाते न लसत्कौशेयवाससा ॥ प्रसन्नचारुसर्वांगीं सुमुखीं सुन्दरभ्रुवम् ॥ ४ ॥ महामणिकिरीटेन केयूराभ्यां च भूषिताम् ॥ कर्णाभरणनिर्भातकपोलश्रीमुखांबुजाम् ॥ ५ ॥ कांचीकलापवलयहारनूपुरशोभिताम् ॥ कौस्तुभाभरणां लक्ष्मीं बिभ्रतीं वनमालिनीम् ॥ ६ ॥ सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासिताम् ॥ तुष्टाव देवप्रवरः सशर्वः पुरुषं परम् ॥ सर्वामरगणैः साकं सर्वांगैरवनिं गतैः ॥ ७ ॥ ब्रह्मोवाच ॥ अजातजन्मस्थितिसंयमायागुणाय निर्वाणसुखार्णवाय ॥ अणोरणिम्नेऽपरिगण्यधाम्ने महानुभावाय नमोनमस्ते ॥ ८ ॥ रूपं तवैतत्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतांत्रिकेण ॥ योगेन धातः सह नस्त्रिलोकान्पश्याम्यमुष्मिन्नु ह विश्वमूर्तौ ॥ ९ ॥ त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यंत आसीदिदमात्मतंत्रे ॥ त्वमादिरंतो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात् ॥ १० ॥

॥ ३ ॥ वस्त्राभरणैर्युतां चारुसर्वांगीम् ॥ ४ ॥ किरीटकेयूराभ्यां भूषिताम् ॥ ५ ॥ कांचीहारनूपुरशोभितां वनमालायुताम् ॥ ६ ॥ मूर्तिमद्भिः सुदर्शनादिभिरुपासितां दृष्ट्वा परं पुरुषं तुष्टाव ॥ ७ ॥ ब्रह्मोवाच ॥ हे ईश ! अजातजन्मस्थितिसंयमाय तुभ्यं नमोनमः ॥ ८ ॥ हे देवश्रेष्ठ ! इदं तव रूपं पूज्यम् ॥ ९ ॥ इदं विश्वं त्वय्येव ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे ईश ! त्वं विश्वं निर्माय तत्र प्रविष्टोसि ॥ ११ ॥ यथा काष्ठे मथनेनाग्निं प्रासुवंति तथा कवयस्त्वां बुद्धया गुणेषु वदंति ॥ १२ ॥ हे कमल नाभ ! एवंभूतं त्वां दृष्ट्वाऽद्य वयं निर्वृतिं गताः ॥ १३ ॥ वयं ते पादमूलं यदर्थं प्राप्ताः तत् त्वं विधत्स्व । हे अंतरात्मन् ! अशेषसाक्षिणस्तवाऽन्यैर्विज्ञाप्यं किमस्ति ॥ १४ ॥ हे ईश ! अहं शिवः इंद्रादयश्चाऽग्नेर्विस्फुलिंगा इव त्वत्तो वयं पृथग् विभाताः संतः आत्मनः श्रेयः किं विद्मः

त्वं मायया त्मा श्रयया स्वयेदं निर्माय विश्वं तदनु प्रविष्टः ॥ पश्यंति युक्ता मनसा मनीषिणो गुणव्यवायेऽप्यगुणं विपश्चितः ॥ ११ ॥ यथाग्निमेधस्यमृतं च गोषु भुव्यन्नमंबूद्यमने च वृत्तिम् ॥ योगैर्मनुष्या अधियंति हि त्वां गुणेषु बुद्धया कवयो वदंति ॥ १२ ॥ तं त्वां वयं नाथ समुज्जिहानं सरोजनाभाऽतिचिरेप्सितार्थम् ॥ दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा दवार्ता इव गांगमंभः ॥ १३ ॥ स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव पादमूलम् ॥ समागतास्ते बहिरंतरात्मन्किं वान्यविज्ञाप्यमशेषसाक्षिणः ॥१४॥ अहं गिरित्रश्च सुरादयो ये दक्षादयोऽग्नेरिव केतवस्ते ॥ किं वा विदामेश पृथग्विभाता विधत्स्व शं नो द्विजदेवमंत्रम् ॥ १५ ॥ श्रीशुक उवाच ॥ एवं विरिंचादिभिरीडितस्तद्विज्ञाय तेषां हृदयं यथैव ॥ जगाद जीमूतगभीरया गिरा बद्धांजलीन्संवृतसर्वकारकान् ॥ १६॥ एक एवेश्वरस्तस्मिन्सुरकार्ये सुरेश्वरः ॥ विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः ॥ १७ ॥ श्रीभगवानुवाच ॥ हंत ब्रह्मन्नहो शंभो हे देवा मम भाषितम् ॥ शृणुतावहिताः सर्वे श्रेयो वः स्याद्यथा सुराः ॥ १८॥ यात दानवदैतेयैस्तावत्संधिर्विधीयताम् ॥ कालेनानुगृहीतैस्तैर्यावद्वो भव आत्मनः ॥ १९ ॥

अपि तु न अतो देवानां द्विजानां चेममुपायमुपदिश ॥ १५ ॥ श्रीशुक उवाच ॥ एवं ब्रह्मादिभिः स्तुतो भगवान् तेषामभिप्रायं ज्ञात्वा बद्धांजलीन् तान् जगाद ॥ १६ ॥ देवकार्ये एक एवेश्वरः समुद्रमथनादिभिः क्रीडितुमिच्छंस्तानाह ॥ १७ ॥ श्रीभगवानुवाच ॥ हे ब्रह्मन् ! हे शम्भो ! हे देवाः ! मम भाषणं शृणुत ॥ १८॥ यूयं यात । दानवदैतेयैः सह सख्यं विधीयताम् ॥ १९ ॥

१ योगिनः । २ विवेकिनः । ३ शास्त्रज्ञाः । ४ अमृतमाज्यम् । ५ घटीयन्त्रादिनोद्धरणे । ६ सम्यगाविर्भवन्तम् । ७ बहिरगोचरम् । ८ नियमितसर्वेन्द्रियान् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे देवाः ! आदौ स्वकार्यार्थसाधने शत्रवोऽपि मित्राणि कार्याणि पश्चादहिमूषकवद् वर्तितव्यम् ॥ २० ॥ अमृतोत्पादने शीघ्रं यत्नं क्रियताम् यस्य पीतस्य सतो मृत्युग्रस्तोपि जंतुरमरो भवेत्॥२१॥ तत्कर्तव्यतामाह । हे देवाः ! क्षीरसमुद्रे तृणलतौषधीः क्षिप्त्वा मंदरं मंथानं वासुकिं रज्जुं च कृत्वा ॥ २२ ॥ मया सहायेन निर्मथध्वम् । एवं कृते दैत्याः क्लेशभागिनो भविष्यंति । यूयं फलभागिनो भविष्यथ ॥ २३ ॥ असुराः यद्यदिच्छंति तत्तदनुमोदध्वम् । हे सुराः ! सर्वेर्थाः साममार्गेण सिध्यंति तथा संरंभेण न॥२४॥किंच जलधिसंभवाद् विषात् न भेतव्यम्

अरयोऽपि हि संधेयाः सति कार्यार्थगौरवे ॥ अहिमूषकवद्देवा अर्थस्य पदवीं गतैः ॥२०॥ अमृतोत्पादने यत्नः क्रियतामविलंबितम् ॥ यस्य पीतस्य वै जंतुर्मृत्युग्रस्तोमरो भवेत् ॥२१ ॥ क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥ २२ ॥ सहायेन मया देवा निर्मथध्वमतंद्रिताः ॥ क्लेशभाजो भविष्यंति दैत्या यूयं फलग्रहाः॥ २३॥ यूयं तदनुमोदध्वं यदिच्छंत्यसुराः सुराः ॥ न संरंभेण सिध्यंति सर्वेऽर्थाः सांत्वया यथा ॥ २४ ॥ न भेतव्यं कालकूटाद्विषाज्जलधिसंभवात॥ लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु ॥ २५॥श्रीशुक उवाच ॥ इति देवान्समादिश्य भगवान्पुरुषोत्तमः ॥ तेषामंतर्दधे राजन्स्वच्छंदगतिरीश्वरः ॥ २६ ॥ अथ तस्मै भगवते नमस्कृत्य पितामहः ॥ भवश्च जग्मतुः स्वंस्वं धामोपेयुर्बलिं सुराः ॥ २७ ॥ दृष्ट्वारीनप्यसंयत्ताञ्जातक्षोभान्स्वनायकान् ॥ न्यषेधद्दैत्यराट्छ्लोक्यः संधिविग्रहकालवित् ॥ २८ ॥ ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः ॥ श्रिया परमया जुष्टं जिताशेषमुपागमन् ॥ २९ ॥

तथा मथनादुत्पन्नेषु वस्तुषु कामरोषलोभाः न कार्याः ॥ २५ ॥ श्रीशुक उवाच ॥ एवं भगवान् देवानादिश्यांतर्दधे ॥ २६ ॥ अथ भगवते नमस्कृत्य ब्रह्मा शिवश्च स्वंस्वं धाम जग्मतुः । ततो देवाः बलिं जग्मुः ॥२७ ॥ तदा शस्त्रादिरहितानपि देवान् दृष्ट्वा जातक्षोभान् स्वनायकान् क्रोधयुक्तान् दृष्ट्वा संधिविग्रहकालविद् बलिर्दैत्यान् न्यषेधत् ॥२८ ॥ देवाः बलिं गत्वा परमैश्वर्येणासीनं तं दृष्ट्वा ॥ २९ ॥

१ अर्थमार्गप्रवृत्तैः । २ स्तुत्यः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महेंद्रो बलिं सांत्वयित्वा पुरुषोत्तमात् शिक्षितं बभाषे ॥ ३० ॥ तद् वचो बलेरन्येषां शंबरारिष्टादीनां चारोचत॥३१॥ततो देवाऽसुराः मिथः समयं कृत्वाऽमृतार्थमुद्यमं चक्रुः ॥३२॥ततस्ते देवासुराः मंदरगिरिमुत्पाट्योदधिं निन्युः ॥ ३३ ॥ शक्रवैरोचनादयस्तं वोढुमसमर्थाःभारेण श्रांताः संतः पथि तत्यजुः ॥ ३४ ॥ स कनकाचलस्तत्र निपतन् भारेण देवासुरान् चूर्णयामास ॥ ३५ ॥ ततो भग्नमनसो भग्नबाहूरुकंधरान्

महेंद्रः श्लक्ष्णया वाचा सांत्वयित्वा महापतिः ॥ अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात् ॥ ३० ॥ तदरोचत दैत्य स्य तत्रान्ये येऽसुराधिपाः॥शंबरोऽरिष्टनेमिश्च ये च त्रिपुरवासिनः॥३१॥ततो देवासुराः कृत्वा संविदं कृतसौहृदाः॥ उद्यमं परमं चक्रुरमृतार्थे परंतप॥३२॥ ततस्ते मंदरगिरिमोजसोत्पाट्य दुर्मदाः॥ नदंत उदधिं निन्युः शक्ताःपरिघ बाहवः॥३३॥दूरभारोद्वहश्रांताः शक्रवैरोचनादयः॥अपारयंतस्तं वोढुं विवशा विजहुः पथि ॥३४॥ निपतन्स गिरि स्तत्र बहूनमरदानवान् ॥ चूर्णयामास महता भारेण कनकाचलः ॥ ३५ ॥ तांस्तथा भग्नमनसो भग्नबाहूरुकंधरान् ॥ विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः॥ ३६ ॥ गिरिपातविनिष्पिष्टान्विलोक्यामरदानवान् ॥ ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा ॥३७॥गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया॥आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः॥३८॥ अवरोप्य गिरिं स्कंधात्सुपर्णः पततांवरः ॥ ययौ जलांत उत्सृज्य हरिणा स विसर्जितः ॥ ३९ ॥ इति श्रीभागवते म० अष्टमस्कंधेऽमृतमथने मंदराचलानयनं नाम षष्ठोऽध्यायः ॥ ६ ॥

देवासुरान् ज्ञात्वा तत्र गरुडारूढो भगवान् प्रादुर्भूत्वा ॥ ३६ ॥ गिरिपातेन पिष्टान् देवासुरानमृतदृष्ट्या जीवयामास ॥३७॥ एकहस्तेन गिरिं गरुडे आरोप्य स्वयं चारुह्य सुरासुरैः सह क्षीराब्धिं ययौ ॥ ३८ ॥ गरुडो गिरिं स्कंधादुत्तार्य जले क्षिप्त्वा हरिणा विसर्जितो वैकुंठं ययौ ॥ ३९ ॥ इतिश्रीभागव०अष्टम० चू० षष्ठोऽध्यायः ॥ ६ ॥

१ सुपर्णेः तत्र स्थिते वासुकेरागमनायोगात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तमे मथनोतविद्भूषभीत्याऽखिलैर्जनैः । स्तुतः सन् कृपया रुद्रः पपौ विषमितीर्यते॥१॥श्रीशुक उवाच ॥ ते देवाः फलभागेन वासुकिमामंत्र्य तं गिरौ संवेष्टय मथितुं प्रारेभिरे॥१॥तत्र देवैः सह हरिर्मुखं जगृहे ॥२॥ तद् भगवच्चेष्टितं दैत्यपतयो नैच्छन् ॥३॥हे देवाः स्वाध्यायश्रुतसंपन्नाः वयं सर्पस्य पुच्छं न गृह्णीमः । एवमुक्त्वा तूष्णीं स्थितान् दैत्यान् विलोक्य॥४॥स्मामरो हरिः पुच्छं जग्राह।एवं कृतस्थानविभागास्ते पयो

श्रीशुक उवाच ॥ ते नागराजमामंत्र्य फलभागेन वासुकिम् ॥ परिवीय गिरौ तस्मिन्नेत्रमब्धिं मुदान्विताः ॥ १ ॥ आरेभिरे सुसंयत्ता अमृतार्थं कुरूद्वह ॥ हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोऽभवन् ॥२॥ तन्नैच्छन्दैत्यपतयो महापुरुषचेष्टितम् ॥ न गृह्णीमो वय पुच्छमहेरंगममंगलम् ॥३॥स्वाध्यायश्रुतसंपन्नाः प्रख्याता जन्मकर्मभिः ॥ इति तूष्णीं स्थितान्दैत्यान्विलोक्य पुरुषोत्तमः ॥ ४ ॥ स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः ॥ कृतस्थानविभागास्त एवं कश्यपनंदनाः ॥ ५॥ ममंथुः परमायत्ता अमृतार्थं पयोनिधिम् ॥ मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत् ॥ ॥ ६ ॥ ध्रियमाणोऽपि बलिभिर्गौरवात्पांडुनंदन ॥ ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः ॥ आसन्स्वपौरुषे नष्टे दैवेनातिबलीयसा ॥७॥ विलोक्य विघ्नेशविधिं तदेश्वरो दुरंतवीर्यो वितथाभिसंधिः ॥ कृत्वा वपुः काच्छपमद्भुतं महत्प्रविश्य तोयं गिरिमुज्जहार ॥८ ॥तमुत्थित वीक्ष्य कुलाचलं पुनः समुत्थिता निर्मथितुं सुरासुराः ॥ दधार पृष्ठेन सलक्षयोजनप्रस्तारिणा द्वीप इवापरो महान् ॥ ९ ॥ सुरासुरेंद्रैर्भुजवीर्यवेपितं परिभ्रमंतं गिरिमंग पृष्ठतः ॥ बिभ्रत्तदा वर्त्तनमादिकच्छपो मेनेंगकंडूयनमप्रमेयः ॥ १० ॥

निधिं ममन्थुः॥९॥एवमर्णवे मथ्यमाने सति बलिभिर्ध्रियमाणोऽप्यद्रिर्गुरुत्वात् जलमाविशत॥ ६ ॥ततस्ते स्वपौरुषे नष्टे सति खिन्नाःबभूवुः॥७॥ तदेश्वरो विघ्नेशकृतं विघ्नं विलोक्य काच्छपं वपुः कृत्वा तोयं प्रविश्य गिरिमुज्जहार॥८॥एवं तं गिरिमुत्थितं वीक्ष्य ते मथितुं पुनरुत्थिताः। तदा भगवान् लक्षयोजनविस्तृतपृष्ठेन तं दधार ॥ ९ ॥ ततः सुराऽसुरेंद्राणां भुजवीर्यकंपितं पृष्ठे भ्रमंतं गिरिं कच्छपोंगकंडूयनं मेने ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिरसुरान् दैत्याकारेण देवान् देवाकारेण रूपेण प्रविश्य तेषां बलवीर्यं प्रेरयन्नास ॥ ११ ॥ यदा मथनसमये गिरिरुपर्युपर्यगात् तदा भगवान् ब्रह्मभवेन्द्रमुख्यैः स्तुतो गिरौ तस्थौ ॥ १२ ॥ ततः उपर्यधश्च देवदैत्यमध्ये गोत्रनेत्रयोः प्रविशता हरिणा वृद्धिं गतास्तेऽब्धिं ममंथुः ॥ १३ ॥ तदा वासुकेरपरिमितदृङ्मुखेभ्योऽग्निधूमौ निर्गतौ । ताभ्यां दग्धतेजसो दैत्याः अभवन् ॥ १४ ॥ तस्य श्वासज्वालाभिर्हतप्रभान् धूम्रांबरान

तथाऽसुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् ॥ उद्दीपयन्देवगणांश्च विष्णुर्दैवेन नागेंद्रमबोधरूपः ॥ ११ ॥ उपर्यगेन्द्रं गिरिराडिवान्य आक्रम्य हस्तेन सहस्रबाहुः ॥ तस्थौ दिवि ब्रह्मभवेन्द्रमुख्यैरभिष्टुवद्भिः सुमनोऽभिवृष्टः ॥१२॥उपर्यधश्चात्मनि गोत्रनेत्रयोः परेण ते प्राविशता समेधिताः॥ममंथुरब्धिं तरसा मदोत्कटा महाद्रिणा क्षोभितनक्रचक्रम्॥१३॥अहींद्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसोऽसुराः ॥ पौलोमकालेयबलील्वलादयो दावाग्निदग्धाः सरला इवाभवन् ॥१४॥ देवांश्च तच्छ्वसशिखाहतप्रभान्धूम्रांबरस्रग्वरकंचुकाननान्॥समभ्यवर्षन्भगवद्वशा घनाववुः समुद्रोम्यपगूढवायवः ॥ १५ ॥ मथ्यमाने तदा सिंधौ देवासुरवरूथपैः ॥ यदा सुधा न जायेत निर्ममंथाजितः स्वयम् ॥१६॥मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्धि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः ॥ जैत्रैर्दोर्भिर्जगदभयदैर्ददच्चुकं गृहीत्वा मथनन्मथना प्रतिगिरिरिवाशोभताथो धृताद्रिः ॥ १७ ॥ निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालहलाख्यमग्रतः ॥ संभ्रांतमीनोन्मकरादिकच्छपात्तिमिद्विपग्राहतिमिंगिलाकुलात् ॥ १८ ॥

नान् देवान् प्रति भगवद्वशाः मेघाः अभ्यवर्षन् शीतलवायुर्ववौ ॥ १५ ॥ एवं तैः प्रमथ्यमाने यदा सुधा न जाता तदा भगवान् स्वयं ममंथ ॥ १६ ॥ तदा मेघश्यामः पीतवासाः मालाधरो रक्तनेत्रो हरिर्दोर्भिर्वासुकिं गृहीत्वा मथनन् पर्वत इव शुशुभे ॥ १७ ॥ ततो मथ्यमानादुदधे र्हालाहलं विषं जातम् । तदा मीनमकरादयो व्याकुलाः अभवन् ॥ १८ ॥

१ आत्मनि देवदैत्ययोर्मध्ये । २ गोत्रे दार्ढ्यरूपेण नेत्रेऽभेद्यबोधरूपेण । ३ हरिणा । ४ सरलाः द्रुमविशेषाः । ५ कर्णयोर्विद्योतन्तौ विद्युत्कुण्डलौ यस्य सः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदुग्रवेगं विषं दिशिदिशि प्रसर्पद् दृष्ट्वा देवासुराःभीताःसंतः केनापि न रक्ष्यमाणाः शिवं शरणं जग्मुः ॥ १९॥ अद्रौ भवान्या सहितं दृष्ट्वा स्तुतिभिः प्रणेमुः ॥ २० ॥ प्रजापतय ऊचुः । हे देवदेव ! हे भूतभावन ! अस्मान् त्रैलोक्यदहनाद् विषात् शरणागतान् नः पाहि॥२१॥ हे ईश ! सर्वजगतो बंधमोक्षयोरीश्वरस्त्वमेक एव॥२२॥गुह्यं परं ब्रह्म त्वमेव । यदा सर्गादीन् कर्तुमिच्छसि तदा गुणमय्या स्वशक्त्या ब्रह्मविष्णुशिवाभि

तदुग्रवेगं दिशिदिश्युपर्यधो विसर्पदुत्सर्पदसह्यवीर्यम्॥ भीताः प्रजा दुद्रुवुरंग सेश्वराअरक्ष्यमाणाःशरणं सदाशिवम् ॥१९॥विलोक्य तं देववरं त्रिलोक्या भवाय देव्याऽभिमतं मुनीनाम्॥आसीनमद्रावपवर्गहेतोस्तपोजुषाणं स्तुतिभिः प्रणेमुः ॥ २० ॥ प्रजापतय ऊचुः ॥ देवदेव महादेव भूतात्मन्भूतभावन ॥ त्राहि नःशरणापन्नांस्त्रैलोक्यदहनाद्विषात् २१॥ त्वमेकः सर्वजगत ईश्वरो बंधमोक्षयोः ॥ तं त्वामर्चंति कुशलाः प्रपन्नार्तिहरं गुरुम् ॥ २२ ॥ गुणमय्या स्वशक्त्याऽस्य सर्गस्थित्यप्ययान्विभो ॥ धत्से यदा स्वदृक्भूमन्ब्रह्मविष्णुशिवाभिधाम् ॥२३ ॥ त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः ॥ नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः ॥ २४ ॥ त्वं शब्दयोनिर्जगदादिरात्माँ प्राणेंद्रियद्रव्यगुणस्वभावः ॥ कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्षरं यद्भिवृदाँमनंति ॥२५॥ अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवांघ्रिपंकजम् ॥ कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशम् ॥ २६ ॥ नाभिर्नभस्ते श्वसनं नभस्वान्सूर्यश्च चक्षूंषि जलं स्म रेतः ॥ परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवञ्छिरस्ते ॥ २७ ॥

धां धत्से ॥ २३ ॥ हे ईश ! त्वं परमं ब्रह्म ॥ २४॥ त्वं शब्दयोनिः । त्वं जगदादिः । त्वं कालः । त्वं क्रतुः ॥२५॥ हे भगवन् ! अग्निस्तव मुखम् । क्षितिः पादौ । कालो गतिः । दिशः कर्णौ । वरुणो जिह्वा ॥२६॥ नभो नाभिः । जलं रेतः । चद्रो मनः ॥२७॥

१ देवतिर्यगादिरूपभावनः । २ शब्दो वेदः । ३ महत्तत्त्वम्।४ अहंकारः।५ संकल्पः।६ यतः । ७ त्रिगुणात्मकं यदक्षरं प्रधानं तत् त्वदाश्रयमामनंतीति । ८ परेऽक्षरेऽत्र ये जीवास्तेषां माधारोऽहंकारः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समुद्राः कुक्षिः । पर्वताः अस्थीनि । ओषधयो रोमाणि । छंदांसि सप्त धातवः । सर्वधर्मो हृदयम् ॥२८॥ हे ईश ! उपनिषदस्ते मुखानि॥२९॥ गुणाः नेत्राणि ॥ ३० ॥ किंच ब्रह्मादिलोकपालानामपि तव ज्योतिरगम्यम् । कुतः यत्र सत्त्वादयो गुणाः न ॥ ३१ ॥ हे शिव ! मदनदक्षयज्ञ त्रिपुरादयो येऽनेकभूतद्रुहः तान् संहरतस्तव तच्चरितं स्तुतये न भवति ॥ ३२ ॥ य त्वामुमया सह चरंत तस्यामत्यतकामिनं श्मशान भ्रमत क्रूर

कुक्षिः समुद्रा गिरयोऽस्थिसंघा रोमाणि सर्वौषधिवीरुधस्ते ॥ छंदांसि साक्षात् तव सप्त धातवस्त्रयीमयात्मन् हृदयं सर्वधर्मः ॥२८॥ मुखानि पंचोपनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमंत्रवर्गः ॥ यत्तच्छिवाख्यं परमार्थतत्त्वं देवः स्वयं ज्योतिरवस्थितिस्ते ॥ २९ ॥ छाया त्वधर्मोर्मिषु यैर्विसर्गा नेत्रत्रयं सत्त्वरजस्तमांसि ॥ साक्षान्मनुः शास्त्रकृतस्तवेक्षा छंदोमयो देवऋषिः पुराणः ॥३०॥ न ते गिरित्राखिललोकपालविरिंचवैकुंठसुरेंद्रगम्यम् ॥ ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद् ब्रह्म निरस्तभेदम् ॥ ३१॥ कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत्ते॥यस्त्वं तकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिङ्गशिखया भसितं न वेद॥३२॥ये त्वात्मरामगुरुभिर्हृदि चिन्तितांघ्रिद्वंद्वं चरंत मुमया तपसाभितप्तम् ॥ कत्थंत उग्रपुरुषं निरतं श्मशाने ते नूनमूतिमविदंस्तव हातलज्जाः ॥३३॥ तत्तस्य ते सद सतोः परतः परस्य नांजः स्वरूपगमने प्रभवंति भूम्नः ॥ ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्गसर्गविषया अपि शक्तिमात्रम् ॥ ३४ ॥एतत्परं प्रपश्यामो न परं ते महेश्वर ॥ मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः ॥३५ ॥

हिंस्रं वदंति अतिमूर्खास्त्वां न विदुः ॥ ३३ ॥ ब्रह्मादयोऽपि तव स्वरूपज्ञानेऽसमर्थाः । स्तवने तु कुतः समर्थाः स्युः । तत्र वयं तत्सर्गसर्गाः कथं स्तुवीमः ॥ ३४ ॥ हे महेश्वर त्वत्तः परं न पश्यामः । इयं तव प्रकटता लोकस्य सुखाय । अतो नः पाहि ॥ ३५ ॥

१ वेदत्रयमूर्ते । २ तत्पुरुषाघोरसद्योजातवामदेवेशानरूपाः मंत्राः ।३ उपरतावस्था ।४ दंभलोभादिषु। ५ सत्त्वरजस्तमोभिः ।६ विविधस्सर्गः । ७ मनुर्वेदः।८ गरक्षपगस्यावश्यंभावित्वात् सिद्धवन्निर्देशः । ९ मस्मत्तोद्भूतम् । १० आत्मरामाश्च ते गुरवो विविधहेतोपदेष्टारस्तैः । ११ ऊर्ते लज्जाम् । १२ त्यक्तलज्जाः । १३ तथाप्यस्मत्कृतं स्तवनं शक्तिपरिमितमात्रम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ प्रजानां तद्दुःखं वीक्ष्य शिवो देवीं जगाद॥३६ ॥शिव उवाच ॥ हे भवानि ! कालकूटात् प्राप्तं प्रजानां दुःखं पश्य ॥ ३७ ॥ प्राणरक्षेप्सूनामासां मयाऽभयं विधेयं यद्दीनपरिपालनं स श्रेष्ठस्यार्थः ॥ ३८ ॥ साधवस्तु क्षणभंगुरैः स्वप्राणैर्जीवान् पांति ॥ ३९ ॥ हे भद्रे ! बद्धवैरेषु भूतेषु कृपां कुर्वतः पुंसो भगवान् प्रसन्नो भवति । तत्प्रसादे जगत् प्रसन्नं भवति ॥ ४० ॥ अतः इदं विषं भुंजे । मत्तः प्रजानां स्वस्त्यस्तु ॥ ४१ ॥ एवं देवीं पृष्ट्वा विषं जग्धुमारेभे सापि प्रभावज्ञाऽन्वमोदत । ततो विषं करतलीकृत्य॥४२॥शिवो भक्षयामास । ततो विषं तस्य

श्रीशुक उवाच॥तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः॥सर्वभूतसुहृद्देव इदमाह सतीं प्रियाम्॥३६॥शिव उवाच॥ अहो बत भवान्येतत् प्रजानां पश्य वैशसम्॥क्षीरोदमथनोद्भतात्कालकूटादुपस्थितम्॥ ३७ ॥ आसां प्राणपरीप्सूनां विधेयमभयं हि मे ॥ एतावान् हि प्रभोरर्थो यद्दीनपरिपालनम्॥३८॥ प्राणैः स्वैः प्राणिनः पांति साधवः क्षणभंगुरैः ॥ बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया॥३९॥पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः॥प्रीते हरौ भगवति प्रीयेऽहं सचराचरः॥तस्मादिदं गरं भुंजे प्रजानां स्वस्तिरस्तु मे॥४०॥श्रीशुक उवाच ॥ एवमामंत्र्य भगवान् भवानीं विश्वभावनः ॥ तद्विषं जग्धुमारेभे प्रभावज्ञाऽन्वमोदत ॥४१॥ततः करतलीकृत्य व्यापि हालाहलं विषम्॥अभक्षयन्महादेवः कृपया भूतभावनः॥ ४२ ॥ तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः ॥यच्चकार गले नीलं तच्च साधोर्विभूषणम्॥ ४३ ॥ तप्यंते लोकतापेन साधवः प्रायशो जनाः॥परमाराधनं तद्धि पुरुषस्याखिलात्मनः॥४४॥निशम्य कर्म तच्छंभोर्देवदेवस्य मीढुषः ॥प्रजा दाक्षायणी ब्रह्मा वैकुंठश्च शशंसिरे॥४५॥प्रस्कन्नं पिबतः पाणेर्यत्किंचिज्जगृहुः स्म तत् ॥ वृश्चिकाहिविषौषध्यो ददशूकाश्च ये परे॥४६॥इति श्रीभाग०म०अष्टम०अमृतमथने गरपानं नाम सप्तमोऽध्यायः ॥७ ॥

वीर्यं दर्शयामास ॥ ४३ ॥ तं गले नीलं चकार । तत् साधोर्विभूषणं जातम् । साधवो लोकतापेन तप्यंते ॥ ४४ ॥ तत् शंभोः कर्म निशम्य दाक्षायणी ब्रह्मा विष्णुश्च शशंसिरे ॥ ४५ ॥ विषं पिबतस्तस्य हस्तात् यद् गलितं तद् वृश्चिकसर्पविषौषध्यो ददशूकाश्च जगृहुः॥ ४६॥इति श्रीभागवते अष्टमस्कंधे चूर्णिकायां सप्तमोऽध्यायः ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टमे मथ्यमानेऽब्धौ लक्ष्म्या विष्णौ वृतेऽसुरैः ॥ धन्वंतरेर्हृते सोमे मोहिन्युद्भव ईर्यते ॥ १ ॥ श्रीशुक उवाच ॥ एवं शिवेन विषे पीते सति देवदैत्याः प्रीताः संतः पुनर्बलाद् ममन्थुः । ततः कामधेनुरभवत् ॥ १ ॥ तामृषयो यज्ञस्य मेध्याय हविषे जगृहुः ॥ २ ॥ ततः श्वेतः उच्चैश्श्रवोनामाश्वो जातः । तस्मिन् बलिः स्पृहां चक्रे प्रागेव हरिणा शिक्षितत्वादिंद्रो न ॥ ३ ॥ तत ऐरावतो नाम चतुर्दन्तयुक्तः श्वेतो गजो जातः । तमिंद्रो जगृहे ॥ ४ ॥ ततः कौस्तुभाख्यं रत्नम् । तस्मिन् हरिः स्पृहां चक्रे ॥ ५ ॥ ततः पारिजातः कल्पतरुरभवत् । स स्वर्गविभूषणं जातः ॥ ६ ॥ ततोऽप्सरसो जाताः ।

श्रीशुक उवाच ॥ पीते गरे वृषांकेण प्रीतास्तेऽमरदानवाः ॥ ममंथुस्तरसा सिंधुं हविर्धानी ततोऽभवत् ॥ १ ॥ तामग्निं होत्रीमृषयो जगृहुर्ब्रह्मवादिनः ॥ यज्ञस्य देवयानस्य मेध्याय हविषे नृप ॥ २ ॥ तत उच्चैश्श्रवा नाम हयोऽभूच्चंद्रपांडुरः ॥ तस्मिन्बलिः स्पृहां चक्रे नेन्द्र ईश्वरशिक्षया ॥ ३ ॥ तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः ॥ दंतैश्चतुर्भिः श्वेताद्रेर्हरन्भगवतो महिम् ॥ ४ ॥ कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः ॥ तस्मिन्हरिः स्पृहां चक्रे वक्षोऽलंकरणे मणौ ॥ ५ ॥ ततोऽभवत्पारिजातः सुरलोकविभूषणम् ॥ पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ॥ ६ ॥ ततश्चाप्सरसो जाता निष्ककंठ्यः सुवाससः ॥ रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ॥ ७ ॥ ततश्चाविरभूत्साक्षाच्छ्रीरमा भगवत्परा ॥ रंजयंती दिशः कांत्या विद्युत् सौदामनी यथा ॥ ८ ॥ तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः ॥ रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥ ९ ॥ तस्या आसनमानिन्ये महेंद्रो महदद्भुतम् ॥ मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुंभैर्जलं शुचि ॥ १० ॥ आभिषेचनिका भूमिराहरत्सकलौषधीः ॥ गावः पंच पवित्राणि वसन्तो मधुमाधवौ ॥ ११ ॥

ताः श्रेष्ठगत्यावलोकनादिभिः स्वर्गिणां रमण्यो जाताः ॥ ७ ॥ ततो भगवत्परा श्रीरमा जाता । सा स्वकांत्या दिशः प्राकाशयत् ॥ ८ ॥ तस्यां देवासुरमानवाः मोहिताः संतः स्पृहां चक्रुः ॥ ९ ॥ तस्यै इंद्रः आसनमानिन्ये ॥ मूर्तिमत्यो नद्यो हेमकुंभैर्जलमानिन्युः ॥ १० ॥ भूमिः सर्वौषधीः गावः पंचगव्यानि । वसंत फलपुष्पादि ॥ ११ ॥

१ भगवतः कैलासस्य महिमानम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषयोऽभिषेकं चक्रुः । गन्धर्वाः जगुः । नर्तक्यो ननृतुः ॥ १२ ॥ देवाः मृदंगशंखगोमुखवीणादीनवादयन् ॥ १३ ॥ दिग्गजाः पूर्णकलशैर्द्विजेरितैः सूक्तवाक्यैरभिषेकं चक्रुः ॥ १४ ॥ समुद्रः पीतकौशेयवाससी ददौ । वरुणो वैजयंतीं मालां ददौ ॥ १५ ॥ विश्वकर्मा विचित्रभूषणानि । सरस्वती हारम् । अजः पद्मम् । नागाः कुंडले ददुः ॥ १६ ॥ ततो रमा भ्रमरनादितां कमलमालां हस्ते गृहीत्वा सव्रीडहासं कुंडलादिकं च

ऋषयः कल्पयांचक्रुरभिषेकं यथाविधि ॥ जगुर्भद्राणि गंधर्वा नट्यश्च ननृतुर्जगुः ॥ १२ ॥ देवा मृदंगपणवमुरजानक गोमुखान् ॥ व्यनादयन् शंखवेणुवीणास्तुमुलनिस्स्वनान् ॥ १३ ॥ ततोऽभिषिषिचुदेवीं श्रियं पद्मकरां सतीम् ॥ दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः ॥ १४॥ समुद्रः पीतकौशेयवाससी समुपाहरत्॥वरुणः स्रजं वैजयंतीं मधुना मत्तषट्पदाम् ॥ १५ ॥ भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः ॥ हारं सरस्वती पद्ममजो नागाश्च कुंडले ॥ १६ ॥ ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्विरेफां परिगृह्य पाणिना ॥ चचाल वक्त्रं सुकपोलकुण्डलं सव्रीडहासं दधती सुशोभनम् ॥ १७ ॥ स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदनकुंकुमोक्षितम् ॥ ततस्ततो नूपुरवल्गुशिंजितैर्विसर्पती हैमलतेव सा बभौ ॥ १८ ॥ विलोकयंती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारि सद्गुणम् ॥ गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविंदत ॥ १९ ॥ नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न संगवर्जितम् ॥ कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतोव्यपाश्रयः ॥ २० ॥

दधती सती वक्त्रं चचाल ॥ १७ ॥ चंदनकेसरलेपितं स्तनद्वयं दधती कृशोदरी हेमलतेव बभौ ॥ १८ ॥ ततो देवासुरगंधर्वादिषु पतिमिच्छंती सद्गुणं कमपि नान्वविंदत ॥ १९ ॥ तदेवाह । येषु दुर्वासःप्रभृतिषु तपः तेषु क्रोधजयो न । यस्य शुक्रगुर्वादेर्ज्ञानं स संगवर्जितो न । कश्चित महान् ब्रह्मचंद्रादिः तस्य कामजयो न ॥ २० ॥

१ परापेक्षः इन्द्रादिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येषु परशुरामादिषु धर्मः तेषु भूतसौहृदं न । शिबिनृपादिषु त्यागः स मुक्तिकारणं न । कार्तवीर्यादेर्वीर्यं तत् कालवेगेन विध्वस्तं भवति॥२१॥ कश्चित् चिरायुर्मार्कंडेयादिः तस्य शीलमंगलं न । यत्रोभयमस्ति स शिवोऽमंगलः । कश्चित् सुमंगलः श्रीमुकुन्दः स मां नेच्छति ॥ २२ ॥ श्री शुक उवाच ॥ एवं सर्वेषु विचार्य निरपेक्षमपि सर्वगुणाश्रयं मुकुन्दं वव्रे ॥ २३ ॥ ततो हरेः स्कंधे कमलमालां निधाय तदनुग्रहं प्रतीक्षमाणा

धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणम् ॥ वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसंगवर्जितः ॥ २१॥क्वचिच्चिरायुर्न हि शीलमंगलं क्वचित्तदप्यस्ति न वेद्यमायुषः ॥ यत्रोभयं कुत्र च सोऽप्यमंगलः सुमंगलः कश्च न कांक्षते हि माम् ॥ २२ ॥ श्रीशुक उवाच ॥ एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजकाश्रयताऽगुणाश्रयम् ॥ वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् ॥ २३ ॥ तस्यांसदेश उशतीं नवकंजमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टाम् ॥ तस्थौ निधाय निकट तदुरः स्वधाम सव्रीडहासविकसन्नयनेन याता ॥ २४ ॥ तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः ॥ श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ॥ २५ ॥ शंखतूर्यमृदंगानां वादित्राणां पृथुः स्वनः ॥ देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत् ॥ २६ ॥ ब्रह्मरुद्रांगिरोमुख्याः सर्वे विश्वसृजो विभुम् ॥ ईडिरेऽवितथैर्मंत्रैस्तल्लिंगैः पुष्पवर्षिणः ॥ २७ ॥ श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः ॥ शीलादिगुणसंपन्ना लेभिरे निर्वृतिं पराम्॥ २८ ॥ निस्सत्त्वा लोलुपा राजन्निरुद्योगा गतत्रपाः ॥ यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ॥ २९ ॥

तूष्णीं तस्थ ,नवटे तस्थौ ॥ २४ ॥ भगवान् तस्याः स्ववक्षः स्थानं ददौ ॥ २५ ॥ तदा गायतां सस्त्रीणां शंखमृदंगभेर्यादिशब्दः प्रादुरभूत ॥ २६ ॥ पुष्पवर्षिणो ब्रह्मरुद्राद्याः विभोः स्तुतिं चक्रिरे ॥ २७ ॥ लक्ष्म्या विलोकिताः देवादयः सुखं प्रापुः ॥ २८ ॥ हे राजन् ! लक्ष्म्योपेक्षिताः दैत्याः दानवाः निस्सत्त्वा लोलुपाः निर्लज्जाः बभूवुः ॥ २९ ॥

१ सनकादिः । २ विष्णुप्रतिपादकैः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ वारुणी देवी कन्या कमललोचना आसीत् । तामसुराः जगृहुः ॥ ३० ॥ अथ मथ्यमानादुदधेरद्भुतः पुरुषः उदतिष्ठत् ॥ ३१ ॥ कथंभूत
सः । कमलनेत्रः श्यामः स्रग्वी ॥ ३२ ॥ पीतवासाः मणिकुंडलः कुंचितकेशांतः सिंहविक्रमः ॥ ३३ ॥ अमृतपूर्णकलशं बिभ्रत् ॥ ३४ ॥ आयुर्वे
दप्रवर्तको धन्वंतर्याख्यः । एतादृशं तममृतकलशं च दृष्ट्वाऽसुराः बलात् तं कलशमाहरन् । असुरैः कलशे नीयमाने सति ॥३५॥ ३६ ॥ खिन्नाः

अथासीद्वारिणी देवी कन्या कमललोचना ॥ असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥ ३० ॥ अथोदधेर्मथ्यमाना
त्काश्यपैरमृताार्थिभिः ॥ उदतिष्ठन्महाराज पुरुषः परमाद्भुतः॥ ३१॥ दीर्घपीवरदोर्दण्डः कंबुग्रीवोऽरुणेक्षणः॥श्यामल
स्तरुणः स्रग्वी सर्वाभरणभूषितः ॥३२॥पीतवासा महोरस्कः सुमृष्टमणिकुंडलः॥स्निग्धकुंचितकेशांतः सुभगः सिंह
विक्रमः ॥३३॥ अमृतापूर्णकलशं बिभ्रद्वलयभूषितः ॥ स वै भगवतः साक्षाद्विष्णोरंशांशसंभवः ॥ ३४॥ धन्वंतरिरि
तिख्यात आयुर्वेददृगिज्यभाक् ॥तमालोक्यासुराः सर्वे कलशं चामृताभृतम्॥३५॥लिप्संतः सर्ववस्तूनि कलश तर
साऽहरन् ॥ नीयमानेऽसुरैस्तस्मिन्कलशेऽमृतभाजने ॥३६॥विषण्णमनसो देवा हरिं शरणमाययुः ॥ इति तद्दैन्यमा
लोक्य भगवान् भृत्यकामकृत् ॥ मा खिद्यत मिथोऽथ वः साधयिष्ये स्वमायया॥ ३७ ॥ मिथः कलिरभूत्तेषां तदर्थे
तर्षचेतसाम् ॥ अहंपूर्वमहंपूर्वं न त्वं नत्वमिति प्रभो ॥ ३८॥देवाः स्वं भागमर्हंति ये तुल्यायासहेवतः ॥ सत्रयाग
इवैतस्मिन्नेष धर्मः सनातनः ॥ ३९ ॥ इति स्वान्प्रत्यषेधन्व दतेया जातमत्सराः ॥ दुबलाः प्रबलान् राजन् गृहीतक
लशान् मुहुः ॥ ४० ॥ एतस्मिन्नंतरे विष्णुःसर्वोपायविदीश्वरः ॥ योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ॥ ४१ ॥

देवाः हरिं शरणं ययुः । भगवान् तेषां दैन्यं विलोक्य दैत्यानां मिथः कलहोत्पादनेन मोहिनीरूपेण वोऽथ साधयिष्यामि यूयं मा खिद्यत इत्या
ह ॥३७॥ ततस्तेषाममृताथ मिथः कलहो जातः ॥ ३८ ॥ तत्र ये दुबलास्ते तुल्यप्रयत्नसाधकाः देवाः स्वभागमर्हंति । एष सनातनो धर्मः
इयुक्त्वा धृतकलशान् प्रबलान् प्रत्यषेधन् ॥ ३९ ॥ ४० ॥ एतस्मिन्नंतरे सर्वोपायविदीश्वरो योषिद्रूपं दधार ॥ ४१ ॥

१ यज्ञभागमोक्ता ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंभूतम् । उत्पलश्यामं सर्वावयवसुंदरं सुकपोलनासिकम् ॥ ४२ ॥ नवयौवननिर्वृत्तस्तनभारकृशोदरं चंचललोचनम् ॥ ४३॥ स्वकेशभारेण मालां बिभ्रत् सुग्रीवकंठाभरणं सुभुजांगदभूषितम् ॥ ४४ ॥ कटिसूत्रेण शोभितं लसच्चरणनूपुरम् ॥ ४५ ॥ भ्रूविक्षेपावलोकनैर्दैत्यानां चित्तेषु मुहुः काममुद्दीपयन् ॥ ४६ ॥ इति श्रीभाग० अष्टम० चू० अष्टमोऽध्यायः ॥ ८ ॥ नवमे मोहितैर्दैत्यैरर्पितेऽमृतभाजने । तद्वंचनेन देवेभ्योऽमृतं दत्तं तयेर्यते ॥ १ ॥ श्रीशुक उवाच ॥ अथ ते दैत्यास्त्यक्तसौहृदाः संतः पात्रं हरंत आयांतीं स्त्रियं ददृशुः ॥१॥ अहो अस्याः रूपम् अहो कांति प्रेक्षणीयोत्पलश्यामं सर्वावयसुंदरम् ॥ समानकर्णाभरणं सुकपोलोन्नसाननम् ॥ ४२ ॥ नवयौवननिर्वृत्तस्तनभारकृशोदरम् ॥ मुखामोदानुरक्तालिझंकारोद्विग्नलोचनम् ॥४३ ॥ बिभ्रत्स्वकेशभारेण मालामुत्फुल्लमल्लिकाम् ॥ सुग्रीवकंठाभरणं सुभुजांगदभूषितम् ॥ ४४ ॥ विरजांबरसंवीतनितंबद्वीपशोभया ॥ कांच्या प्रविलसद्दल्गुचलच्चरणनूपुरम् ॥ ॥ ४५ ॥ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः ॥ दैत्ययूथपचेतस्सु काममुद्दीपयन्मुहुः ॥ ४६॥ इति श्रीभागव० म० अष्टम० अमृतमथने मोहिनीरूपधारणं नाम अष्टमोऽध्यायः॥८॥ श्री शुक उवाच ॥ तेऽन्योन्यतोऽसुराः पात्रं हरतस्त्यक्तसौहृदाः ॥ क्षिपंतो दस्युधर्माण आयांतीं ददृशुः स्त्रियम् ॥ १ ॥ अहो रूपमहो धाम अहो अस्या नवं वयः ॥ इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः ॥ २ ॥का त्वं कंजपलाशाक्षि कुतो वा किं चिकीर्षसि ॥ कस्यासि वद वामोरु मथ्नंतीव मनांसि नः ॥ ३॥ न वयं त्वाऽमरैर्दैत्यैः सिद्धगंधर्वचारणैः ॥ नास्पृष्टपूर्वां जानीमो लोकेशैश्च कुतो नृभिः ॥ ४ ॥ नूनं त्वं विधिना सुभ्रूः प्रेषितासि शरीरिणाम् ॥ सर्वेंद्रियमनःप्रीतिं विधातुं सघृणेन किम् ॥५ ॥ सा त्वं नः स्पर्धमानानामेकवस्तुनि मानिनि ॥ ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे॥६॥ वयं कश्यपदायादा भ्रातरः कृतपौरुषाः ॥ विभजस्व यथान्यायं नैव भेदो यथा भवेत् ॥ ७ ॥

अहो नवं वयः इति वदंतो जातकामाः संतोऽभिद्रुत्य तां पप्रच्छुः ॥ २॥ हे कमलनेत्रे ! त्वं का कुतः आगता । किं चिकीर्षसि कस्यासि ॥३॥ वयं त्वां देवासुरगंधर्वसिद्धचारणादिभिरस्पृष्टपूर्वां जानीमः ॥ ४ ॥ हे सुभ्रूः ! विधिना नः सर्वेंद्रियमनःप्रीतिं कर्तुं प्रेषितासि किम् ॥ ५ ॥ सा त्वं शं विधत्स्व ॥६ ॥ वयं कश्यपपुत्राः इमे भ्रातरः । अतो नो भेदो यथा न भवेत् तथा सुधां विभजस्व ॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं दैत्यैः प्रार्थितो हरिः प्रहस्य प्राह॥८॥ श्रीभगवानुवाच। हे दैत्याः! यूयं कश्यपपुत्राः पुंश्चल्यां मयि कथमनुसृताः। पंडिताः कामिनीषु न विश्वसंति ॥९॥ हे दैत्याः! स्वैरिणीस्त्रीणां सालावृकाणां च सख्यानि न नित्यानि वदंति यतो नूतंनूतनं विचिन्वंति ॥१०॥ श्रीशुक उवाच॥ एवं दैत्यास्तस्याः नर्मवाक्यैर्मोहिताः संतो जहसुः तस्यै अमृतपात्रं च ददुः ॥११॥ ततो हरिरमृतपात्रं गृहीत्वा प्रहस्य जगाद। हे दैत्याः! मया

इत्युपामंत्रितो दैत्यैर्मायायोषिद्वपुर्हरिः॥ प्रहस्य रुचिरापांगैर्निरीक्षन्निदमब्रवीत्॥ ८॥ श्रीभगवानुवाच॥ कथं कश्य पदायादाः पुंश्चल्यां मयि संगताः॥ विश्वासं पंडितो जातु कामिनीषु न याति हि ॥९॥ सालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः॥ सख्यान्याहुरनित्यानि नूतंनूतनं विचिन्वताम्॥ १०॥ श्रीशुक उवाच॥ इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः॥ जहसुर्भावगंभीरं ददुश्चामृतभाजनम्॥ ११॥ ततो गृहीत्वाऽमृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा॥ यद्यभ्युपेत क च साध्वसाधु वा कृतं मया वो विभजे सुधामिमाम्॥ १२॥ इत्य भिव्याहृतं तस्या आकर्ण्यासुरपुंगवाः॥ अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत ॥१३॥ अथोपोष्य कृतस्नाना हुत्वा च हविषाऽनलम्॥ दत्त्वा गोविप्रभूतेभ्यः कृतस्वस्त्ययना द्विजैः ॥१४॥ यथोपजोषं वासांसि परिधायाऽहतानि ते॥ कुशेषु प्राविशन् सर्वे प्राग्ग्रेष्वभिभूषिताः॥ १५॥ प्राङ्मुखेषूपविष्टेषु सुरेषु दितिजेषु च॥ धूपामोदितशालायां जुष्टा यां माल्यदीपकैः ॥१६॥ तस्यां नरेंद्र करभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी॥ सा कूजती कनकनूपुर शिंजितेन कुंभस्तनी कलशपाणिरथाविवेश॥ १७॥

साधु वा असाधु वा कृतं यद्यंगीकुरुत तर्हि सुधां विभजे॥ १२॥ एवं तस्याः वाक्यं श्रुत्वा दैत्यास्तथेति तामनुमेनिरे॥ १३॥अथ ते सर्वे कृतस्नानाः उपोष्याऽग्निं हुत्वा द्विजादिभ्यो दानानि दत्त्वा ॥१४॥ शुद्धवासांसि धृत्वा पूर्वाग्रदर्भासनेषु प्राविशन्॥ १५॥ धूपदीपामोदितशालायां देवदैत्येषु पूर्वमुखस्थितेषु सत्सु ॥१६॥ तस्यां शालायां मदविह्वलाक्षी नूपुरैः शब्दं कुर्वती कुंभस्तनी सा मोहिनी कलशं गृहीत्वा प्रविवेश॥ १७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कनककुण्डलां श्रियः सखीं विगलितस्तनपट्टिकां तां दृष्ट्वा सर्वे मुमुहुः॥१८॥तदा हरिर्जात्या क्रूराणां तेषां सुधादानं सर्पाणां क्षीरमिव मत्वा तेभ्यः सुधां न व्यभजत् ॥१९॥ ततो देवदैत्यानां पृथक् पंक्तीः कृत्वा स्वस्वपंक्तिषु तानुपवेश्य ॥ २० ॥गृहीतकलशो हरिः प्रियवाक्यादिना तान् वंचयन् गमनैर्दूरस्थानपि देवान् जरामृत्युहरां सुधां पाययामास ॥ २१ ॥ ततो दैत्याः स्वकृतं समयं पालयंतस्तस्याः बहुमानेन बद्धा स्त्रीवा

ताँ श्रीसखीं कनककुंडलचारुकर्णनासाकपोलवदनां परदेवताख्याम्॥ संवीक्ष्य संमुमुहुरुत्स्मितवीक्षणेन देवासुरा विग लितस्तनपट्टिकां ताम् ॥१८ ॥ असुराणां सुधादानं सर्पाणामिव दुर्नयम् ॥ मत्वा जातिनृशंसानां न तां व्यभजद च्युतः ॥ १९ ॥ कल्पयित्वा पृथक् पंक्तीरुभयेषां जगत्पतिः ॥ तांश्चोपवेशयामास स्वेषुस्वेषु च पंक्तिषु ॥२०॥ दैत्यान् गृहीतकलशो वंचयन्नुपसंचरैः ॥ दूरस्थान् पाययामास जरामृत्युहरां सुधाम् ॥ २१ ॥ ते पालयंतः समयमसुराः स्वकृतं नृप ॥ तूष्णीमासन् कृतस्नेहाः स्त्रीविवादजुगुप्सया ॥ २२ ॥ तस्यां कृतातिप्रणयाः प्रणयापायकातराः ॥ बहु मानेन चाबद्धा नोचुः किंचन विप्रियम् ॥ २३ ॥ देवलिंगप्रतिच्छन्नः स्वर्भानुर्देवसंसदि ॥ प्रविष्टः सोममपिबच्चंद्रार्का भ्यां च सूचितः ॥ २४ ॥ चक्रेण क्षुरधारेण जहार पिबतः शिरः ॥ हरिस्तस्य कबंधस्तु सुधयाऽप्लावितोपतत् ॥२५॥ शिरस्त्वमरतां नीतमजो ग्रहमचीकॢपत् ॥ यस्तु पर्वणि चंद्रार्कावभिधावति वैरधीः ॥ २६ ॥ पीतप्रायेऽमृते देवैर्भग वाँल्लोकभावनः ॥ पश्यतामसुरेन्द्राणां स्वं रूपं जगृहे हरिः ॥२७॥ एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोपि फलेविकल्पाः ॥ तत्राऽमृतं सुरगणाः फलमंजसाऽऽपुर्यत्पादपंकजरजश्रयणान्न दैत्याः ॥ २८॥

दजुगुप्सया विप्रियं किंचिदपि नोचुः॥२२॥ २३॥ तदा राहुर्देवपंक्तौ चंद्रार्कयोर्मध्ये स्थितः सन् सुधां पपौ ॥ २४ ॥ चंद्रार्काभ्यां सूचितो हरि श्चक्रेण तच्छिरो जहार । तत्कबंधस्तु सुधयाऽस्पृष्टः पपात ॥ २५ ॥ शिरस्त्वमरतां नीतम् । हरिस्तं ग्रहं चकार । यः पर्वणि वैरेण चंद्रार्कौ प्रति धावति ॥ २६ ॥ एवं देवैरमृते पीते सुराणां पश्यतां सतां हरिः स्वस्वरूपं जगृहे ॥ २७ ॥ एवं देवासुराः श्रमे तुल्या अपि फले विकल्पं प्रापुः

१ फले विविधः कल्पः फलं केषांचिज्जात केषांचिन्नेति वैचित्र्यं येषां ते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे नृप ! देवाः यत्पादपंकजरजस्संश्रयादमृतं प्रापुः दैत्याः न ॥ २८ ॥ प्राणधनादिभिर्देहात्मजादिषु यत् क्रियते तद् व्यर्थं भवति । तैरेव प्राण धनादिभिरीश्वरोद्देशेन क्रियते तत् महाफलं भवति ॥ २९ ॥ इति श्रीभाग० अष्टम० चू०नवमोऽध्यायः ॥ ९ ॥ दशमे मत्सराद् दैत्यैरारब्धे तु मृधेऽसुरैः । दैत्यमायाविषण्णेषु देवेष्वाविर्बभौ हरिः ॥ १॥ तदेवममृतावाप्तिर्नाभक्तानामितीरितम् । भक्तमत्सरतः प्राणहानिः पुनरुदीर्यते ॥ २ ॥ श्रीशुक उवाच ॥ हे नृप ! दैतेयाः कर्मणि प्रयत्नशीलाः संतो भगवत्पराङ्मुखाः । अत एवामृतं नाविंदन् ॥ १ ॥ एवं भगवान् देवानां

यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्कृतं ॥ तैरेव सद्भवति यत्क्रियतेऽपृथक्कृत्सर्वस्य तद्भवति मूलनिषेचनं यत् ॥२९॥ इति श्रीभाग० म० अष्टम०अमृतमथने अमृतविभागो नाम नवमोऽध्यायः॥ ९ ॥ श्रीशुक उवाच ॥इति दानवदैतेया नाविन्दन्नमृतं नृप ॥ युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः ॥ १ ॥ साधयित्वाऽमृतं राजन्पाययित्वा स्वकान्सुरान् ॥ पश्यतां सर्वभूतानां ययौ गरुडवाहनः ॥ २ ॥ सपत्नानां परामृद्धिं दृष्ट्वा ते दितिनंदनाः ॥ अमृष्यमाणा उत्पेतुर्देवान्प्रत्युद्यतायुधाः ॥ ३ ॥ ततः सुरगणाः सर्वे सुधया पीतयैधिताः ॥ प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः ॥४॥ तत्र देवासुरो नाम रणः परमदारुणः ॥ रोधस्युदन्वतो राजंस्तुमुलो रोमहर्षणः ॥ ५ ॥ तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे ॥ समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ॥ ६ ॥ शंखतूर्यमृदंगानां भेरीडमरुणां महान् ॥ हस्त्यश्वरथपत्तीनां नदतां निस्स्वनोऽभवत् ॥ ७ ॥

कार्यं साधयित्वा गरुडे स्थित्वा ययौ॥ २ ॥ ततो देवानां परामृद्धिं दृष्ट्वा दैत्याः गृहीतायुधाः संतो युद्धार्थं ययुः ॥ ३ ॥ देवा अपि नारायणपदाश्रयाः सुधया वृद्धिं गताः शस्त्रैर्दैत्यान् प्रतियुयुधुः ॥ ४ ॥ तदा समुद्रतीरे देवासुरो नाम रोमहर्षणो दारुणः संग्रामोऽभवत् ॥ ५ ॥ तत्र तत्र रणे सपत्नाः अन्योन्यं प्राप्य जघ्नुः ॥ ६ ॥ शंखमृदंगडमरुभेर्यादीनां शब्दो जातः ॥ ७ ॥

१ शाखाभेदाश्रयत्वात् मूलनिषेचनवत् । २ ईश्वराश्रयत्वाद् ईश्वरस्य च सर्वानुगतत्वात् । ३ यन्मूलनिषेचनं तत्सर्वस्य स्कन्धशाखादेरपि भवति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ रथिनो रथिभिः पत्तयः पत्तिभिः ॥ ८ ॥ तथा केचिद् भटाः उष्ट्रगजसिंहऋक्षवानरैः ॥ ९ ॥ गृध्रकंकबकशरभमहिषगोवृषैः ॥ १० ॥ शिवा मूषकशशबस्तमृगहंससूकरैः ॥ ११ ॥ जलस्थलखगैः प्राणिभि. एतैर्वाहनैः सेनयोर्मध्येऽग्रतोऽग्रतस्ते विविशुः ॥ १२ ॥ तदा हे नृप ! चित्रध्व जपटश्वेतच्छत्रव्यजनचामरैः ॥ १३ ॥ उष्णीषकवचभूषणतीक्ष्णशस्त्रैः ॥ १४ ॥ देवदानववीराणां सैन्ये वीरमालाभिः रेजतुः ॥ १५ ॥ तत्र बलि

रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ॥ हया हयैरिभाश्चेभैः समसज्जंत संयुगे ॥८॥ उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः ॥ केचिद्गौरमृगैर्ऋक्षद्वीपिभिर्हरिभिर्भटाः ॥९॥ गृध्रैः कंकैर्बकैरन्ये श्येनभासैस्तिमिंगिलैः॥ शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ॥१०॥ शिवाभिराखुभिः केचित्कृकलासैः शशैर्नरैः ॥ बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ॥ ॥ ११ ॥ अन्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः ॥ सेनयोरुभयो राजन्विविशुस्तेऽग्रतोऽग्रतः॥ १२॥ चित्रध्वजपटै राजन्नातपत्रैः सितामलैः ॥ महाधनैर्वज्रदंष्ट्रैर्व्यजनैर्बार्हचामरैः ॥ १३ ॥ वातोद्धूतोत्तरोष्णीषैर्वर्चिर्भिर्वर्मभूषणैः॥स्फुर द्विविंशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः॥ १४ ॥देवदानववीराणां ध्वजिन्यौ पांडुनंदन ॥ रेजतुर्वीरमालाभिर्यादसामिव सागरौ ॥१५॥ वैरोचनो बलिः संख्ये सोऽसुराणां चमूपतिः॥ यानं वैहायसं नाम कामगं मयनिर्मितम् ॥१६॥सर्वसां ग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो ॥ अप्रतर्क्यमनिर्देश्यं दृश्यमानमदर्शनम्॥१७॥ आस्थितस्तद्विमानाग्र्यं सर्वानीका धिपवृतः ॥ बालव्यजनछत्राग्रे रेजे चंद्र इवोदये ॥१८॥ तस्यासन् सर्वतो यानैर्यूथानां पतयोऽसुराः ॥ नमुचिःशंबरो बाणो विप्रचित्तिरयोमुखः॥१९॥द्विमूर्धा कालनाभोऽथ प्रहेतिर्हेतिरिल्वलः॥शकुनिर्भूतसंतापोवज्रदंष्ट्रोविरोचनः॥२०॥

मयासुरनिर्मितं वैहायसं कामगम् ॥ १६ ॥ सर्वाश्चर्यमयम् ॥ १७ ॥ विमानमारुह्य दैत्यसैन्यैर्वेष्टितश्छत्रचामरैश्चंद्र इव रेजे ॥ १८ ॥तस्य सर्वतो वाहनैः सेनापतयो नमुचिः शंबरो बाणो विप्रचित्तिरयोमुखः ॥ १९ ॥ द्विमूर्धा कालनाभः प्रहेतिः हेतिः इल्वलः शकुनिः भूतसंतापो वज्रदंष्ट्रो विरोचनः ॥ २० ॥

१ यादसां मालाभिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हयग्रीवः शंकुशिराः कपिलः मेघदुंदुभिः तारकः चक्रदृक् शुंभः निशुंभः जंभः उत्कलः॥ २१॥अरिष्टः अरिष्टनेमिः मयः अन्ये पौलोमकालेय
निवातकवचादयः ॥ २२ ॥ एतेऽप्राप्तभागाः केवलं क्लेशभागिनो दैत्याः आसन् ॥ २३ ॥ तथा सिंहनादान् मुंचंतः शंखान् दध्मुः तदा शब्दान्
दृष्ट्वेंद्रः कुपितः सन् ॥ २४ ॥ ऐरावतमारूढः सूर्य इव रेजे ॥ २५ ॥ तस्य सर्वतो नानावाहनध्वजायुधाः वाय्वग्निवरुणादयो देवाः गणैः सहाऽऽ
सन् ॥ २६ ॥ तेऽन्योन्यं संसृत्य मर्मभिः क्षिपंतो मिथः आह्वयंतो द्वंद्वयोधिनो युयुधुः ॥२७॥तत्र बलिरिंद्रेण युयुधे।गुहस्तारकेण। वरुणो हेतिना

हयग्रीवः शंकुशिराः कपिलो मेघदुंदुभिः॥तारकश्चक्रदृक् शुंभो निशुंभो जंभ उत्कलः॥२१॥अरिष्टोऽरिष्टनेमिश्च म
यश्च त्रिपुराधिपः॥अन्ये पौलोमकालेया निवातकवचादयः ॥ २२ ॥ अलब्धभागाः सोमस्य केवलं क्लेशभागिनः॥
सर्व एते रणमुखे बहुशो निर्जिताऽमराः॥२३॥सिंहनादान् विमुंचंतःशंखान्दध्मुर्महास्वनान् ॥ दृष्ट्वा सपत्नानुत्सिक्तान्
बलभित्कुपितो भृशम्॥ २४॥ऐरावतं दिक्करिणमारूढः शुशुभे स्वराट्॥तथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः ॥ २५ ॥
तस्यासन्सर्वतो देवा नानावाहध्वजायुधाः ॥ लोकपालाः सहगणैर्वाय्वग्निवरुणादयः॥२६॥तेऽन्योन्यमभिसंसृत्य क्षि
पंतो मर्मभिर्मिथः ॥ आह्वयंतो विशंतोऽग्रे युयुधुर्द्वंद्वयोधिनः ॥ २७॥युयोध बलिरिन्द्रेण तारकेण गुहोऽस्यत॥वरुणो
हेतिनाऽयुध्यन्मित्रो राजन्प्रहेतिना॥२८॥यमस्तु कालनाभेन विश्वकर्मा मयेन वै॥ शबरो युयुधे त्वष्ट्रा सवित्रा तु विरो
चनः॥२९॥अपराजितेन नमुचिरश्विनौ वृषपर्वणा॥सूर्यो बलिसुतैर्देवो बाणज्येष्ठैश्शतेनच॥३०॥राहुणाच तथा सोमः
पुलोम्ना युयुधेऽनिलः॥ निशुंभशुंभयोर्देवी भद्रकाली तरस्विनी॥३१॥वृषाकपिस्तु जंभेन महिषेण विभावसुः॥ इल्वलः
सह वातापिर्ब्रह्मपुत्रैररिंदम॥३२॥कामदेवेन दुर्मर्ष उत्कलो मातृभिः सह॥बृहस्पतिश्चोशनसा नरकेण शनैश्चरः॥३३॥

मित्रः प्रहेतिना ॥ २८ ॥ यमः कालनाभेन । विश्वकर्मा मयेन । त्वष्टा शंबरेण । सविता विरोचनेन॥२९॥अपराजितो नमुचिना । अश्विनौ वृषप
र्वणा । सूर्यो बलेः पुत्रशतेन येषु ज्येष्ठो बाणः ॥ ३० ॥ सोमो राहुणा । वायुः पुलोम्ना । देवी निशुंभशुंभाभ्याम्॥३१॥वृषाकपिर्जंभेन। विभाव
सुर्महिषेण । इल्वलवातापी ब्रह्मपुत्रैः ॥ ३२ ॥ कामदेवेन दुर्मर्षः उत्कलो मातृभिः बृहस्पतिः शुक्रेण । नरकेण शनैश्चरः ॥ ३३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरुतो निवातकवचैः वसवः कालेयैः विश्वेदेवाः पौलोमैः रुद्राः क्रोधवशैर्युयुधुः ॥ ३४ ॥ ते एवं तीक्ष्णबाणासितोमरैर्मिथो निजघ्नुः ॥ ३५ ॥ भुशुंडिचक्रगदापट्टिशशक्तिज्वलत्काष्ठपरश्वधभल्लपरिघमुद्गरभिन्दिपालैः शिरांसि चिच्छिदुः॥३६॥गजाश्वरथपदातयः छिन्नबाहूरुशिरोधरांघ्रयो बभूवुः ॥ ३७ ॥ अपि च देवादीनां पादघातैः रथैश्च रणभूमेः रेणुः खं दिशः सूर्यं चाऽऽच्छादयत् ॥ ३८ ॥ तेषां किरीटकुंडलयुक्तैः शिरोभिः

मरुतो निवातकवचैः कालेयैर्वसवोऽमराः ॥ विश्वेदेवास्तु पौलोमैः रुद्राः क्रोधवशैः सह ॥ ३४ ॥ त एवमाजावसुराः सुरेंद्रा द्वंद्वेन संहत्य च युध्यमानाः ॥ अन्योन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशरासितोमरैः ॥ ३५ ॥ भुशुण्डिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि ॥ निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिंदिपालैश्च शिरांसि चिच्छिदुः ॥ ३६ ॥ गुजास्तुरंगाः सरथाः पदातयः सारोहवाहा विविधा विखंडिताः ॥निकृत्तबाहूरुशिरोधरांघ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ॥३७ ॥ तेषां पदाघातरथांगचूर्णितादायोधनादुल्बण उत्थितस्तदा ॥ रेणुर्दिशः खं द्युमणिं च छादयन् न्यवर्ततासृक्स्रुतिभिः परिप्लुतात् ॥३८ ॥ शिरोभिरुत्कृत्तकिरीटकुंडलैः संरंभदृग्भिः परिदष्टदच्छदैः ॥ महाभुजः साभरणैः सहायुधैः सा प्रास्तृता भूः करभोरुभिर्बभौ ॥३९ ॥ कबंधास्तत्र चोत्पेतुः पतितस्वशिरोक्षिभिः ॥ उद्यतायुधदोर्दंडैराधावंतो भटान्मृधे ॥ ४० ॥ बलिर्महेंद्रं दशभिस्त्रिभिरैरावतं शरैः ॥ चतुर्भिश्चतुरो वाहानेकेनारोहमार्च्छयत् ॥ ४१ ॥ स तानापततः शक्रस्तावद्भिः शीघ्रविक्रमः ॥ चिच्छेद निशितैर्भल्लैरसंप्राप्तान्हसन्निव॥४२॥ तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे ॥ तां ज्वलंतीं महोल्काभां हस्तस्थामच्छिनद्धरिः ॥ ४३ ॥

सायुधालंकारैर्हस्तैस्तथा वाहनानां च शिरोरुबाहुभिः प्रस्तृता रणभूर्बभौ॥३९॥तत्र पतितानि स्वशिरांसि तदक्षिभिः पश्यंतः कबंधाः धृतायुधाः भटान् प्रति युयुधिरे ॥ ४० ॥ ततो बलिर्दशभिः शरैरिंद्रं त्रिभिर्गजं चतुर्भिर्गजरक्षकानेकेन गजयंतारं विव्याध ॥ ४१ ॥ इंद्रः प्राप्तान् बाणान् शीघ्रं स्वबाणैश्चिच्छेद ॥ ४२ ॥ ततो बलिस्तस्य पराक्रमं वीक्ष्य शक्तिमाददे । ततः इंद्रो ज्वलंतीं हस्तस्थां तां चिच्छेद ॥ ४३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो बलिः शूलप्रासतोमरादि यद्यत् शस्त्रं जगृहे तत्तदिन्द्रश्चिच्छेद ॥ ४४ ॥ ततो बलिरंतर्धाय मायां ससर्ज । ततो देवसेनोपरि शैलः प्रादुरभूत ॥ ४५ ॥ ततो दह्यमानाः वृक्षाश्चूर्णयंत्यः शिलाः ॥ ४६ ॥ महोरगाः वृश्चिकाः सिंहव्याघ्रवराहादयः ॥४७॥ शतशो वस्त्रहीनाश्छिधि भिंधीति वादिन्यो यातुधान्यो रक्षोगणाश्चोत्पेतुः ॥ ४८ ॥ ततो मेघाः आकाशंगारान् मुमुचुः ॥ ४९ ॥ दैत्येन सृष्टो वह्निः प्रलयाग्निरिव सैन्यं

ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः ॥ यद्यच्छस्त्रं समादद्यात्सर्वं तदच्छिनद्विभुः ॥ ४४ ॥ ससर्जाथासुरीं मायामंत र्धानं गतोसुरः ॥ ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो॥४५॥ततो निपेतुस्तरवो दह्यमाना दवाग्निना ॥ शिलाः स टंकशिखराश्चूर्णयंत्यो द्विषद्बलम् ॥ ४६ ॥ महोरगाः समुत्पेतुर्दंदशूकाः सवृश्चिकाः ॥ सिंहव्याघ्रवराहाश्च मर्दयंतो म हागजान् ॥४७॥ यातुधान्यश्च शतशः शूलहस्ता विवाससः ॥ छिंधि भिंधीति वादिन्यस्तथा रक्षोगणाः प्रभो॥४८॥ ततो महाघना व्योम्नि गंभीरपरुषस्वनाः ॥ अंगारान्मुमुचुर्वातैराहताः स्तनयित्नवः ॥ ४९ ॥ सृष्टो दैत्येन सुमहान् वह्निः श्वसनसारथिः ॥सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक् ॥५०॥ ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत॥ प्रचंड वातैरुद्भूततरंगावर्तभीषणः॥५१॥एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः॥सृज्यमानासु मायासु विषेदुः सुरसैनिकाः॥५२॥ न तत्प्रतिविधिं यत्र विदुरिंद्रादयो नृप ॥ ध्यातः प्रादुरभूत्तत्र भगवान्विश्वभावनः ॥५३॥ ततः सुपर्णांसकृतांघ्रिपल्लवः पिशंगवासा नवकंजलोचनः ॥ अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुंडलः ॥ ५४ ॥ तस्मिन्प्रविष्टऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः॥स्वप्नो यथा हि प्रतिबोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणम् ॥ ५५ ॥

ददाह ॥ ५० ॥ समुद्रः सर्वतः प्रचंडवातैरुद्भूततरंगः उद्वेलोऽदृश्यत ॥ ५१ ॥ एवं दैत्यैः सृष्टासु मायासु देवाः खेदं प्रापुः ॥ ५२ ॥ ते तस्याः नाशोपायमजानंतो हरिं दध्युः ॥ ५३ ॥ ततो विश्वपालको हरिः पीतांबरधरः कमललोचनः किरीटकुंडलयुतः प्रादुरभूत् ॥ ५४ ॥ तदैवा सुरजाः मायाः विनेशुः । एवं हरेः स्तुतिः सर्वदुःखविमोक्षणी भवति ॥५५॥

१ महिम्ना ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा कालनेर्मियुद्धे गरुडारूढं हरिं दृष्ट्वा शूलं चिक्षेप । तद्गरुडमूर्ध्नि पेते । भगवान् तच्छूलं गृहीत्वा तेनैव सवाहनं शत्रुं जघान ॥ ५६ ॥ ततो माली सुमाली चक्रेण छिन्नमस्तको युधि पेततुः ॥ अथ माल्यवान् गदया गरुडं निहत्य हरिं हंतुं गदां जगृहे तावद् भगवान् तस्य शिरश्चक्रेण विच्छेद ॥ ५७ ॥ इति श्रीभाग० अष्टम० चू० दशमोऽध्यायः॥ १० ॥ एकादशे तु देवेषु दैत्यघातिषु नारद । देवानवारयच्छुक्रो मृतान् दैत्या नजीवयत् ॥ १ ॥ श्रीशुक उवाच ॥ अथ देवाः ईश्वरकृपया दैत्यान् निजघ्नुः॥ १॥ यदेंद्रो बलिं हंतु वज्रं जगृहे तदा प्रजाः हाहेति चुक्रुशुः॥ २॥

दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः ॥ तल्लीलया गरुडमूर्ध्नि पतदगृहीत्वा तेनाहन न्नृप सवाहमरिं व्यधीशः॥५६॥माली सुमाल्यतिबलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तम्॥ आहत्य तिग्मगदयाऽहनदंडजेन्द्रं तावच्छिरोच्छिनदरेर्नदतोऽरिणाऽऽद्यः॥५७॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे अमृ तदाने देवासुरयुद्धं नाम दशमोऽध्यायः ॥१०॥ श्रीशुक उवाच ॥ अथो सुराः प्रत्युपलब्धचेतसः परस्य पुंसः परयानु कंपया ॥ जघ्नुर्भृशं शक्रसमीरणादयस्ताँस्तान् रणे यैरभिसंहताः पुरा ॥१ ॥ वैरोचनाय संरब्धो भगवान् पाकशास नः ॥ उदयच्छद्यदा वज्रं प्रजा हाहेति चुक्रुशुः ॥२॥ वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरः स्थितम्॥मनस्विनं सुसंपन्नं विचरंतं महामृधे ॥ ३ ॥ नटवन्मूढ मायाभिर्मायेशान् नो जिगीषसि ॥ जित्वा बालान् निबद्धाक्षान् नटो हरति तद्ध नम् ॥ ४ ॥ आरुरुक्षंति मायाभिरुत्सिसृप्संति ये दिवम् ॥ तान् दस्यून् विधुनोम्यज्ञान् पूर्वस्माच्च पदादधः ॥ ५ ॥ सोहं दुर्मायिनस्तेऽद्य वज्रेण शतपर्वणा ॥ शिरो हरिष्ये मंदात्मन् घटस्व ज्ञातिभिः सह ॥ ६ ॥ बलिरुवाच ॥ संग्रामे वर्तमानानां कालचोदितकर्मणाम् ॥ कीर्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात् ॥ ७ ॥

युधि पुरः स्थितं बलिं तिरस्कृत्येंद्रः आह ॥ ३॥ हे मूढ ! मायाभिर्मायेशान् नो जेतुमिच्छसि यथा नटो बालान् जित्वा धनं हरति तद्व त ॥ ४ ॥ मायाभिर्ये स्वर्गमारोढुमिच्छंति तान् दस्यून् पूर्वपदादधः पातयामि ॥ ५ ॥ हे मंदात्मन् । अहं वज्रेणाद्य ते शिरो हरिष्ये । ज्ञातिभिः सह प्रत्यत्नं कुरु ॥ ६ ॥ बलिरुवाच । हे इन्द्रः युद्धे ! वर्तमानानां कीर्तिर्जयः पराजयो मृत्युर्वा क्रमात् स्यात् ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतत् सर्वं ज्ञानिनः कालाधीनं पश्यंति । एवं विवेके यूयमज्ञाः स्थ ॥ ८ ॥ अतः कीर्तिजयाजयं स्वस्वाधीनं मन्यमानानां भवतां वचो वयं न गृह्णीमः ॥ ९ ॥ श्रीशुक उवाच ॥ एवं वीरमर्दनो बलिरिंद्रं विनिंद्य बाणैरहन् ॥ १० ॥ एवं वैरिणा तिरस्कृतस्तद्वचो न सेहे ॥ ११ ॥ तत इंद्रस्तस्मै वज्रं प्राहरत् । तदा बलिः सहवाहनो भूमौ पपात ॥ १२ ॥ बलिं पतितं दृष्ट्वा तत्सखो जंभो हतस्यापि सख्युर्मित्रत्वं दर्शयन्

तमिदं कालरशनं जनाः पश्यंति सूरयः॥न हृष्यंति न शोचंति तत्र यूयमपंडिताः॥८ ॥न वयं मन्यमानानामात्मानं तत्र साधनम् ॥ गिरो वः साधुशोच्यानां गृह्णीमो मर्मताडनाः ॥९॥श्रीशुक उवाच ॥ इत्याक्षिप्य विभुं वीरो नाराचै वीरमर्दनः ॥आकर्णपूर्णैरहनदाक्षेपैराह तं पुनः॥१०॥एवं निराकृतो देवो वैरिणा तथ्यवादिना॥ नामृष्यत् तदधिक्षेपं तोत्राहत इव द्विपः॥११ ॥प्राहरत् कुलिशं तस्माअमोघं परमर्दनः॥सयानो न्यपतद् भूमौ छिन्नपक्षइवाचलः॥१२॥ सखायं पतितं दृष्ट्वा जंभो बलिसखः सुहृत् ॥ अभ्ययात् सौहृदं सख्युर्हतस्यापि समाचरन् ॥ १३॥स सिंहवाह आसाद्य गदामुद्यम्य रंहसा ॥ जत्रावताडयच्छक्रं गजं च सुमहाबलः ॥ १४ ॥ गदाप्रहारव्यथितो भृशं विह्वलितो गजः ॥ जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं ययौ ॥ १५ ॥ततो रथो मातलिना हरिभिर्दशशतैर्वृतः ॥ आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः ॥ १६ ॥ तस्य तत् पूजयन् कर्म यंतुर्दानवसत्तमः ॥ शूलेन ज्वलता तं तु स्मयमानो ऽहनन्मृधे ॥ १७ ॥ सेहे रुजं सुदुर्मर्षां सत्त्वमालंब्य मातलिः ॥ इन्द्रो जंभस्य संक्रुद्धो वज्रेणापाहरच्छिरः ॥ १८ ॥

॥१३ ॥ सिंहमारुह्य गदामुद्यम्य शक्रं जत्रौ गजं च ताडयामास ॥ १४ ॥ तदा गजो जानुभ्यां भुवं स्पृष्ट्वा दुःखं प्राप ॥ १५ ॥ ततो मातलिना सहस्राश्वैर्युतो रथः आनीतः । इन्द्रो गजं हित्वा रथमारुरोह ॥ १६ ॥ तदा यंतुः कर्म पूजयन् जंभः शूलेन मातलिं जघान ॥ १७ ॥ मातलिर्धैर्यं धृत्वा रुजं सेहे । ततः इंद्रः क्रुद्धः सन् वज्रेण जंभशिरो जहार ॥ १८ ॥

१ कीर्तिजयाजयौ । २ तोत्रमंकुशः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारदात् जंभं हतं श्रुत्वा नमुचिः १ बलः २ पाकः ३ इति त्रयस्त्वरान्विताः ययुः ॥ १९ ॥ ते त्रयो वचोभिरिंद्रमर्दयंतः शरैरवाकिरन् मेघाः धाराभिः पर्वतं यथा ॥ २० ॥ तत्र बलः सहस्रबाणैरिंद्राश्वानर्दयामास ॥ २१ ॥ पाको द्विशत्या सरथं मातलिनं जघान ॥ २२ ॥ नमुचिः पंचदशबाणैरिंद्रं विद्धा मेघ इव व्यनदत् ॥ २३ ॥ ततो दैत्याः सरथमिंद्रं सर्वतः शरैश्छादयामासुः ॥ २४ ॥ तदा देवाः इन्द्रमलक्षयंतो

जंभं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः ॥ नमुचिश्च बलः पाकस्तत्र पेतुस्त्वरान्विताः ॥ १९ ॥ वचोभिः परुषैरिंद्र मर्दयंतोऽस्य मर्मसु ॥ शरैरवाकिरन्मेघा धाराभिरिव पर्वतम् ॥ २० ॥ हरीन्दशशतान्याजौ हर्यश्वस्य बलः शरैः ॥ तावद्भिरर्दयामास युगपल्लघुहस्तवान् ॥ २१ ॥ शताभ्यां मातलिं पाको रथं सावयवं पृथक् ॥ सकृत्संधानमोक्षेण तदद्भुतमभूद्रणे ॥ २२ ॥ नमुचिः पंचदशभिः स्वर्णपुंखैर्महेषुभिः ॥ आहत्य व्यनदत्संख्ये सतोय इव तोयदः॥२३ ॥ सर्वतः शरकूटेन शक्रं सरथसारथिम् ॥ छादयामासुरसुराः प्रावृट्सूर्यमिवांबुदाः॥ २४॥ अलक्षयंतस्तमतीव विह्वला विचुक्रुशुर्देवगणाः सहानुगाः ॥ अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननवो[1] यथाऽर्णवे ॥ २५ ॥ ततस्तु राषाडिषुबद्धपंजराद्विनिर्गतः साश्वरथध्वजाग्रणीः ॥ बभौ दिशः खं पृथिवीं च रोचयन्स्वतेजसा सूर्य इव क्षपात्यये ॥ २६॥ निरीक्ष्य पृतनां देवः परैरभ्यर्दितां रणे ॥ उदयच्छद्रिपुं हंतुं वज्रं वज्रधरो रुषा ॥ २७ ॥ स तेनैवाष्टधारेण शिरसी बलपाकयोः ॥ ज्ञातीनां पश्यतां राजन्हार जनयन्भयम् ॥ २८ ॥ नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः ॥ जिघांसुरिंद्रं नृपते चकार परमोद्यमम् ॥ २९ ॥

विह्वलाः शत्रुबलेन निर्जिता विचुक्रुशुः ॥२५॥ततः इन्द्रः इषुबद्धपंजराद् निर्गतः स्वतेजसा दिशः प्रकाशयन् सूर्य इव बभौ ॥ २६ ॥ ततो दैत्यैरर्दितां सेनां निरीक्ष्य रिपुं हंतुं वज्रं गृहीत्वा ॥ २७ ॥ भयं जनयन् बलपाकयोः शिरसी इन्द्रो जहार ॥ २८ ॥ नमुचिस्तयोर्वधं दृष्ट्वा शोकक्रोधयुक्तः इन्द्रं हंतुम् ॥ २९ ॥

१ ।भिन्नावः । २ इन्द्रः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वर्णघंटाभिर्युक्तं शूलं प्रगृह्य हतोऽसीति वदन् प्राहिणोत् ॥ ३० ॥ तदाऽऽकाशात् पततं शूलं शरः सहस्रधा चिच्छेद । अथेन्द्रो रुषा वज्रेण तं कन्धरेऽहनत् ॥ ३१॥ तदा वज्रस्तस्य कवचमपि न बिभेद । तन्महदद्भुतम् ॥३२॥तदा शत्रोर्भीतः इंद्रः इदमाह । अहो लोकविमोहन मिदं किम् ॥ ३३ ॥ येन वज्रेण पूर्वं पर्वतपक्षाश्छिन्नाः ॥ ३४॥ वीर्याधिको वृत्रो मया येन नाशितः ॥ ३५ ॥ सोऽयं मे वज्रोऽल्पकेऽसुरे व्यर्थो

अश्मसारमयं शूलं घण्टावद्धेमभूषणम् ॥ प्रगृह्याभ्यद्रवत् क्रुद्धो हतोऽसीति वितर्जयन् ॥ प्राहिणोद्देवराजाय निनद न्मृगराडिव॥३०॥तदापतद्गगनतले महाजवं विचिच्छिदे हरिरिषुभिः सहस्रधा ॥तमाहनन्नृप कुलिशेन कन्धरे रुषा न्वितस्त्रिदशपतिः शिरोऽहरत् ॥ ३१॥ न तस्य हि त्वचमपि वज्र ऊर्जितो बिभेद यः सुरपतिनौजसेरितः ॥ तदद्भुतं परमतिवीर्यवृत्रभित् तिरस्कृतो नमुचिशिरोधरत्वचा॥३२॥ तस्मादिंद्रोऽबिभेच्छत्रोर्वज्रः प्रतिहतो यतः ॥ किमिदं दैवयोगेन भूतं लोकविमोहनम् ॥ ३३ ॥ येन मे पूर्वमद्रीणां पक्षच्छेदः प्रजात्यये ॥ कृतो निविशतां भारैः पतत्रः पततां भुवि ॥ ३४ ॥ तपःसारमयं त्वाष्ट्रं वृत्रो येन विपाटितः ॥ अन्ये चापि बलोपेताः सर्वास्त्रैरक्षतत्वचः ॥ ३५ ॥ सोऽयं प्रतिहतो वज्रो मया मुक्तोऽसुरेऽल्पके ॥ नाहं तदाददे दंडं ब्रह्मतेजोऽप्यकारणम् ॥ ३६॥ इति शक्रं विषीदन्त माह वागशरीरिणी ॥ नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः॥३७॥मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः ॥ अतोऽन्यश्चिंतनीयस्ते उपायो मघवन् रिपोः॥३८॥तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः ॥ ध्यायन्फेनमथापश्यदुपाय मुभयात्मकम् ॥३९॥ न शुष्केण न चार्द्रेण जहार नमुचेः शिरः ॥ तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन्विभुम्॥४०॥

जातः । तस्मात् वज्रं न धारयिष्ये । अहो दधीचेः सामर्थ्यमपि निष्फलं जातम् ॥ ३६ ॥ एवं खेदं कुर्वंतमाकाशवागाह । हे इंद्र ! अयं दैत्यः शुष्कैरार्द्रैश्च वधं नार्हति ॥ ३७ ॥ एवं मयाऽस्मै वरो दत्तः । अतो हे इन्द्र ! अन्यः उपायः कर्तव्यः ॥ ३८ ॥ इन्द्रस्तां गिरं श्रुत्वोभयात्मकमु पायमपां फेनं ज्ञात्वा ॥ ३९ ॥ तेन नमुचेः शिरो जहार । तदा मुनयः स्तुवन्तः पुष्पैरवाकिरन् ॥ ४० ॥

---

१ पक्षैः । २ सारमयं वीर्याधिकं त्वाष्ट्रं तप एव वृत्रः । यद्वाऽयं वज्रस्त्वाष्ट्रतपः सारम् । ३ दंडतुल्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वावसुपरावसू गंधर्वौ जगतुः । नर्तक्यो ननृतुः । देवदुन्दुभयो नेदुः॥४१॥ ततो वाय्वग्निवरुणादयोऽस्त्रौघैः प्रतिद्वंद्वान् दैत्यान् नाशयामासुः ॥ ४२ ॥ तदैव ब्रह्मणा प्रेषितो नारदः एत्य दैत्यानां क्षयं दृष्ट्वा देवान् वारयामास ॥४३ ॥ नारद उवाच ॥ हे देवाः ! नारायणभुजाश्रयैर्भवद्भिरमृतं प्राप्तम् । लक्ष्म्या च वृद्धिं गताः । अतो द्वेषाद्विरमत ॥ ४४ ॥ श्रीशुक उवाच । एवं मुनेर्वचो मानयन्तो देवाः अनुचरैर्जयं गीयमानाः स्वर्गं ययुः ॥४५॥ ततो युद्धे येऽवशिष्टाः दैत्यास्ते नारदानुमतेन विपन्नं बलिं गृहीत्वाऽस्तं गिरिमुपागमन् ॥ ४६ ॥ तत्र शुक्रोऽविनष्टावयवान्

गंधर्वमुख्यौ जगतुर्विश्वावसुपरावसू ॥ देवदुंदुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ॥ ४१ ॥ अन्येऽप्येवं प्रतिद्वंद्वान् वाय्वग्निवरुणादयः ॥ सूदयामासुरस्त्रौघैर्मृगान् केसरिणो यथा ॥ ४२ ॥ ब्रह्मणा प्रेषितो देवान् देवर्षिर्नारदो नृप ॥ वारयामास विबुधान् दृष्ट्वा दानवसंक्षयम् ॥४३ ॥ नारद उवाच ॥ भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः ॥ श्रिया समेधिताः सर्व उपारमत विग्रहात् ॥ ४४ ॥ श्रीशुक उवाच ॥ संयम्य मन्युसंरंभं मानयन्तो मुनेर्वचः ॥ गीयमाना अनुचरैर्ययुः सर्वे त्रिविष्टपम् ॥ ४५ ॥ येऽवशिष्टा रणे तस्मिन् नारदानुमतेन ते ॥ बलिं विपन्नमादाय अस्तं गिरिमुपागमन्॥४६॥ तत्राऽविनष्टावयवान् विद्यमानशिरोधरान् ॥ उशना जीवयामास संजीविन्या स्वविद्यया ॥ ४७ ॥ बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेंद्रियस्मृतिः ॥ पराजितोऽपि नाखिद्यल्लोकतत्त्वविचक्षणः ॥ ४८ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे देवासुरसंग्रामविश्रांतिर्नामैकादशोऽध्यायः ॥ ११ ॥ श्रीबादरायणिरुवाच ॥ वृषध्वजो[1] निशम्येदं योषिद्रूपेण दानवान् ॥ मोहयित्वाऽसुरगणान् हरिः सोममपाययत् ॥ १ ॥

तान् संजीविन्या विद्यया जीवयामास ॥ ४७ ॥ एवं शुक्रेण स्पर्शितो बलिः पुनः प्राप्तेंद्रियस्मृतिः पराजितो नाखिद्यत् ॥ ४८ ॥ इति श्रीभा० अष्टम० चू० एकादशोऽध्यायः ॥११ ॥ द्वादशे मोहिनीरूपविभ्रमालोकनोत्सुकम् । भवं संमोहयामास हरिः पुनरसांत्वयत् ॥१॥ अमुह्यन्नसुरा विष्णुमायया न तदद्भुतम् । इति वक्तुं महादेवमोहोऽयमुपवर्ण्यते ॥२॥ श्रीशुक उवाच॥ हरिः स्त्रीरूपेण दैत्यान् संमोह्य देवानमृतमपाययत्॥१॥

१ वृषध्वज इत्युत्तरेणान्वयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदं श्रुत्वा शिवो देव्या सह वृषमारुह्य यत्र हरिस्तत्र ययौ ॥ २ ॥ तदा भगवता सत्कृतः शिवः उपविष्टः सन् हरिं प्रति जगाद ॥ ३ ॥ शिव उवाच ॥ हे देवदेव ! हे जगदीश ! सर्वभावानां त्वं हेतुः ॥ ४ ॥ अस्य जगतः आद्यंतमध्याः यतो भवंति तच्चिद्रूपं ब्रह्मैव भवान् ॥५॥ मुनयः संगं त्यक्त्वा तवैव चरणांबुजमुपासते ॥ ६॥ हे हरे ! त्वं सुखरूपं नित्यमानंदमात्रं विशोकं ब्रह्म । किं च ब्रह्मव्यतिरिक्ताभावादपि त्वं निर

वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः ॥ सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः ॥ २ ॥ सभाजितो भगवता सादरं सोमया भवः ॥ सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन् हरिम् ॥ ३ ॥श्री महादेव उवाच ॥ देवदेव जगद्व्यापिञ्जगदीश जगन्मय ॥ सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वरः ॥ ४ ॥ आद्यंतावस्य यन्मध्यमिदमन्यदहं बहिः॥ यतोऽव्ययस्य नैतानि तत्सत्यं ब्रह्म चिद्भवान्॥ ५॥ तवैव चरणाम्भोजं श्रेयस्कामा निराशिषः ॥ विसृज्योभयतः संगं मुनयः समुपासते ॥ ६ ॥ त्वं ब्रह्म पूर्णममृतं विगुणं विशोकमानंदमात्रमविकारमनन्यमन्यत् ॥ विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयाऽनपेक्षः ॥ ७ ॥ एकस्त्वमेव सदसद्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः ॥ अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद्गुणैर्व्यतिकरो निरुपाधिकस्य ॥ ८ ॥ त्वां ब्रह्म केचिदवयंत्युत धर्ममेक एके परं सदसतोः पुरुषं परेशम् ॥ अन्येऽवयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतंत्रम् ॥ ॥ ९ ॥नाहं परायुर्ऋषयो न मरीचिमुख्या जानंति यद्विरचितं खलु सत्त्वसर्गाः ॥ यन्मायया मुषितचेतस ईशदैत्य मर्त्यादयः किमुत शश्वदभद्रवृत्ताः ॥ १० ॥

पेक्षः । अतः केवलं भक्तानुग्रहार्थमेव तवैश्वर्यं न स्वार्थम् ॥ ७ ॥ हे भगवन् ! कार्यकारणरूपं द्वयमद्वयं च त्वमेव ॥ ८ ॥ वेदांतिनस्त्वां ब्रह्म मन्यंते । मीमांसकास्त्वां धर्मं मन्यन्ते सांख्याः प्रकृतिपुरुषयोः परं पुमांसं मन्यन्ते पातंजला महापुरुषं मन्यंते ॥९ ॥ हे ईश ! त्वद्रचितं विश्वं ब्रह्ममरीच्यस्मदादयो न जानंति । अन्ये दैत्यमर्त्यादयः किमु ॥ १०॥

---

१ इदंकारास्पदं दृश्यमहंकारास्पदं द्रष्टृ बहिर्भोग्यमन्यद् भोक्तृ च। २ इहामुत्र च । ३ नित्यम् । ४ न विद्यतेन्यद्यस्मात्तदनन्यम् । ५ सर्वतो व्यतिरिक्तम् । ६ कृतं कुंडलादि अकृतं केवलम्।७भेदः ।

<विमल।१ उत्कर्षणी २ ज्ञाना ३ क्रिया ४ योगा ५ प्रह्वी ६ सत्या ७ ईशाना ८ अनुग्रहा ९ चेति नव शक्तयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे भगवन् ! जगतो बंधमोक्षौ स्थितिजन्मनाशाश्च संति । तत्सर्वं त्वं जानासि ॥ ११ ॥ एवं स्तुत्वा विज्ञापयति । हे भगवन् ! गुणै रममाणस्य तव मया बहवोऽवताराःदृष्टाः सोऽहं तव योषिद्रूपं द्रष्टुं वांछामि ॥ १२॥ येन दैत्याः मोहिताः देवाः अमृतं पायिताः तद्रूपं दर्शय । अत्यंतं ममाश्चर्यम् ॥ १३ ॥ श्रीशुक उवाच । एवं प्रार्थितो विष्णुः प्रहस्य शिवं बभाष ॥ १४ ॥ श्रीभगवानुवाच । हे शिव ! दैत्यानां कौतुकाया

स त्वं समीहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो भवबंधमोक्षौ ॥ वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मकतयाऽवगमोऽवरुत्से॥ ११ ॥ अवतारा मया दृष्टा रममाणस्य ते गुणैः ॥ सोऽहं तद्द्रष्टुमिच्छामि यत्ते योषिद्वपुर्धृतम् ॥ १२ ॥ येन संमोहिता दैत्याः पायिताश्चामृतं सुराः ॥ तद्विदृक्षव आयाताः परं कौतूहलं हि नः ॥ १३ ॥ श्रीशुक उवाच ॥ एवमभ्यर्थितो विष्णुर्भगवान्छूलपाणिना ॥ प्रहस्य भावगंभीरं गिरिशं प्रत्यभाषत ॥१४॥ श्रीभगवानुवाच ॥ कौतूहलाय दैत्यानांयोषिद्वेषो मया कृतः ॥ पश्यता सुरकार्याणि गते पीयूषभाजने ॥ १५ ॥ तत्तेऽहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम ॥ कामिनां बहु मंतव्यं संकल्पप्रभवोदयम् ॥ १६ ॥श्रीशुक उवाच ॥ इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत ॥ सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया ॥ १७ ॥ ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे ॥ विक्रीडतीं कंदुकलीलया लसद्दुकूलपर्यस्तनितंबमेखलाम्॥ १८ ॥आवर्तनोद्वर्तनकंपितस्तनप्रकृष्टहारोरुभरैः पदेपदे ॥ प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः॥ १९ ॥

मृतपात्रे गते सति देवकार्यार्थं स्त्रीवेषः कृतः ॥ १५ ॥ तद्रूपं ते दर्शयिष्यामि यतः कामिनां कामोदयो भवेत ॥ १६॥ श्री शुक उवाच ॥ इत्युक्त्वा तत्रैवांतरधीयत । ततः शिवः सर्वतश्चक्षुश्चारयन् देव्या सहाऽऽस्ते ॥ १७॥ अथ विचित्रपुष्पारुणपल्लवद्रुमे उपवने कंदुकलीलया क्रीडंतीम् ॥ १८ ॥ कंदुकलीलावशेन नमनोन्नमनाभ्यां कंपितस्तनयोः प्रकृष्टहाराणां च भारैः पदेपदे मध्यतः प्रभज्यमानामिव चलंतीम् ॥१९॥

१ समीहितं स्वकृतम् । २ संकल्पप्रभवः कामस्तस्योदयो यस्मात्तम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिक्षु भ्रमतः कंदुकचांचल्यैश्चंचललोचनां कर्णकुंडलशोभितां नीलकेशैर्मंडिताननाम् ॥ २० ॥ श्लथदुकूलां च्युतकबरीं वामहस्तेन बध्नतीमन्य करेण कंदुकं निघ्नतीं जगन्मोहयंतीम् ॥ २१ ॥ तां वीक्ष्य कटाक्षेण वंचितः शिवस्तत्प्रेक्षणेन विह्वलः सन् समीपस्थामुमां स्वगणांश्च न वेद ॥ २२॥ तस्याः करात् कंदुको यदा दूरं गतः तदा तमनुव्रजंत्यास्तस्याः कांचीसहितं सूक्ष्मवस्त्रं मारुतो जहार ॥ २३ ॥ एवं भवो मनोरमां

दिक्षुभ्रमत्कंदुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनाम् ॥ स्वकर्णविभ्राजितकुण्डलोल्लसत्कपोलनीलालकमंडिता ननाम् ॥२०॥ श्लथदुकूलां कबरां च विच्युतां सन्नह्यतीं वामकरेण वल्गुना ॥ विनिघ्नतीमन्यकरेण कंदुकं विमोहयंतीं जगदात्ममायया ॥२१॥ तां वीक्ष्य देव इति कंदुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः ॥ स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमंतिक उमां स्वगणांश्च वेद ॥२२॥ तस्याः कराग्रात् स तु कंदुको यदा गतो विदूरं तमनुव्रजत्स्त्रियाः ॥ वासः ससूत्रं लघु मारुतोऽहरद्भवस्य देवस्य किलानुपश्यतः ॥२३॥ एवं तां रुचिरापांगीं दर्शनीयां मनोरमाम् ॥ दृष्ट्वा तस्यां मनश्चक्रे विषज्जन्त्यां भवः किल ॥ २४ ॥ तयाऽपहृतविज्ञानस्तत्कृतस्मरविह्वलः ॥ भवान्या अपि पश्यंत्या गतह्रीस्तत्पदं ययौ ॥ २५ ॥ सा तमायांतमालोक्य विवस्त्रा व्रीडिता भृशम् ॥ निलीयमाना वृक्षेषु हसंती नान्वतिष्ठत॥२६॥ तामन्वगच्छद्भगवान्भवः प्रमुषितेंद्रियः॥कामस्य च वशं नीतः करेणुमिव यूथपः ॥ २७॥ सोऽनुव्रज्यातिवेगेन गृहीत्वाऽनिच्छतीं स्त्रियम् ॥ केशबन्ध उपानीय बाहुभ्यां परिषस्वजे ॥ २८ ॥ सोपगूढा भगवता करिणा करिणी यथा ॥ इतस्ततः प्रसर्पंती विप्रकीर्णशिरोरुहा ॥ २९ ॥

तां दृष्ट्वा तस्यां रंतुं मनश्चक्रे ॥ २४ ॥ ततस्तत्कृतस्मरविह्वलो देव्याः पश्यंत्याः गतह्रीस्तत्समीपं ययौ ॥ २५ ॥ तदा सा तं विलोक्य विवस्त्रा लज्जया वृक्षेषु विलीयमाना नान्वतिष्ठत् ॥ २६ ॥ कामवशं प्राप्तः शिवस्तामन्वगच्छत् ॥ २७ ॥ वेगेन तत्समीपं गत्वा तां केशबंधे गृहीत्वाऽऽलिंगनं चक्रे ॥ २८ ॥ आलिंगिता इतस्ततः प्रसपती विकर्णकेशा ॥ २९ ॥

१ स्त्रियाः प्रेक्षणं तया च प्रतिसमीक्षणं ताभ्याम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथुश्रोणी तद्भुजादात्मानं मोचयित्वा प्राद्रवत् ॥ ३० ॥ वैरिणेव कामेन जितो रुद्रो विष्णोः पदवीं प्रत्यपद्यत॥३१॥ तां धावतःशिवस्य रेतः पपात॥३२॥तद्रेतो भूमौ यत्रयत्र पपात तानि रूप्यस्य हेम्नश्च क्षेत्राणि जातानि॥३३॥एवं तां धावन् शिवः सरित्सरस्सु शैलेषु ऋषीणामाश्रमेषु च सन्निहितो बभूव ॥३४॥ रेतसि पतिते सति शिवः आत्मानं मायया जडीकृतं ददर्श । ततो मोहाद् न्यवर्तत ॥ ३५ ॥ एवं ज्ञातमाहात्म्यः

आत्मानं मोचयित्वांग सुरर्षभभुजांतरात् ॥ प्राद्रवत्सा पृथुश्रोणी माया देवविनिर्मिता ॥३०॥ तस्याऽसौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः॥प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः ॥३१॥ तस्यानुधावतो रेतश्चस्कंदामोघरेतसः ॥ शुष्मिणो यूथपस्येव वासितामनुधावतः ॥३२॥ यत्रयत्रापतन्मह्यां रेतस्तस्य महात्मनः ॥ तानि रूप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते ॥३३॥ सरित्सरस्सु शैलेषु वनेषूपवनेषु च ॥ यत्र क्व चासन्नृषयस्तत्र सन्निहितो हरः ॥३४॥ स्कन्ने रेतसि सोऽपश्यदात्मानं देवमायया ॥ जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलात्॥३५॥ अथावगतमाहात्म्य आत्मनो जगदात्मनः ॥ अपरिज्ञेयवीर्यस्य न मेने तदुहाद्भुतम्॥३६॥तमविक्लवमव्रीडमालक्ष्य मधुसूदनः ॥ उवाच परम प्रीतो बिभ्रत् स्वां पौरुषीं तनुम् ॥३७॥ श्रीभगवानुवाच॥ दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थितः॥ यन्मे स्त्रीरूपया स्वैव मोहितोऽप्यंग मायया ॥ ३८ ॥ को नु मेऽतितरेन्मायां विषक्तस्त्वदृते पुमान् ॥ तांस्तान्विसृजतीं भावान्दुस्तराम कृतात्मभिः ॥३९॥ सेयं गुणमयी माया न त्वामभिभविष्यति ॥ मया समेता कालेन कालरूपेण भागशः ॥ ४० ॥ श्रीशुक उवाच ॥ एवं भगवता राजन् श्रीवत्साङ्केन सत्कृतः ॥ आमंत्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥ ४१ ॥

शिवो विष्णोर्मायाजडीकरणमद्भुतं न मेने ॥ ३६ ॥ ततो भगवान् शिवं दृष्ट्वा स्वतनुं बिभ्रत् प्रीतः सन्नजगाद ॥ ३७ ॥ श्रीभगवानुवाच ॥ हे देव ! भाग्यमेतन्मया स्वमायया मोहितोऽपि त्वं स्वां प्रकृतिमास्थितः ॥ ३८ ॥ मम मायां त्वां विना को नु पुमान् व्यतितरेत् ॥ ३९ ॥ सेयं गुणमयी माया त्वां न पराजेष्यते ॥ ४० ॥ श्रीशुक उवाच ॥ एवं भगवता सत्कृतः शिवस्तमामंत्र्य परिक्रम्य कैलासं ययौ ॥ ४१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः शिवो भवानीं प्रति ऋषीणां मध्ये इदं सर्वमाह ॥ ४२ ॥ हे देवि ! त्वमपि भगवतो मायां दृष्टवत्यसि । अहं श्रेष्ठोऽपि यया विमुह्ये ।अन्ये
पराधीनाः किमुत ॥ ४३ ॥ किं च त्वं सहस्रवर्षानुष्ठानांते मां प्राप्य यमपृच्छः स एष पुरुषः यत्र कालो न विशते ॥ ४४ ॥श्रीशुक उवाच ॥
हे नृप ! येन समुद्रमथने मंदराचलः पृष्ठे धृतः तस्य विक्रमस्ते कथितः ॥ ४५ ॥ इदमुत्तमश्लोकगुणानुवर्णनं शृण्वतः कीर्तयतः पुंसः उद्यमो न
नश्यति ॥ ४६ ॥ एवं कपटस्त्रीवेषो हरिर्दैत्यान् मोहयन् सन् शरणागतान् देवानमृतमपाययत् तं कामपूरं नतोऽस्मि ॥ ४७ ॥ इति श्रीभागवते

आत्मांशभूतां तां मायां भवानीं भगवान्भवः ॥ शंसतामृषिमुख्यानां प्रीत्याचष्टाथ भारत ॥४२॥ अपि व्यपश्यस्त्व
मजस्य मायां परस्य पुंसः परदेवतायाः ॥ अहं कलानामृषभो विमुह्ये ययावशोऽन्ये किमुतास्वतंत्राः ॥४३॥यं माम
पृच्छस्त्वमुपेत्य योगात्समासहस्रांत उपारतं वै ॥ स एष साक्षात्पुरुषः पुराणो न यत्र कालो विशते न वेदः ॥ ४४ ॥
श्रीशुक उवाच ॥ इति तेऽभिहितस्तात विक्रमः शार्ङ्गधन्वनः ॥ सिंधोर्निमथने येन धृतः पृष्ठे महाचलः ॥४५ ॥एत
न्मुहुः कीर्तयतोऽनुशृण्वतो न रिष्यते जातुसमुद्यमः क्वचित्॥यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहम्॥
॥४६ ॥ असदविषयमंघ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यम् ॥कपटयुवतिवेषो मोहनं यः सुरारीं
स्तमहमुपसृतानां कामपूरं नतोऽस्मि॥४७ ॥इति श्रीभागवते महापुराणे अष्टमस्कन्धे शंकराय मोहिनीरूपप्रदर्शनं
नाम द्वादशोऽध्यायः ॥ १२ ॥ श्रीशुक उवाच ॥ मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ॥ सप्तमो वर्तमानोयस्तदप
त्यानि मे शृणु ॥ १ ॥ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च ॥ नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते ॥ २ ॥
करूषश्च पृषध्रश्च दशमो वसुमान्स्मृतः ॥ मनोर्वैवस्वतस्यैते दश पुत्राः परंतप ॥ ३ ॥

अष्टमस्कंधे चूर्णिकायां द्वादशोऽध्यायः ॥ १२ ॥ त्रयोदशे तु वर्ण्यंते सप्तमादीन्यनुक्रमात् ॥मन्वंतराणि सर्वाणि षड्विधानि पृथक्पृथक् ॥१॥
श्रीशुक उवाच ॥ अथ विवस्वतः पुत्रः श्राद्धदेवो वर्तमानः सप्तमो मनुः । अथ तत्पुत्रान् शृणु ॥ १ ॥ इक्ष्वाकुः१ नभगः २ धृष्टः ३ शर्यातिः
४ नरिष्यंतः ५ नाभागः ६ दिष्टः ७ ॥ २॥ करूषः ८ पृषध्रः ९ वसुमान् १० एते दश तत्पुत्राः अभवन् ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आदित्याः वसवो रुद्राः विश्वेदेवाः मरुद्गणाः अश्विनौ ऋभवः एते देवाः । एषां पुरंदरो नामेंद्रः ॥ ४ ॥ कश्यपः १ अत्रिः २ वसिष्ठः ३ विश्वा मित्रः ४ गौतमः ५ जमदग्निः ६ भरद्वाजः ७ एते सप्त ऋषयः ॥५॥ कश्यपाददित्यां वामनावतारः ॥६॥ एवं सप्त मन्वंतराणि संक्षेपेणोक्तानि भविष्याणि वक्ष्ये ॥ ७ ॥ विवस्वतो द्वे भार्ये—छाया संज्ञा चेति ॥८॥ तृतीया वडवा । यमः १ यमी २ श्राद्धदेवः ३ एते त्रयः संज्ञासुताः॥९॥

आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ अश्विनावृभवो राजन्निंद्रस्तेषां पुरंदरः॥४॥ कश्यपोऽत्रिर्वसिष्ठश्च विश्वा मित्रोऽथ गौतमः ॥ जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ॥ ५ ॥ अत्रापि भगवज्जन्म कश्यपाददितेरभूत् ॥ आदित्यानामवरजो विष्णुर्वामनरूपधृक् ॥ ६ ॥ संक्षेपतो मयोक्तानि सप्त मन्वंतराणि ते ॥भविष्याण्यथ वक्ष्यामिविष्णोः शक्त्यान्वितानि च ॥७॥ विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे ॥ संज्ञा छाया च राजेन्द्र ये प्रागभिहिते तव ॥८॥ तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः ॥ यमो यमी श्राद्धदेवश्छायायाश्च सुताञ्छृणु ॥ ९ ॥ सावर्णिस्तपती कन्या भार्या संवरणस्य या ॥ शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्मजौ ॥१० ॥ अष्टमेंतर आयाते सावर्णिर्भविता मनुः ॥ निर्मोकविरजस्काद्याः सावर्णितनया नृप ॥११ ॥ तत्र देवाः सुतपसो विरजा अमृतप्रभाः ॥तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति ॥ १२ ॥ दत्त्वेमां याचमानाय विष्णवे यः पदत्रयम् ॥ राज्यंमिंद्रपदं हित्वा ततः सिद्धिमवाप्स्यति ॥ १३ ॥ योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः ॥ निवेशितोऽधिकं स्वर्गादधुनाऽऽस्ते स्वराडिव ॥ १४ ॥

सावर्णिः १ तपती २ शनैश्चरः ३ एते त्रयश्छायासुताः।अश्विनौ वडवासुतौ ॥१०॥ अष्टमः सावर्णिर्नाम मनुर्भविष्यति । निर्मोकविरजस्काद्याः दश तत्पुत्राः ॥ ११ ॥ सुतपसो विरजाः अमृतप्रभाः एते देवाः । तेषां बलिरिन्द्रो भविष्यति ॥ १२ ॥ यः सप्तमो मन्वंतरे पदत्रयं याचमानाय विष्णवे भूमिं दत्त्वाऽष्टमे मन्वंतरे विष्णोः प्रसादेन प्राप्तमिंद्रपदं हित्वा ततो मोक्षं प्राप्स्यति॥१३॥ स संप्रति प्रीतेन भगवता सुतले आस्ते ॥१४॥

१ आहुरिति शेषः । २ लब्धम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गालवो दीप्तिमान् परशुरामोऽश्वत्थामा कृपाचार्यः ऋष्यशृंगो व्यासः ॥ १५ ॥ एते सप्त ऋषयस्तत्र भविष्यंति । इदानीं स्वेस्वे मंडले आसते ॥ १६ ॥ सरस्वत्यां सार्वभौम इति हरेरवतारः । स इंद्रात् स्वर्गं हृत्वा बलये दास्यति ॥ १७ ॥ अथ दक्षसावर्णिर्नवमो मनुः । भूतकेतुर्दीप्तिकेत्वादयो दश तत्पुत्राः ॥ १८ ॥ पारामरीचिगर्भाद्याः देवाः । अद्भुतो नामेन्द्रः ॥ द्युतिमत्प्रमुखाः सप्त ऋषयः ॥ १९ ॥ आयुष्मतोंबुधारायां पत्न्यामृषभावतारः येन रक्षितां त्रिलोकीमद्भुतनामेंद्रो भोक्ष्यति ॥ २० ॥ अथ ब्रह्मसावर्णिर्दशमो मनुः । भूरिषेणाद्याः दश तत्पुत्राः ॥ २१ ॥

गालवो दीप्तिमान्रामो द्रोणपुत्रः कृपस्तथा ॥ ऋष्यशृंगः पिताऽस्माकं भगवान्बादरायणः ॥१५॥ इमे सप्तर्षयस्तत्र भविष्यंति स्म योगतः ॥ इदानीमासते राजन्स्वेस्व आश्रममंडले ॥ १६॥ देवगुह्यात्सरस्वत्यां सार्वभौम इति प्रभुः ॥ स्थानं पुरंदराद्धत्वा बलये दास्यतीश्वरः ॥ १७ ॥ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः ॥ भूतकेतुर्दीप्तिकेतुरित्याद्यास्त त्सुता नृप ॥ १८ ॥ पारामरीचिगर्भाद्या देवा इंद्रोऽद्भुतः स्मृतः ॥ द्युतिमत्प्रमुखास्तत्र भविष्यंत्यृषयस्ततः ॥ १९ ॥ आयुष्मतोंबुधारायामृषभो भगवत्कला ॥ भविता येन संरक्षां त्रिलोकीं भोक्ष्यतेऽद्भुतः ॥ २० ॥ दशमो ब्रह्मसाव र्णिरुपश्लोकसुतो महान् ॥ तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ॥ २१ ॥ हविष्मन्सुकृतः सत्यो जयो मूर्ति स्तदा द्विजाः ॥ सुवासनविरुद्धाद्या देवाः शंभुः सुरेश्वरः ॥ २२ ॥ विष्वक्सेनो विषूच्यां तु शंभोः सख्यं करिष्यति ॥ जातः स्वांशेन भगवान् गृहे विश्वसृजो विभुः ॥ २३ ॥ मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् ॥ अनागतास्तत्सु ताश्च सत्यधर्मादयो दश ॥ २४॥ विहंगमाः कामगमा निर्वाणरुचयः सुराः ॥ इंद्रश्च वैधृतिस्तेषामृषयश्चारुणोदयः२५

हविष्मान् सुकृतः सत्यो जयो मूर्तिः एते ऋषयः। सुवासनविरुद्धाद्याः देवाः। शंभुर्नामेंद्रः॥२२॥विश्वसृजो विषूच्यां भार्यायां विष्वक्सेनावतारः। स शंभोः सख्यं करिष्यति ॥ २३ ॥ एकादशो मनुर्धर्मसावर्णिः । सत्यधर्मादयो दश तत्पुत्राः ॥ २४ ॥ विहंगमाः कामगमाः निर्वाणरुचयो देवाः वैधृतिर्नामेंद्रः । अरुणादयः सप्त ऋषयः ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आर्यकस्य वैधृतायां धर्मसेतुनामाऽवतारः । स त्रिलोकीं धारयिष्यति ॥२६॥ द्वादशो मनुः रुद्रसावर्णिः । देवश्रेष्ठादयो दश तत्पुत्राः ॥ २७ ॥ ऋतधामेंद्रः । हरितादयो देवाः । अग्नीध्रकादयः सप्त ऋषयः ॥ २८ ॥ सत्यसहसः सूनृतायां स्वधामाख्यो हरेरवतारः ॥ २९ ॥ अथ देवसावर्णिस्त्रयोदशो मनुः । चित्रसेनविचित्राद्या दश तत्पुत्राः ॥ ३० ॥ सुकर्मसुत्रामसंज्ञाः देवाः । दिवस्पतिर्नामेंद्रः । निर्मोकतत्त्वदर्शाद्याः सप्त ऋषयो भविष्यंति ॥ ३१ ॥ देवहोत्रस्य बृहत्यां भार्यायां योगेश्वरो नामावतारः ॥ ३२ ॥ चतुर्दशो मनुरिंद्रसावर्णिः । उरुगंभीरबुद्ध्याद्याः

आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः ॥ वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति॥२६॥ भविता रुद्रसावर्णो राजन् द्वादशमो मनुः ॥ देववानुपदेवश्च देवश्रेष्ठादयः सुताः ॥ २७ ॥ ऋतधामा च तत्रेंद्रो देवाश्च हरितादयः ॥ ऋषयश्च तपोमूर्तिस्तपस्व्याग्नीध्रकादयः ॥२८॥ स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः ॥ अंतरं सत्यसहसः सूनृतायाः सुतो विभुः ॥ २९ ॥ मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान् ॥ चित्रसेनविचित्राद्या देवसावर्णिदेहजाः ॥ ३० ॥ देवाः सुकर्मसुत्रामसंज्ञा इंद्रो दिवस्पतिः ॥ निर्मोकतत्त्वदर्शाद्या भविष्यंत्यृषयस्तदा ॥ ३१ ॥ देवहोत्रस्य तनय उप हर्ता दिवस्पतेः ॥ योगेश्वरो हरेरंशो बृहत्यां संभविष्यति ॥ ३२ ॥ मनुर्वा इंद्रसावर्णिश्चतुर्दशम एष्यति ॥ उरुगंभीर बुद्ध्याद्या इंद्रसावर्णिवीर्यजाः ॥३३॥ पवित्राश्चाक्षुषा देवाः शुचिरिंद्रो भविष्यति ॥ अग्निर्बाहुः शुचिः शुद्धो मागधाद्यास्तपस्विनः ॥ ३४ ॥ सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः ॥ वितानायां महाराज क्रियातंतून्वितायिता ॥३५॥ राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते ॥ प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ॥ ३६ ॥ इति श्रीभागवते महा पुराणेऽष्टमस्कंधे मन्वंतरानुवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

दश तत्पुत्राः ॥३३ ॥ पवित्राश्चाक्षुषाः देवाः । शुचिर्नामेंद्रः ॥ अग्निर्बाहुः शुचिः शुद्धो मागधाद्याः सप्त ऋषयः ॥ ३४ ॥ सत्रायणस्य वितानायां बृहद्भानुनामाऽवतारः स कर्ममार्गं विस्तारयिष्यति ॥ ३५ ॥ हे राजन् ! एतानि मन्वंतराणि । एतैश्चतुर्दशभिर्युगसहस्रप्रमाणः कल्पो मितः ॥ ३६ ॥ इति श्रीभागवते अष्टम० चू० त्रयोदशोऽध्यायः ॥ १३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्दशे तु सर्वेषां मन्वादीनां यथायथम् ॥ पृथक् कर्माणि वर्ण्यंते भगवद्भशवार्तिनाम् ॥ १ ॥ राजोवाच ॥ हे ब्रह्मन् ! मन्वतरेषु मन्वादयो य स्मिन् कर्मणि येन नियुक्ताः संतो यत् कुर्वंति तद् वद ॥ १ ॥ श्रीशुक उवाच ॥ मनवो मनुपुत्राः ऋषयो इंद्राः देवगणाः एते सर्वे ॥ २ ॥ यज्ञा वतारा: प्रेरिताः संतो जगद्यात्रां नयंति ॥ ३॥ तेषां कर्माण्याह । चतुर्युगांते कालेन ग्रस्तान् वेदान् ऋषयस्तपसाऽपश्यन् ॥ ४ ॥ततो मनवश्च तुष्पादं धर्मं भूमौ प्रवर्तयंति ॥ ५ ॥ मनुपुत्रास्तं धर्मं पालयंति देवाः यज्ञभागान् भुंजते ॥ ६ ॥इंद्रो भगवद्दत्तां श्रियं भुञ्जानः सन्न त्रिलोकान्

राजोवाच ॥ मन्वंतरेषु भगवान् यथा मन्वादयस्त्विमे ॥ यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व मे ॥ १ ॥ ऋषि रुवाच ॥ मनवो मनुपुत्राश्च मुनयश्च महीपते ॥ इन्द्राः सुरगणाश्चैव सर्वे पुरुषशासनाः ॥ २ ॥ यज्ञादयो याः क थिताः पौरुष्यस्तनवो नृप ॥ मन्वादयो जगद्यात्रां नयंत्याभिः प्रचोदिताः ॥ ३ ॥ चतुर्युगांते कालेन ग्रस्ताञ्श्रुतिग णान्यथा ॥ तपसा ऋषयोऽपश्यन्ततो धर्मः सनातनः ॥ ४ ॥ ततो धर्मं चतुष्पादं मनवो हरिणोदिताः ॥युक्ताः संचा रयंत्यद्धा स्वेस्वे काले महीं नृपाः ॥ ५ ॥ पालयंति प्रजापाला यावदंतं विभागशः ॥ यज्ञभागभुजो देवा ये च तत्रा न्विताश्च तैः ॥ ६ ॥ इन्द्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जिताम् ॥ भुंजानः पाति लोकांस्त्रीन्कामं लोके प्रवर्षति ॥७ ॥ ज्ञानं चानुयुगं ब्रूते हरि : सिद्धस्वरूपधृक् ॥ ऋषिरूपधरः कर्मयोगं योगेशरूपधृक् ॥ ८॥ सर्गं प्रजेशरूपेण दस्यून्हन्यात्स्वराडिवपुः ॥ कालरूपेण सर्वेषामभावाय पृथग्गुणः ॥ ९ ॥ स्तूयमानो जनैरेभिर्मायया नामरूपया ॥ विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते ॥ १० ॥

पाति लोके प्रवर्षति ॥ ७ ॥ सनकादिसिद्धरूपधृक् हरिरनुयुगं ज्ञानं ब्रूते याज्ञवल्क्यादिऋषिरूपधरो हरिः कर्म ब्रूते । दत्तात्रेयादियोगेशरूप धृक् हरिर्योगं ब्रूते ॥ ८ ॥ मरीच्यादिप्रजापतिरूपेण हरिः सर्गं करोति । राजमूर्तिः सन् दस्यून् हन्यात् । कालरूपेण सर्वेषां नाशाय भवति ॥ ९ ॥ मायया मोहितजनैर्नानाशास्त्रैः स्तूयमानोऽपि हरिर्नैव दृश्यते ॥ ॥ १० ॥

---

१ संयताः । २ पृथग्विधाः गुणाः शीतोष्णादयो यस्य सः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदवांतरकल्पस्य प्रमाणं तुभ्यं कथितम् । यत्र चतुर्दश मन्वंतराणि वदंति ॥११॥ इति श्रीमद्भाग० अष्टम० चू० चतुर्दशोऽध्यायः॥१४॥बलिं पंचदशे विश्वजिदाचार्य अयाजयत् ॥ ततोऽसौ स्वर्गमगमद् भयाद्देवा निलिल्यिरे ॥ १ ॥ अत्रेर्यते नवाध्याय्या वामं वामनचेष्टितम्॥ निग्रहाच्छलतो यत्र बलेर्भूयादनुग्रहः ॥२॥ राजोवाच ॥ ईश्वरः कृपणवद् भूत्वा बलेः सकाशाद् भूमेः पदत्रयं कस्मात् ययाचे । लब्धार्थोऽपि हरिर्नागसं तं कस्माद् बबन्ध॥१॥एतत् कौतुकं ज्ञातुमिच्छामः॥२॥श्रीशुक उवाच ॥हे राजन्! युद्धे इंद्रेण पराजितो बलिर्भृगुभिर्जीवितः सन् पश्चात्

एतत्कल्पविकल्पस्य प्रमाणं परिकीर्तितम् ॥ यत्र मन्वंतराण्याहुश्चतुर्दश पुराविदः॥११॥इति श्रीभागव० म० अष्ट० सप्तमादिमन्वन्तराद्यनुवर्णनं नाम चतुर्दशोऽध्यायः॥ १४ ॥ राजोवाच ॥ बलेः पदत्रयं भूमेः कस्माद् हरिरयाचत ॥ भूतेश्वरः कृपणवल्लब्धार्थोऽपि बबंध तम्॥१॥एतद्वेदितुमिच्छामो महत्कौतूहलं हि नः ॥ यज्ञेश्वरस्य पूर्णस्य बंधनं चाप्यनागसः ॥२॥ श्रीशुक उवाच ॥ पराजितश्रीरसुभिश्च हापितो हींद्रेण राजन् भृगुभिः स जीवितः ॥ सर्वात्मना तानभजद्भृगून् बलिः शिष्यो महात्माऽर्थनिवेदनेन ॥३॥ तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन्विश्वजिता त्रिनाकम् ॥ जिगीषमाणं विधिनाऽभिषिच्य महाभिषेकेण महानुभावाः॥४॥ततो रथः कांचनपट्टनद्धो हयाश्च हर्यश्वतुरंगवर्णाः ॥ ध्वजश्च सिंहेन विराजमानो हुताशनादास हविर्भिरिष्टात्॥५॥ धनुश्चदिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यम् ॥ पितामहस्तस्य ददौ च मालामम्लानपुष्पां जलजं च शुक्रः ॥ ६ ॥ एवं स विप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोऽथ विप्रान् ॥ प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामंत्र्य नमश्चकार ॥ ७ ॥

तान् भृग्वादीन् सर्वात्मनाऽसेवयत्॥३॥ततः प्रसन्नः भृगवोब्राह्मणाः स्वर्गं जेतुमिच्छंतं तं बलिं विश्वचिताख्ययज्ञेनाऽयाजयन्॥४॥ततोहविर्भिर्हूयमानेसति हुताशनात् सुवर्णपट्टबद्धोरथः इंद्राश्ववदश्वः सिंहचिह्नितध्वजः॥५॥दिव्यं धनुः अक्षय्यबाणौतूणौ कवचं च प्रादुर्बभूव। अथप्रह्लादस्तस्मै अम्लानपुष्पां मालां शुक्रः शंखं च ददौ॥६॥एवं विप्रैः संपादितयुद्धसाहित्योबलिस्तान् प्रदक्षिणीकृत्य प्रणम्य प्रह्लादंस्पृष्ट्वा नमश्चकार॥७॥

१ भृगुवंश्यैः । २ निवेदनेनार्पणेन ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो महारथो बलिः शस्त्राऽलंकारादिकं धृत्वा भृगुदत्तं रथमारुह्य कुंडस्थोऽग्निरिव शुशुभे॥८॥९॥अथ तुल्यैश्वर्यबलश्रीभिर्दग्भिः खं पिबद्भिर्दैत्य यूथपैर्वृतः सन्॥ १० ॥ महतीमासुरीं सेनां विकर्षन् समृद्धामिंद्रपुरीं ययौ ॥११॥ कथंभूतां ताम् ।उपवनोद्यानैः रम्यां मत्तभ्रमरविहंगैर्नादिताम् ॥ १२ ॥ फलपुष्पोरुभारेण नम्रशाखाद्रुमः शोभिताम् ॥ १३ ॥ आकाशगंगया वेष्टिताम् अग्निवर्णेन प्राकारेण च वृताम्॥१४॥विभक्तराजमार्गां

अथारुह्य रथं दिव्यं भृगुदत्तं महारथः ॥ सुस्रग्धरोऽथ सन्नह्य धन्वी खड्गी धृतेषुधिः ॥८॥ हेमांगदलसद्बाहुः स्फुरन्म करकुण्डलः ॥ रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ॥९॥ तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः ॥ पिबद्भिरिव खं दृग्भिर्दहद्भिः परिधीनिव ॥ १० ॥ वृतो विकर्षन्महतीमासुरीं ध्वजिनीं विभुः ॥ ययाविंद्रपुरीं स्वृद्धां कंपयन्निव रोदसी ॥ ११ ॥ रम्यामुपवनोद्यानैः श्रीमद्भिर्नंदनादिभिः ॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः ॥ १२ ॥ प्रवालफल पुष्पोरुभारशाखामरद्रुमैः ॥ हंससारसचक्राह्वकारंडवकुलाकुलाः ॥ नलिन्यो यत्र क्रीडंति प्रमदाः सुरसेविताः॥१३॥ आकाशगंगया देव्या वृतां परिखभूतया ॥ प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च ॥ १४ ॥ रुक्मपट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः ॥ जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मिताम् ॥ १५ ॥ सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युताम् ॥ शृङ्गाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः॥१६॥यत्र नित्यवयोरूपाः श्यामा विरजवाससः ॥ भ्राजंते रूपवन्नार्यो ह्यर्चिर्भिरिव वह्नयः ॥ १७ ॥ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्रजाम् ॥ यत्रामोदमुपादाय मार्ग आवाति मारुतः ॥ १८ ॥ हेम जालाक्षनिगच्छद्भूमेनागुरुगन्धिना ॥ पांडुरेण प्रतिच्छन्नमार्गे यांति सुरप्रियाः ॥ १९ ॥

स्फटिकपुरद्वारैर्जुष्टाम् ॥१५॥ सभाचत्वररथ्याढ्यां दशकोटिविमानैर्युताम् ॥१६॥यस्यां स्वलंकृताः निर्मलवाससो नार्यः शोभंते ताम्॥१७॥यत्र देवस्त्रीकेशेभ्यः पतितानां मालानां गंधमादाय मार्गे वायुर्वाति ताम्॥१८॥ यत्र हेमजालेभ्यो निर्गतसुगंधधूमेन प्रतिच्छन्नमार्गेऽप्सरसो यांति॥१९॥

१ अट्टालं प्राकारोपरि रचितं युद्धस्थानम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुक्तावितानैर्मणिसुवर्णमयैर्ध्वजैश्च व्याप्ताम् ॥ २० ॥ मृदंगशंखादिशब्दैर्गंधर्वाप्सरसां गीतनृत्यैश्च मनोरमाम् ॥ २१ ॥ यां खलाः भूतद्रुहादयश्च न व्रजंति ॥ २२ ॥ तां देवराजधानीं गत्वा सेनया रुरुधे । ततो भृगुदत्तं शंखं स्त्रीणां भयं जनयन् संदध्मौ ॥२३॥ अथेन्द्रो बलेरुद्योगं ज्ञात्वा सर्वदेवगणैर्युतो गुरुं जगाद ॥ २४ ॥ हे भगवन् ! पूर्ववैरिणो बलेर्भूयः उद्यमः । अतः इममविषह्यं मन्ये ॥२५॥ अयं मुखेन खं पिबन्निव प्रलया

मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृताम् ॥ शिखंडिपारावतभृंगनादितां वैमानिकस्त्रीकलगीतमंगलाम्॥२०॥ मृदंगशंखानकदुंदुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः ॥ नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभाम्॥२१॥ यां न व्रजंत्यधर्मिष्ठाः खला भूतद्रुहः शठाः ॥ मानिनःकामिनो लुब्धा एभिर्हीना व्रजंति यत्॥२२॥ तां देवधानीं स वरूथिनीपतिर्बहिः समंताद्रुरुधे पृतन्यया॥आचार्यदत्तं जलजं महास्वनं दध्मौप्रयुञ्जन् भयमिन्द्रयोषिताम् ॥२३॥ मघवांस्तदभिप्रेत्य बलेः परममुद्यमम् ॥ सर्वदेवगणोपेतोगुरुमेतदुवाच ह॥२४॥भगवन्नुद्यमो भूयान् बलेर्नः पूर्ववैरिणः ॥ अविषह्यमिमं मन्ये केनासीत् तेजसोर्जितः ॥२५॥नैनं कश्चित् कुतो वापि प्रतिव्योढुमधीश्वरः ॥ पिबन्निव मुखेनेदं लिहन्निव दिशो दश ॥ दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः ॥२६॥ ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः॥ओजः सहो बलं तेजो यत एतत्समुद्यमः॥२७॥ गुरुरुवाच ॥ जानामि मघवञ्छत्रोरुन्नतेरस्य कारणम् ॥ शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः॥२८॥भवद्विधो भवान्वापि वर्जयित्वेश्वरं हरिम् ॥नास्य शक्तः पुरः स्थातुं कृतांतस्य यथा जनाः॥२९॥तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपम्॥यात कालं प्रतीक्षंतो यतः शत्रोर्विपर्ययः॥३०॥

---

१ पताकायुक्ताभिर्वलभीभिः । २ कालात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अधुनाऽयं बलिर्विप्रबलोदर्कोस्ति कालेनैषामेवापमानात् सानुबंधो नंक्ष्यति॥३१॥एवंगुरुणा सुमंत्रितार्थाःदेवाःस्वर्गं हित्वा कामरूपिणःसंतो जग्मुः ॥ ३२ ॥ देवेषु गुप्तेषु सत्सु बलिरिंद्रपदमास्थाय जगत्त्रयं वशं निन्ये ॥३३॥अथ भृगवो विश्वजयिनं शिष्यं शताश्वमेधेनेंद्रपदं स्थिरीकर्तुं मयाजयन् ॥ ३४ ॥ तदनुभावेन त्रैलोक्यविख्यातां कीर्तिं दिक्षु विस्तारयन् सन् चंद्र इव रेजे ॥ ३५ ॥ ततो बलिरात्मानं कृतकृत्यमिव मन्वानो ब्राह्मणैः संपादितां समृद्धां श्रियं बुभुजे ॥ ३६ ॥ इति श्रीभागव० अष्टम० चू० पंचदशोऽध्यायः ॥ १५ ॥ षोडशे पुत्रनाशेन शोचंत्या अदितेः

एष विप्रबलोदर्कः संप्रत्यूर्जितविक्रमः ॥ एषामेवापमानेन सानुबंधो विनंक्ष्यति॥ ३१ ॥ एवं सुमंत्रितार्थास्ते गुरुणार्था नुदर्शिना ॥ हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः ॥ ३२ ॥ देवेष्वथ निलीनेषु बलिर्वैरोचनः पुरीम् ॥ देवधानीं मधिष्ठाय वशं निन्ये जगत्त्रयम् ॥ ३३॥ तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः ॥ शतेन हयमेधानामनुव्रतम याजयन् ॥ ३४ ॥ ततस्तदनुभावेन भुवनत्रयविश्रुताम् ॥ कीर्तिं दिक्षु वितन्वानः स रेजउडुराडिव ॥ ३५ ॥ बुभुजे च श्रियं स्फीतां द्विजदेवोपलंभिताम् ॥ कृतकृत्यमिवात्मानं मन्यमानो महामनाः॥३६॥ इति श्रीभागव०म०अष्टम० बलिकृतस्वर्गाक्रमणं नाम पंचदशोऽध्यायः ॥ १५ ॥ श्रीशुक उवाच ॥ एवं पुत्रेषु नष्टेषु देवमातादितिस्तदा ॥ हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत्॥१॥ एकदा कश्यपस्तस्या आश्रमं भगवानगात् ॥ निरुत्सवं निरानंदं समाधेर्विरत श्चिरात् ॥ २ ॥ सपत्नीं दीनवदनां कृतासनपरिग्रहः ॥ सभाजितो यथान्यायमिदमाह कुरूद्वह ॥ ३ ॥ अप्यभद्रं न विप्राणां भद्रे लोकेऽधुनाऽऽगतम् ॥ न धर्मस्य न लोकस्य मृत्योश्छंदानुवर्तिनः ॥४॥ अपि वा कुशलं किंचिद् गृहेषु गृहमेधिनि ॥ धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनाम् ॥ ५ ॥

पतिः । प्रार्थितःकश्यपः प्राह पयोव्रतमितीर्यते॥१॥श्रीशुक उवाच । हे राजन्! एवं पुत्रेषु नष्टेषु सत्सु दैत्यैश्च स्वर्गे हृते सति देवमाताऽदितिःपर्यत प्यत ॥ १ ॥ एकदा कश्यपस्तस्याः निरुत्सवं निरानंदमाश्रमं जगाम ॥ २ ॥ तदा कृतासनपरिग्रहः स दीनवदनां पत्नीं दृष्ट्वा जगाद॥ ३ ॥ हे भद्रे ! अधुना विप्राणां धर्मस्याऽभद्रं नागतं किम् ॥४॥ किंवा गृहेषु त्रिवर्गस्याकुशलं यत्रायोगिनामपि स्वधर्मादिना योगफलं भवति ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपि वाऽतिथयस्त्वद्गृहं प्राप्तास्त्वयाऽपूजिताः संतो गताः किम् ॥६॥येषु गृहेष्वतिथयो जलैरपि नार्चिताः ते गृहाः शृगालराजगृहवज्ज्ञेयाः॥७॥ किं वा होमकाले हविषाऽग्नयो न हुताः किम् ॥ ८ ॥ ब्राह्मणोऽग्निश्च विष्णोर्मुखम् । तत्पूजनात् स्वर्गादिलोकान् याति ॥ ९ ॥ अथ वा ते सर्वे पुत्राः कुशलिनः किम् । अहं तव मनोऽस्वस्थं लक्षयामि ॥ १० ॥ अदितिरुवाच ॥ हे ब्रह्मन् ! द्विजगवां धर्मस्य जनस्यच भद्रम् ॥११ ॥ तव

अपि वाऽतिथयोऽभ्येत्य कुटुंबासक्तया त्वया ॥ गृहादपूजिता याताः प्रत्युत्थानेन वा क्वचित् ॥ ६ ॥ गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ॥ यदि नियांति ते नूनं फेरुराजगृहोपमाः ॥ ७ ॥ अप्यग्नयस्तु वेलायां न हुता हविषा सति ॥ त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ॥८ ॥यत्पूजया कामदुघान्याति लोकान् गृहान्वितः ॥ ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम् ॥९॥अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि ॥ लक्षयेऽस्वस्थयात्मानं भवत्या लक्षणैरहम् ॥१०॥ अदितिरुवाच ॥ भद्रं द्विजगवां ब्रह्मन्धर्मस्यास्य जनस्य च ॥ त्रिवर्गस्य परं क्षेत्रं गृहमेधिन्गृहा इमे ॥ ११ ॥ अग्नयोऽतिथयो भृत्या भिक्षवो ये च लिप्सवः ॥ सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति ॥ १२ ॥ को नु मे भगवन्कामो न संपद्येत मानसः ॥ यस्या भवान्प्रजाध्यक्ष एवं धर्मान् प्रभाषते॥ १३ ॥ तवैव मारीच मन इशरीरजाः प्रजा इमाः सत्त्वरजस्तमोजुषः ॥ समो भवांस्तास्वसुरादिषु प्रभो तथापि भक्तं भजते महेश्वरः ॥ १४ ॥ तस्मादीश भजंत्या मे श्रेयश्चिंतय सुव्रत॥हृतश्रियो हृतस्थानान् सपत्नैः पाहि नः प्रभो ॥१५॥ परैर्विवासिता साऽहं मग्ना व्यसनसागरे ॥ ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम ॥ १६ ॥ यथा तानि पुनः साधो प्रपद्येरन्ममात्मजाः ॥ तथा विधेहि कल्याणं धिया कल्याणकृत्तम ॥ १७ ॥

ध्यानयोगात किंचिदपि न क्षीयते ॥ १२ ॥ भवान् धर्मान् यस्याः प्रभाषते तस्याः मनोरथः को नु न सिध्यति॥१३॥ हे कश्यप ! तवैव सर्वाः प्रजाः।तासु त्वं समः । तथापीश्वरो भक्तं भजते॥१४॥अत एव हे स्वामिन्! भजंत्याः मे कल्याणं चिंतय।शत्रुभिर्हृतस्थानश्रियो नः पाहि॥१५॥ प्रबलैर्दैत्यैर्ममैश्वर्यादीनि हृतानि।तेन दुःखसागरेऽहं मग्ना॥१६॥अतो हे साधो ! मम पुत्राःयथा पुनस्तानि प्रपद्येरन् तथा मे कल्याणं कुरु॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवं प्रार्थितः कश्यपस्तामाह । अहो स्नेहबद्धं जगत् । नेदं विष्णोर्मायाबलम् ॥ १८ ॥ अयं पांचभौतिको देहः क्व ? प्रकृतेः परः आत्मा क्व ? कस्य के पुत्राद्याः ? अत्र मोह एव कारणम् ॥ १९ ॥अतो जनार्दनं जगद्गुरुं वासुदेवं भजस्व ॥ २० ॥ दीनानुकंपी सः ते कामान् करिष्यति यतो भगवद्भक्तिरमोघा अन्या न ॥ २१ ॥ अदितिरुवाच ॥ हे ब्रह्मन् ! अहं केन विधिना जगत्पतिमुपास्ये यथा मे मनोरथं स कुर्यात् ॥ २२ ॥ हे द्विजश्रेष्ठ ! पुत्रैः सह सीदंत्याः मे देवः आशु तुष्यति तथा तत्सेवाप्रकारं कथय ॥ २३ ॥ कश्यप उवाच ॥ हे देवमातः !

श्रीशुक उवाच ॥ एमवभ्यर्थितोऽदित्या कस्तामाह स्मयन्निव ॥ अहो मायाबलं विष्णोः स्नेहबद्धमिदं जगत्॥१८॥ क्व देहो भौतिकोऽनात्मा क्व चात्मा प्रकृतेः परः ॥ कस्य के पतिपुत्राद्या मोह एव हि कारणम् ॥ १९ ॥ उपतिष्ठस्व पुरुषं भगवंतं जनार्दनम् ॥ सर्वभूतगुहावासं वासुदेवं जगद्गुरुम् ॥२० ॥ स विधास्यति ते कामान् हरिर्दीनानुकंपनः ॥ अमोघा भगवद्भक्तिर्नेतरेति मतिमम ॥ २१ ॥ अदितिरुवाच ॥ केनाहं विधिना ब्रह्मन् उपस्थास्ये जगत्पतिम् ॥ यथा मे सत्यसंकल्पो विदध्याच्च मनोरथम् ॥२२ ॥आदिश त्वं द्विजश्रेष्ठ विधिं तदुपधावनम्॥आशु तुष्यति मे देवः सीदंत्याः सह पुत्रकैः ॥ २३ ॥ कश्यप उवाच ॥ एतन्मे भगवान् पृष्टः प्रजाकामस्य पद्मजः ॥ यथाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥ २४ ॥फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः॥ अर्चयेदरविंदाक्षं भक्त्या परमयान्वितः॥२५॥ सिनीवाल्यां मृदाऽऽलिप्य स्नायात्क्रोडविदीर्णया ॥ यदि लभ्येत वै स्रोतस्येतं मंत्रमुदीरयेत् ॥ २६ ॥ त्वं देव्यादि वराहेण रसायाः स्थानमिच्छता ॥ उद्धतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥ २७ ॥

प्रजाकामेन मया पृष्टो ब्रह्मा यद्व्रतमाह तद् हरितोषणं व्रतं ते वक्ष्यामि ॥२४॥ फाल्गुनस्य शुक्लपक्षे द्वादशाहं पयोव्रतः सन् हरिमर्चयेत्॥२५॥ तत्रादावमावास्यायां वनवराहविदीर्णया मृदांगमालिप्य नद्यादौ विधिनास्नायात् ॥ २६ ॥ मृल्लेपने इमं मंत्रमुच्चारयेत्। हे देवि ! आदिवराहेण रसायास्त्वमुद्धृता अतस्तुभ्यं नमः मम पापं नाशयेति ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः स्नानांते नित्यनैमित्तिकं कृत्वा भक्त्या प्रतिमायां भूमौ सूर्ये जले वह्नौ गुरावपि हरिमर्चयेत् ॥ २८ ॥ ततः आवाहनादाविमान्नव मंत्रा नुच्चारयेत् । महापुरुषाय सर्वभूतनिवासाय वासुदेवाय तुभ्यं नमः ॥ २९ ॥ सूक्ष्माय प्रधानपुरुषाय सांख्यप्रवर्तकाय नमः ॥ ३० ॥ द्वे शीर्षे यस्य तस्मै त्रिपदे चतुश्शृङ्गाय सप्तहस्ताय यज्ञाय नमः ॥ ३१ ॥ शिवाय शक्तिधराय सर्वविद्याधिपतये नमः ॥ ३२ ॥ हिरण्यगर्भाय

निर्वर्तितात्मनियमो देवमर्चेत्समाहितः ॥ आर्चायां स्थंडिले सूर्ये जले वह्नौ गुरावपि ॥ २८ ॥ नमस्तुभ्यं भगवते पुरुषाय महीयसे ॥ सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥ २९ ॥ नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ॥ चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥ ३० ॥ नमो द्विशीर्ष्णे त्रिपदे चतुश्शृंगाय तंतवे ॥ सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥ ३१ ॥ नमः शिवाय रुद्राय नमः शक्तिधराय च ॥ सर्वविद्याधिपतये भूतानां पतये नमः ॥ ३२॥ नमो हिरण्यगर्भाय प्राणाय जगदात्मने ॥ योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥३३ ॥ नमस्ते आदिदेवाय साक्षिभूताय ते नमः ॥ नारायणाय ऋषये नराय हरये नमः ॥ ३४ ॥ नमो मरकतश्यामवपुषेऽधिगतश्रिये॥केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥३५ ॥ त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ ॥ अतस्ते श्रयसे धीराः पादरेणुमुपासते॥ ३६॥ अन्ववर्तंत यं देवाः श्रीश्च तत्पादपद्मयोः ॥ स्पृहयंत इवामोदं भगवन् मे प्रसीदताम् ॥ ३७ ॥ एतैर्मंत्रैर्हृषीकेशमावाहन पुरस्कृतम् ॥ अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पशनादिभिः ॥ ३८ ॥

प्राणाय योगैश्वर्यशरीराय नमः ॥ ३३ ॥ आदिदेवाय साक्षिभूताय नारायणाय नमः ॥ ३४ ॥ मरकतश्यामवपुषे केशवाय पीतवाससे नमः ॥ ३५ ॥ हे ईश ! त्वं पुंसां सर्ववरदः ॥ ३६ ॥ देवाः श्रीश्च तत्पादपद्मयोः सुगंधाय यं स्पृहयंति स मे प्रसीदताम् ॥ ३७ ॥ इत्यादिमंत्रैर्द्वादशाक्षरविद्यया च हृषीकेशमर्चयेत् ॥ ३८ ॥

१ चतुर्विंशतितत्त्वज्ञाय । २ चत्वारिश्रृङ्गा इति मंत्रस्थायमर्थः । ३ प्रायणीयोदयनीये शीर्षे । ४ पादात्त्रीणि सवनानि । ५ श्रृंगाणि वेदाः । ६ फलविस्तारकाय । ७ हस्ताः गायत्र्यादीनि सप्तच्छंदांसि ८ त्रय्यां विद्यायामात्मा यस्य तस्मै । ९ योगैश्वर्यं शरीरं यस्य तस्मै ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः पयसा विभुं स्नापयित्वा वस्त्रोपवीताऽऽभरणैर्गणेधपुष्पधूपदीपादिभिश्च पूजयेत् ॥ ३९ ॥ ततः सघृतं सगुडं पायसं शाल्यन्नं नैवेद्यं दत्त्वा मूलमन्त्रेण जुहुयात् ॥ ४० ॥ निवेदितं तद्भक्ताय दद्यात् स्वयं वा भुञ्जीत । ततः आचमनं दत्त्वा तांबूलं निवेद्य ॥ ४१ ॥ अष्टोत्तरशतं मन्त्रं जपेत् । स्तुतिभिः प्रभुं स्तुत्वा प्रदक्षिणानि नमस्कारं कृत्वा ॥ ४२ ॥ निर्माल्यं शिरसि धृत्वा देवं विसर्जयेत् । पायसेन द्यवरान् विप्रान् भोज

अर्चित्वा गन्धमाल्याद्यैः पयसा स्नपयेद्विभुम् ॥ वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ॥ गन्धधूपादिभिश्चार्चेद्वादशाक्षरविद्यया ॥ ३९ ॥ शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ॥ ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ॥ ४० ॥ निवेदितं तद्भक्ताय दद्याद्भुंजीत वा स्वयम् ॥ दत्त्वाचमनमर्चित्वा तांबूलं च निवेदयेत्॥४१॥जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम् ॥ कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दण्डवन्मुदा ॥ ४२ ॥ कृत्वा शिरसि तच्छेषं देवमुद्वासयेत् ततः ॥ द्यवरान्न भोजयेद्विप्रान् पायसेन यथोचितम् ॥ ४३॥ भुंजीत तैरनुज्ञातः शेषं सेष्टः समाजितः ॥ ब्रह्मचार्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि ॥४४॥ स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ॥ पयसा स्नापयित्वार्चेद्यावद्व्रतसमापनम् ॥ ४५ ॥ पयोभक्षो व्रतमिदं चरेद्विष्णवर्चनादृतः ॥ पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ॥ ४६ ॥ एवं त्वहरहः कुर्याद्वादशाहं पयोव्रतः ॥ हरेराराधनं होममर्हणं द्विजतर्पणम् ॥ ४७ ॥ प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी ॥ ब्रह्मचर्यमधः स्वप्नं स्नानं त्रिषवणं चरेत् ॥ ४८ ॥

येत् ॥ ४३ ॥ ततस्तैः समनुज्ञातो बंधुभिः सह भुंजीत । रात्र्यां ब्रह्मचारी सन् प्रभाते॥४४॥ यथोक्तविधिना स्नातः शुचिः पयसा विभुं स्नापयित्वाऽर्चयेत् ॥ ४५ ॥ ततः पूर्ववदग्निं जुहुयात् विप्रान् भोजयेत् ॥ ४६ ॥ एवं प्रतिदिनं द्वादशाहं पयोव्रतं तत्र हरेराराधनं होमं ब्राह्मणभोजनं च कुर्यात् ॥ ४७॥ प्रतिपद्दिनमारभ्य शुक्लत्रयोदशीपर्यन्तं ब्रह्मचर्यं भूमिशयनं त्रिकालस्नानं चरेत् ॥ ४८ ॥

१ द्वादशाक्षरमन्त्रेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असद्भाषणं भोगान् हिंसादिकं च वर्जयेत् ॥ ४९ ॥ त्रयोदश्यां पंचामृतैर्विष्णुं स्नपयित्वा शास्त्रविधिना ॥५० ॥ महापूजां कृत्वा चरुं निरूप्य तेन पुरुषमिष्ट्वा पुरुषतुष्टिदं नैवेद्यं दद्यात् ॥ ५१ ॥ ५२ ॥ आचार्यमृत्विजश्च वस्त्राभरणधेनुभिस्तोषयेत् ॥ ५३ ॥ अन्यांश्च ब्राह्मणान् सदन्नेन भोजयेत् ॥ ५४ ॥ ततो गुरवे ऋत्विग्भ्यश्च दक्षिणां दत्त्वा तर्पयेत् ॥ ५५ ॥ सर्वेषु भुक्तेषु सत्सु ततो बंधुभिः सह स्वयं भुंजीत ॥ ५६ ॥

वर्जयेदसदालापं भोगानुच्चावचांस्तथा ॥ अहिंस्रः सर्वभूतानां वासुदेवपरायणः ॥४९॥ त्रयोदश्यामथो विष्णोः स्नपनं पंचकैर्विभोः ॥ कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ॥ ५० ॥ पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः ॥ चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ॥५१ ॥हूतेन तेन पुरुषं यजेत सुसमाहितः ॥ नैवेद्यं चातिगुणवद्दद्यात् पुरुषतुष्टिदम्॥ ५२ ॥ आचार्यं ज्ञानसंपन्नं वस्त्राभरणधेनुभिः ॥ तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः ॥ ५३ ॥ भोजयेत् तान् गुणवता सदन्नेन शुचिस्मिते ॥ अन्यांश्च ब्राह्मणाञ्छक्त्या ये च तत्र समागताः॥ ५४॥ दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथार्हतः ॥ अन्नाद्येनाऽऽश्वपाकांश्च प्रीणयेत् समुपागतान् ॥ ५५ ॥ भुक्तवत्सु च सर्वेषु दीनांधकृपणेषु च ॥ विष्णोस्तत् प्रीणनं विद्वान् भुंजीत सह बन्धुभिः॥ ५६ ॥ नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः ॥ कारयेत्सत्कथाभिश्च पूजां भगवतोऽन्वहम् ॥ ५७ ॥ एतत् पयोव्रतं नाम पुरुषाराधनं परम् ॥ पितामहेनाभिहितं मया ते समुदाहृतम् ॥ ५८ ॥ त्वं चानेन महाभागे सम्यक्चीर्णेन केशवम् ॥ आत्मना शुद्धभावेन नियमात्मा भजाव्ययम् ॥ ५९ ॥ अयं वै सर्वयज्ञाख्यः सर्वव्रतमिति स्मृतम् ॥ तपस्सारमिदं भद्रे दानं चेश्वरतर्पणम् ॥६०॥ त एव नियमाः साक्षात् त एव च यमोत्तमाः ॥ तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ॥ ६१ ॥

नृत्यवादित्रगीतस्तुत्यादिभिः प्रत्यहं भगवतः पूजां कारयेत् ॥ ५७ ॥ एतत् पयोव्रतं मे पितामहेनोक्तं तत् ते कथितम् ॥५८ ॥ हे महाभागे ! त्वं शुद्धभावेन व्रतेन केशवं भज ॥ ५९ ॥ इदं सर्वव्रताख्यं व्रतं तपस्परम् ॥ ६० ॥ येन हरिस्तुष्यति तदेव तपोदानव्रतनियमादि ॥ ६१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतो हे भद्रे ! श्रद्धयेदं व्रतमाचर । अनेन तुष्टो भगवान् तव वरान् दास्यति ॥ ६२ ॥ इति श्रीभाग० अष्टम० चू० षोडशोऽध्यायः ॥ १६॥
ततः सप्तदशेऽदित्या कृते तस्मिन् व्रते हरिः । तत्कामपूरणायादौ तत्पुत्रोऽभूदितीर्यते ॥१ ॥ श्रीशुक उवाच ॥हे नृप ! एवं कश्यपेनोक्ताऽदिति
र्द्वादशाहं पयोव्रतं प्रारभत ॥१॥ मनसेन्द्रियदुष्टाश्वान् निगृह्य ॥२ ॥ मनो वासुदेवे समाधाय पयोव्रतं चकार ॥३॥ हे राजन् ! तस्माद् व्रता

तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धया चर ॥ भगवान् परितुष्टस्ते वरानाशु विधास्यति ॥६२॥इतिश्रीभाग० म० अष्टम
स्कंधेऽदित्यै पयोव्रतोपदेशो नाम षोडशोऽध्यायः ॥१६॥श्रीशुक उवाच ॥ इत्युक्ता साऽदिती राजन् स्वभर्त्रा कश्य
पेन वै ॥ अन्वतिष्ठद्व्रतमिदं द्वादशाहमतंद्रिता ॥ १ ॥ चिंतयत्येकया बुद्ध्या महापुरुषमीश्वरम्॥ प्रगृह्येंद्रियदुष्टाश्वा
न्मनसा बुद्धिसारथिः ॥ २ ॥ मनश्चैकाग्रया बुद्ध्या भगवत्यखिलात्मनि ॥ वासुदेवे समाधाय चचार ह पयोव्रतम्
॥ ३ ॥ तस्याः प्रादुरभूत् तात भगवानादिपूरुषः ॥ पीतवासाश्चतुर्बाहुः शंखचक्रगदाधरः ॥ ४॥ तं नेत्रगोचरं वीक्ष्य
सहसोत्थाय सादरम् ॥ ननाम भुवि कायेन दंडवत् प्रीतिविह्वला ॥ ५ ॥सोत्थाय बद्धांजलिरीडितुं स्थिता नोत्सेह
आनंदजलाकुलेक्षणा ॥ बभूव तूष्णीं पुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ॥ ६ ॥ प्रीत्या शनैर्गद्गदया
गिरा हरिं तुष्टाव सा देव्यदितिः कुरूद्वह ॥ उद्वीक्षती सा पिबतीव चक्षुषा रमापतिं यज्ञपतिं जगत्पतिम् ॥ ७ ॥
अदितिरुवाच ॥ यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमंगलनामधेय ॥ आपन्नलोकवृजिनोपशमोदयाद्यः
शं नः कृधीश भगवन्नसि दीननाथः ॥ ८ ॥ विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ॥
स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥ ९ ॥

त पीतवासाः शंखचक्रगदाधरो हरिः प्रादुरभूत् ॥४॥ तदाऽदितिस्तं वीक्ष्य प्रीत्या भुवि कायेन दंडवत् ननाम ॥ ५ ॥ ततः सा उत्थाय बद्धां
जलिः स्थिता सती स्तोतुं नोत्सेहे ॥ ६ ॥ पश्चाच्छनैर्गद्गदया गिरा जगत्पतिं हरिं तुष्टाव ॥ ७॥ अदितिरुवाच ! हे यज्ञेश ! हे यज्ञपुरुष ! हे
भगवन् ! अस्माकं शं कुरु । त्वं दीननाथोऽसि ॥८॥ जगतो जन्मस्थितिसंयमार्थं गृहीतमायागुणाय हरये नमोऽस्तु ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे अनंत ! संतुष्टात् त्वत्तो नृणां ब्रह्मायुः वपुरादि सर्वं भवति शत्रुजयादि किमुत ॥ १० ॥ श्रीशुक उवाच॥एवमदित्या स्तुतो सर्वभूतानामंतर्यामी हरिरुवाच ॥ ११ ॥ श्रीभगवानुवाच ॥ हे देवमातः ! भवत्या कांक्षितं मया ज्ञातम् ॥ १२ ॥ किं च युद्धे दैत्यान् निर्जित्य प्राप्तजयश्रीभिः पुत्रैः सहैकत्र स्थातुमिच्छसि ॥ १३ ॥ तथा विद्विषां दुःखिताः रुदतीः स्त्रियो द्रष्टुमिच्छसि ॥ १४ ॥ तथा स्वर्गमधिष्ठाय क्रीडतः समृद्धा

आयुः परं वपुरभीष्टमतुल्यलक्ष्मीद्यौर्भूरसाः सकलयोगगुणास्त्रिवर्गः॥ज्ञानं च केवलमनंत भवंति तुष्टात् त्वत्तो नृणां किमु सपत्नजयादिराशीः ॥१०॥ श्रीशुक उवाच ॥ अदित्यैवं स्तुतो राजन् भगवान् पुष्करेक्षणः ॥ क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत॥ ११ ॥ श्रीभगवानुवाच ॥ देवमातर्भवत्या मे विज्ञातं चिरकांक्षितम् ॥ यत् सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः ॥ १२ ॥ तान् विनिर्जित्य समरे दुर्मदानसुरर्षभान्॥प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुम् ॥ १३ ॥ इन्द्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषाम् ॥ स्त्रियो रुदंतीरासाद्य द्रष्टुमिच्छसि दुःखिताः॥१४॥आत्मजान् सुसमृद्धास्त्वं प्रत्याहृतयशश्रियः ॥ नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि ॥१५॥ प्रायोऽधुना तेऽसुरयूथनाथा अपारणीया इति देवि मे मतिः॥ यत्तेऽनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति॥ १६॥ अथाप्युपायो मम देवि चिंत्यः संतोषितस्य व्रतचर्यया ते ॥ ममार्चनं नार्हति गंतुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात्॥१७ ॥ त्वया चिंतश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः ॥ स्वांशेन पुत्रत्वमुपेत्य ते सुतान् गोप्ताऽस्मि मारीचतपस्यधिष्ठितः ॥ १८ ॥ उपधाव पतिं भद्रे प्रजापतिमकल्मषम् ॥ मां च भावयती पत्यावेवंरूपमवस्थितम् १९ ॥

स्वपुत्रान् द्रष्टुमिच्छसि ॥ १५ ॥ हे देवि !शत्रवः समर्थैर्विप्रैः रक्षिताः अधुना नाऽतिक्रमणीयाः । तत्र पराक्रमः सुखं न ददाति । एवं मम मतिः ॥१६॥ अथापि मयोपायश्चिंत्यः यतस्ते व्रतचर्यया तुष्टस्य ममार्चनं विफलं भवितुं नार्हति॥१७॥हे मातः ! यतस्त्वया पुत्रसंरक्षणार्थं । व्रतेनार्चितः अहं कश्यपस्य तपसि स्थितः सन् स्वांशेन पुत्रत्वं प्राप्य तव सुतान् पालयामि ॥१८॥ हे भद्रे ! पत्यौ मां भावयंतीसती पतिं भजस्व॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतद्ह्यमन्यस्मै न कथनीयम् । अनन सर्वं सिध्यति॥२ उवाच ॥ गवानंतर्दधे । अथादिति
॥२१॥भक्त्या पतिमसेवयत् कश्यपः समाधियोगेन॥२२॥आत्मनि हरेः प्रवि ाऽदित्यां वीर्यमाधत्त॥
हार शात्वा गुह्यनामभिस्तुष्टाव॥२४॥ब्रह्मोवाच ॥ हे भगवन् ! त्वं जय । ब्रह्मण्यदे गुणाय ते नमः॥२५॥पृश्निगर्भाय त्रिना

नैतत्परस्मा आख्येयं पृष्टयाऽपि कथंचन ॥ सर्वं संपद्यते देवि देवगुह्यं सुसंवृतम् ॥ २० ॥ श्रीशुक उवाच ॥ एतावदुक्त्वा भगवांस्तत्रैवांतरधीयत ॥ अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः ॥ २१ ॥ उपाधावत् पतिं भक्त्या परया कृतकृत्यवत् ॥ स वै समाधियोगेन कश्यपस्तदबुध्यत॥२२॥प्रविष्टमात्मानि हरेरंशं ह्यवितथेक्षणः ॥ सोदित्यां वीर्यमाधत्त तपसा चिरसंभृतम् ॥ समाहितमना राजन् दारुण्यग्निं यथानिलः ॥ २३ ॥ अदितेर्धिष्ठितं गर्भं भगवन्तं सनातनम् ॥ हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः ॥२४॥ ब्रह्मोवाच ॥ जयोरुगाय भगवन्नुरुक्रम नमोऽस्तु ते ॥ नमो ब्रह्मण्यदेवाय त्रिगुणाय नमोनगः ॥२५ ॥ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे ॥ त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे ॥२६॥त्वमादिरन्तो भुवनस्य मध्यमनेतश्शक्तिं पुरुषं यमाहुः ॥ कालो भवानाक्षिपतीश विश्वं स्रोतो यथांतः पतितं गभीरम् ॥ २७ ॥ त्वं वै प्रजानां स्थिरजंगमानां प्रजापतीनामसि संभविष्णुः ॥ दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतोऽप्सु ॥ २८ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धेऽदितिगर्भे भगवदंशप्रवेशो नाम सप्तदशोऽध्यायः ॥ १७ ॥

नमः॥२६॥ त्वं जगतः आदिर्मध्योंतोसि । भवान् कालो विश्वमाकर्षति॥२७॥त्वं देवानां परमाश्रयः एवंभूतस्य ते जन्मादि नास्ति । अथापि देवादीनां कार्यसाधनायायमवतारः । अतः स्वर्गभ्रष्टान् देवान् पुनः स्वर्गे स्थापय ॥२८॥ इति श्रीभागवते अष्टम०चू० सप्तदशोऽध्यायः॥ १७ ॥

१ पृश्निरिति अदितेः दुर्वजन्मनि नाम । २ त्रयो लोकाः नाभौ यस्य तस्मै । ३ त्रिलोकपृष्ठोपरि स्थिताय । ४ जीवेष्वन्तर्यामितयाऽऽविष्टाय ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्त्वष्टादशे भूत्वा वामनः सत्कृतोऽखिलैः । यज्ञं गतस्ततस्तेन सत्कृत्योक्तो वरान् वृणु॥ १॥श्रीशुक उवाच ॥ एवं ब्रह्मणा स्तुतो भगवान् चतु
र्भुजः शंखचक्रगदापद्महस्तः पीतवासाः कमलनेत्रः ॥ १ ॥ श्यामो मकराकारकुण्डलैर्लसच्छ्रीवदनांबुजः श्रीवत्सवक्षाः ॥२॥वनमालया युतः स्वते
जसा कश्यपस्य गृहांधकारं नाशयन् हरिः प्रादुरभूत॥३॥तदा दिशः प्रसेदुः । नद्यादयः स्वच्छजलाः--प्रजाः प्रहृष्टाः--ऋतवो गुणान्विताः--द्विजाः

श्रीशुक उवाच ॥ इत्थं विरञ्चस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्याम् ॥ चतुर्भुजः शंखगदाब्जचक्रः पिशंगवासा न
लिनायतेक्षणः ॥ १ ॥ श्यामावदातो झषराजकुण्डलत्विषोल्लसच्छ्रीवदनांबुजः पुमान् ॥ श्रीवत्सवक्षा वलयांगदोल्लस
त्किरीटकांचीगुणचारुनूपुरः ॥ २ ॥ मधुव्रतव्रातविघुष्टया स्वया विराजितश्रीवनमालया हरिः ॥ प्रजापतेर्वैश्मतमः
स्वरोचिषा विनाशयन् कण्ठनिविष्टकौस्तुभः ॥ ३ ॥ दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणा
न्विताः ॥ द्यौरंतरिक्षं क्षितिरग्निजिह्वा ॥ ४ ॥ श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति
प्रभुः ॥ सर्वे नक्षत्रताराद्याश्चक्रुस्तत् तिष्ठन् मध्यंदिनगतो नृप ॥ विजया नाम
सा प्रोक्ता यस्यां जन्म विदुर्हरे ॥ शंखदुंदुभयो नेदुर्मृदंगप ॥ चित्रविचित्रतूर्याणां निर्घोषस्तुमुलोऽभ
वत् ॥ ७ ॥ प्रीताश्चाप्सरसोऽनृ गंधर्वप्रवरा जगुः ॥ तुष्टुवुर्मुन मनवः ग्नयः ॥ ८ ॥ सिद्धविद्याधर
गणाः सकिंपुरुषकिन्नराः ॥ चा क्षरक्षांसि सुपर्णा भुजगोत्तम ॥ गायन्तोऽतिप्रशंसंतो नृत्यन्तो वि
नुगाः ॥ आदित्या आश्रमपदं समवाकिरन् ॥ १० ॥

प्रसन्नाः बभूवुः॥४॥हरेः प्रादुर्भावसमयम शुक्लद्वादश्यां श्रवणस्थे चंद्रेऽभिजि ः प्रादुर्बभूव।जन्ममुहूर्ते सर्वे नक्षत्रग्रहाः श्रेष्ठफलदाः
बभूवुः॥५॥यस्यां द्वादश्यां हरेर्जन्म जातं र्यंदिनं गतः सूर्यः आसीत्सा विजय थेः प्रोक्ता॥६॥तदाशंखदुंदुभयो मृदंगपणवानकाः
नेदुः॥७॥ अप्सरो ननृतुः । गंधर्वाः ज सिद्धविद्याधरगणाः किंपुरुषकि ॥एते गायंतो नृत्यंत आश्रमपदं

१ देवाः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथादितिः स्वगर्भसंभवं परं पुरुषं तं दृष्ट्वा मुदमाप। कश्यपो जयेत्याह॥ ११॥ हरिर्यदव्यक्तं व्यक्तं च वपुः पूर्वं दधार तेन वपुषा पित्रोःपश्यतोरेव वामनो बटुर्बभूव ॥१२॥ ऋषयस्तं बटुं दृष्ट्वा कश्यपं पुरस्कृत्य जातकादिकर्माणि कारयामासुः॥ १३ ॥उपनीयमानस्य तस्य सूर्यो गायत्रीमब्रवीत् । बृहस्पतिर्ब्रह्मसूत्रं ददौ । कश्यपो मेखलाम् ॥ १४ ॥ भूमिर्मृगचर्म । सोमो दंडम् । माता कौपीनम् ।द्यौश्छत्रम्॥ १५ ॥ ब्रह्मा कमंडलुम् ।

दृष्ट्वाऽदितिस्तं निजगर्भसंभवं परं पुमांसं मुदमाप विस्मिता ॥ गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः ॥११ ॥ यत्तद्वपुर्भातिविभूषणायुधैरव्यक्तचिह्नयक्तमधारयद्धरिः॥बभूव तेनैव स वामनो बटुः संपश्यतोर्दिव्यगतिर्यथा नटः ॥ १२ ॥ तं बटुं वामनं दृष्ट्वा मोदमाना महर्षयः ॥ कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिम्॥१३॥ तस्योपनीयमानस्य सावित्रीं सविताऽब्रवीत् ॥ बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् ॥ १४ ॥ ददौ कृष्णाजिनं भूमिर्दंडं सोमो वनस्पतिः ॥ कौपीनाच्छादनं माता द्यौश्छत्रं जगतः पतेः ॥१५॥ कमंडलुं वेदगर्भः कुशान्सप्तर्षयो ददुः ॥ अक्षमालां महाराज सरस्वत्यव्ययात्मनः ॥१६॥तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात्॥भिक्षां भगवती साक्षादुमाऽदादंबिका सती॥१७॥ स ब्रह्मवर्चसेनैवं सभां संभावितो बटुः॥ब्रह्मर्षिगणसंजुष्टामत्यरोचत मांरिषः ॥१८॥ समिद्धमाहितं वह्निं कृत्वा परिसमूहनम् ॥ परिस्तीर्य समभ्यर्च्य समिद्भिरजुहोद् द्विजः ॥१९॥श्रुत्वाऽश्वमेधैर्यजमान मूर्जितं बलिं भृगूणामुपकल्पितैस्ततः ॥जगाम तत्राखिलसारसंभृतो भारेण गां सन्नमयन् पदेपदे ॥ २० ॥ तं नर्मदा यास्तट उत्तरे बलेर्यै ऋचि वजरते भृगुकच्छसंज्ञके ॥प्रवर्तयतो भृगवः क्रतूत्तमं व्यचक्षतारादुदितं यथा रविम् ॥२१॥

सप्त ऋषयः कुशान् । सरस्वती रुद्राक्षमालाम् ॥१६॥कुबेरो भिक्षापात्रीम् । उमा भिक्षां ददौ ॥ १७ ॥ एवं बटुर्वामनो ब्रह्मवर्चसः तेजसा ब्रह्मर्षिगणव्याप्तां सभामतिक्रम्याऽशोभत ॥ १८ ॥ ततो बटुर्वह्निं प्रदीप्य परिसमुह्य परिस्तीर्याऽभ्यर्च्य समिद्भिरजुहोत् ॥ १९ ॥ एतत्समये शुक्रेण प्रवर्तितैरश्वमेधैर्यजंतं बलिं श्रुत्वा संपूर्णबलेन युक्तः पदेपदे गां नमयन् तत्र जगाम ॥ २० ॥ ततो नर्मदोत्तरे तीरे भृगुकच्छक्षेत्रे यज्ञं प्रवर्त

१ मातिर्दीप्तिर्विभूषणानि आयुधानि च तैर्व्यक्तं यथा भवति तथा । २ श्रेष्ठः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतो भृगवः सूर्यमिव प्रकाशमानं दृष्ट्वा व्यतर्कयन् ॥ २१ ॥ अहो क्रतुदिदृक्षुः सूर्यः सनत्कुमारो वाऽऽयाति किम् ॥ २२ ॥ एवं भृगुषु वितर्क यत्सु वामनश्छत्रकमंडलू बिभ्रत् सन् मंडपं विवेश ॥ २३॥ सशिष्याः भृगवस्तं वामनं जटिलं मौंजीमेखलोपवीतमृगचर्मयुक्तं प्रविष्टं वीक्ष्यो त्थाय प्रत्यगृह्णन् ॥ २४ ॥ २५ ॥ यजमानो बलिर्दर्शनीयं मनोरमं दृष्ट्वा तस्मै बटवे आसनं दत्त्वा ॥ २६ ॥ स्वागतेन नमस्कृत्य तत्पादौ

ते ऋत्विजो यजमानः सदस्या हतत्विषो वामनतेजसा नृप ॥ सूर्यः किलाऽऽयात्युत वा विभावसुः सनत्कुमारोऽथ दिदृक्षया क्रतोः ॥२२॥ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान् स वामनः ॥ सदंडछत्रं सजलं कमंडलुं विवेश बिभ्रद्वयमेधवाटम् ॥२३॥ मौंज्या मेखलया वीतमुपवीताजिनोत्तरम् ॥ जटिलं वामनं विप्रं मायामाणवकं हरिम् ॥ २४ ॥ प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः ॥ प्रत्यगृह्णन् समुत्थाय संक्षिप्तास्तस्य तेजसा ॥ २५ ॥ यजमानः प्रमुदितो दर्शनीयं मनोरमम् ॥ रूपानुरूपावयवं तस्मा आसनमाहरत् ॥ २६ ॥ स्वागतेनाभिनंद्याथ पादौ भगवतो बलिः ॥ अवनिज्यार्चयामास मुक्तसंगं मनोरमम् ॥२७॥ तत्पादशौचं जनकल्मषापहं स धर्मविद् मूर्ध्न्यदधात् सुमंगलम् ॥ यद् देवदेवो गिरिशश्चन्द्रमौलिर्दधार मूर्ध्ना परया च भक्त्या ॥ २८ ॥ बलिरुवाच ॥ स्वागतं ते नमस्तुभ्यं ब्रह्मन् किं करवाम ते ॥ ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वार्य वपुर्धरम् ॥ २९ ॥ अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलम् ॥ अद्य स्विष्टः क्रतुरयं यद् भवानागतो गृहान् ॥ ३० ॥ अद्याग्नयो मे सुहुता यथा विधि द्विजात्मज त्वच्चरणावनेजनैः ॥ हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः पदैस्तव ॥ ३१ ॥

क्षालयित्वा पूजयामास ॥ २७ ॥ जनकल्मषापहं तत्पादोदकं गंगारूपं भक्त्या मूर्ध्नि धृत्वाऽऽह ॥ २८ ॥ बलिरुवाच ॥ हे ब्रह्मन् ! स्वागतम् तुभ्यं नमः । तव किं करवाणि । त्वां प्रत्यक्षं ब्रह्मर्षीणां तप एव मन्ये ॥ २९ ॥ अद्य नः पितरस्तृप्ताः कुलं च पावितम् । यत् त्वं नः गृहान् प्राप्तः ॥ ३० ॥ अद्य मेऽग्नयः सुहुताः । त्वत्पादैर्मे भूमिः पवित्रीकृता ॥ ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे बटो ! यद् वांछसि तत् मत्तो गृहाण । गां सुवर्णं सर्वं हे साधो ! मत्तो गृहाण ॥३२॥इति श्रीभागवते अष्टम० चू०अष्टादशोऽध्यायः॥१८॥
ऊनविंशे तु हरिणा याचिते च पदत्रये। प्रतिश्रुते च बलिना जानन् भृगुरवारयत् ॥ १ ॥दातुः स्तुतिः स्वयं तुष्टिरित्यादि प्रस्तुतोचितम् ।
वक्तव्यमिति भिक्षूंस्तु शिक्षयन्नाह वामनः ॥ २ ॥ श्रीशुक उवाच ॥ एवं धर्मयुक्तं बलेर्वाक्यं श्रुत्वा प्रीतो वामन इदं जगाद॥ १ ॥ वामन
उवाच । हे जनदेव ! तवैतद् वचः कुलोचितं सूनृतं धर्मयुक्तं चास्ति । पारलौकिके धर्मे प्रह्लादश्च प्रमाणम् ॥ २ ॥ अस्मिन् कुले कश्चित्

यद्यद् बटो वांछसि तत् प्रतीच्छ मे त्वामार्थिनं विप्रसुतानुतर्कये॥ गां कांचनं गुणवद्धाम मृष्टं तथान्नपेयमुत वा विप्र
कन्याम् ॥ ग्रामान् समृद्धान् तुरगान् गजान् वा रथास्तथाऽर्हत्तम संप्रतीच्छ॥३२॥ इति श्रीभागव०म०अष्टम०बलि
वामनसंवादेऽष्टादशोऽध्यायः ॥१८॥ श्रीशुक उवाच ॥ इति वैरोचनेर्वाक्यं धर्मयुक्तं स सूनृतम् ॥ निशम्य भगवान्
प्रीतः प्रतिनंद्येदमब्रवीत् ॥१॥ श्रीभगवानुवाच ॥ वचस्तवैतज्जनदेव सूनृतं कुलोचितं धर्मयुतं यशस्करम् ॥ यस्य
प्रमाणं भृगवः सांपराये पितामहः कुलवृद्धः प्रशांतः॥२॥ न ह्येतस्मिन्कुले कश्चिन्निस्सत्त्वः कृपणः पुमान् ॥ प्रत्या
ख्याता प्रतिश्रुत्य यो वाऽदाता द्विजातये ॥ ३ ॥ न संति तीर्थे युधि चार्थिनाऽर्थिताः पराङ्मुखा ये त्वमनस्विनो
नृप॥ युष्मत्कुले यद्यशसाऽमलेन प्रह्लाद उद्भाति यथोडुपः खे ॥ ४ ॥ यतो जातो हिरण्याक्षश्चरन्नेक इमां महीम् ॥
प्रतिवीरं दिग्विजये नाविंदत गदायुधः ॥ ५ ॥ यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतम् ॥ नात्मानं जयिनं
मेने तद्वीर्यं भूर्यनुस्मरन् ॥ ६॥निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा ॥ हंतुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः
॥ ७॥तमायान्तं समालोक्य शूलपाणिं कृतांतवत् ॥ चिंतयामास कालज्ञो विष्णुर्मायाविनां वरः ॥ ८ ॥

कृपणो निस्सत्त्वो न ब्राह्मणाय ददामीत्युक्त्वा प्रत्याख्यातापि न ॥ ३ ॥ किंच दानकाले युद्धे च त्वत्कुलजाः पराङ्मुखाः न । यत्र प्रह्लादो
यशसा चंद्र इव रेजे ॥ ४ ॥ यत्र जातो हिरण्याक्षो दिग्विजये प्रतियोद्धारं न विंदत ॥ ५ ॥ यं निर्जित्य विष्णुस्तत्पराक्रमं स्मरन् स्वं जयिनं
न मेने ॥ ६ ॥ ततो हिरण्यकशिपुर्भ्रातृवधं श्रुत्वा हरेःस्थानं जगाम ७ ॥ आयांतं दैत्यं विलोक्य विष्णुश्चिंतयामास ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतोयतोऽहं तत्रासौ मृत्युः ॥ अतोऽस्य हृदयं प्रवेक्ष्यामि ॥ ९ ॥ एवं निश्चित्य प्राणरंध्रेण रिपोः शरीरं विवेश ॥ १० ॥ दैत्यस्तत्र हरिमपश्यन् क्रुद्धो ननाद । ततः क्ष्मां दिशः खं विवरान् विष्णुं विचिन्वन् न ददर्श ॥ ११ ॥ एवमपश्यन्नाह । मद्भ्रातृहा विष्णुः । यतः पुमान् नावर्तते तद् ब्रह्मैव गतः ॥ १२ ॥ इह देहिनां मृत्युपर्यंतं वैरानुबंधः ॥ १३॥ किं च तव पिता विरोचनो द्विजैर्याचितः सन् द्विजरूपधरेभ्यो देवेभ्यः स्वमायु

यतोयतोऽहं तत्रासौ मृत्युः प्राणभृतामिव ॥अतोऽहमस्य हृदयं प्रवेक्ष्यामि परागदृशः॥ ९ ॥ एवं स निश्चित्य रिपोः शरीरमाधावतो निर्विविशेऽसुरेन्द्र ॥ श्वासानिलांतार्हितसूक्ष्मदेहस्तत्प्राणरंध्रेण विविग्नचेताः॥ १० ॥ स तत्रिकेतं परिमृश्य शून्यमपश्यमानः कुपितो ननाद ॥ क्ष्मां द्यां दिशः खं विवरान्समुद्रान्विष्णुं विचिन्वन् न ददर्श वीरः ॥११॥ अपश्यन्निति होवाच मयाऽन्विष्टमिदं जगत् ॥ भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान् ॥ १२ ॥ वैरानुबंध एतावानामृत्योरिह देहिनाम् ॥ अज्ञानप्रभवो मन्युरहंमानोपबृंहितः ॥ १३ ॥ पिता प्रह्लादपुत्रस्ते तद्विद्वान्द्विजवत्सलः ॥ स्वमायुर्द्विजलिंगेभ्यो देवेभ्योऽदात् स याचितः॥१४॥ भवानाचरितान्धर्मानास्थितो गृहमेधिभिः ॥ ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः ॥ १५ ॥ तस्मात् त्वत्तो महीमीषद् वृणेऽहं वरदर्षभात् ॥ पदानि त्रीणि दैत्येंद्र संमितानि पदा मम ॥ १६ ॥ नान्यत ते कामये राजन्वदान्याज्जगदीश्वरात् ॥ नैनः प्राप्नोति वै विद्वान्यावदर्थपरिग्रहः ॥१७॥ बलिरुवाच ॥ अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः ॥ त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा ॥१८॥ मां वचोभिः समाराध्य लोकानामेकमीश्वरम् ॥ पदत्रयं वृणीते योऽबुद्धिमान् द्वीपदाशुषम् ॥ १९ ॥

र्ददौ ॥ १४ ॥ हे बले ! त्वं ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चाचरितान् धर्मानास्थितः ॥ १५ ॥ एवंभूतकुलोत्पन्नात्त्वत्तः ईषन्महीं मम पदा तुल्यानि त्रीणि पदानि वृणे ॥ १६ ॥ वदान्यात् त्वत्तोऽन्यत् न कामये ॥ १७ ॥ बलिरुवाच ॥ अहो ब्राह्मणपुत्र ! त्वं बालः स्वार्थं न वेत्सि । तव वाचो वृद्धसंमताः ॥ १८ ॥ यो द्वीपदातारं मां वचोभिराराध्य पदत्रयं वृणीते स न बुधः ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतः पुमान् मां प्राप्य पुनरन्यस्माद्याचितुं नार्हति तस्मात् हे वटो ! वृत्तिकरीं भूमिं गृहाण ॥ २० ॥ वामन उवाच ॥ हे राजन् ! त्रैलोक्ये यावन्तो विषयाः संति तेऽजितेंद्रियं याचकं पूरयितुं न समर्थाः ॥ २१ ॥ किंच पदत्रयेण योऽसंतुष्टः स खंडेन द्वीपेनापि न तुष्यति ॥ २२ ॥ एवं वैन्यगयादिनृपाः अर्थकामैस्तृष्णांतं न गताः इति श्रुतम् ॥ २३ ॥ यदृच्छया प्राप्तेन संतुष्टः सुखं वर्द्धते असंतुष्टस्तु न ॥ २४ ॥ किंच पुंसोऽसन्तोषः संसृतिहेतुः संतोषस्तु मुक्तये स्मृतः ॥ २५॥ तथा यदृच्छालाभतुष्टस्य तेजो वर्द्धते असंतोषान्नश्यति ॥ २६ ॥ तस्मात् त्रिपदमेव

न पुमान् मामुपव्रज्य भूयो याचितुमर्हति ॥ तस्माद् वृत्तिकरीं भूमिं वटो कामं प्रतीच्छ मे ॥ २० ॥ श्रीभगवानुवाच ॥ यावन्तो विषयाः प्रेष्ठास्त्रिलोक्यामजितेंद्रियम् ॥ न शक्नुवन्ति ते सर्वे प्रतिपूरयितुं नृप ॥ २१ ॥ त्रिभिःक्रमै रसंतुष्टो द्वीपेनापि न पूर्यते ॥ नववर्षसमेतेन सप्तद्वीपवरेच्छया ॥ २२॥ सप्तद्वीपाधिपतयो नृपा वैन्यगयादयः ॥ अर्थैः कामैर्गता नान्तं तृष्णाया इति नः श्रुतम्॥ २३ ॥ यदृच्छयोपपन्नेन संतुष्टो वर्तते सुखम् ॥ नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥ २४ ॥ पुंसोऽयं संसृतेर्हेतुरसंतोषोऽर्थकामयोः॥ यदृच्छयोपपन्नेन संतोषो मुक्तये स्मृतः ॥ १५ ॥ यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्द्धते ॥ तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः ॥ २६॥ तस्मात् त्रीणि पदान्येव वृणे त्वद्वरदर्षभात् ॥ एतावतैव सिद्धोऽहं वित्तं यावत्प्रयोजनम्॥ २७॥ श्रीशुक उवाच ॥ इत्युक्तः स हसन्नाह वांछातः प्रतिगृह्यताम् ॥ वामनाय महीं दातुं जग्राह जलभाजनम् ॥ २८॥ विष्णवे क्ष्मां प्रदास्यंतमुशना त्वसुरेश्वरम् ॥ जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदांवर ॥ २९ ॥ शुक्राचार्य उवाच ॥ एष वैरोचने साक्षाद्भगवान्विष्णुरव्ययः॥ कश्यपाददितेर्जातो देवानां कार्यसाधकः ॥ ३० ॥

वृणे । एतावतैव तुष्टोऽहम् ॥ २७ ॥ श्रीशुक उवाच ॥ एवं निशम्य बलिरेवन् जगाद हे वटो ! वांछातः प्रतिगृह्यताम् । एवमुक्त्वा वामनाय महीं दातुं जलपात्रं जग्राह ॥ २८॥ तदा शुक्रो विष्णोश्चिकीर्षितं जानन् विष्णवे क्ष्मां प्रदास्यन्तं शिष्यं जगाद ॥ २९॥ शुक्र उवाच । हे वैरोचने एष साक्षाद्विष्णुः देवानां कार्यसाधकः कश्यपाददित्यां जातः ॥ ३० ॥

---

१ प्राप्तः । २ अग्निः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं च त्वयास्मै यत् प्रतिश्रुतं तत् साधु न मन्ये॥३१॥एष त्वत्तः स्थानमैश्वर्यादिकं चाच्छिद्येंद्राय दास्यति ॥ ३२ ॥अयं विश्वकायस्त्रिभिः पादैरिमान् लोकान् क्रमिष्यति । हे मूढ ! विष्णवे सर्वस्वं दत्त्वा कथं वर्तिष्यसे ॥३३॥ एकेन पादन्यासेन भूमिं स्वर्गं कायेन खं क्रममाणस्य वटोस्तृतीयपादन्यासस्य क्व गतिः॥३४॥प्रतिज्ञातमप्रदातुस्तव नरके स्थितिं मन्ये॥३५॥येन वृत्तिर्विपद्यते तद्दानं न योग्यं भवति यतो वृत्तिमतः पुरुषाद्दानं यज्ञस्तपः कर्म च भवति॥३६॥अपि च यः पुमान् स्ववित्तं धर्माय यशसेऽर्थायकामाय स्वजनायेति पंचधाविभजेत् स इहामुत्र च मोदते

प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता ॥ न साधु मन्ये दैत्यानां महानुपगतोऽनयः ॥ ३१॥ एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतम् ॥ दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः ॥ ३२ ॥ त्रिभिः क्रमैरिमाँल्लोकान्विश्वकायः क्रमिष्यति ॥ सर्वस्वं विष्णवे दत्त्वा मूढ वर्तिष्यसे कथम् ॥ ३३ ॥ क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः॥खं च कायेन महता तार्तीयस्य कुतो गतिः॥३४॥निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतम् ॥प्रतिश्रुतस्य योऽनीशः प्रति पादयितुं भवान् ॥३५॥ न तद्दानं प्रशंसंति येन वृत्तिर्विपद्यते ॥ दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ॥ ३६ ॥ धर्माय यशसेऽर्थाय कामाय स्वजनाय च॥पंचधा विभजन् वित्तमिहामुत्र च मोदते॥३७॥अत्रापि बह्वृचैर्गीतं शृणु मेऽसुरसत्तम ॥ सत्यमोमिति यत् प्रोक्तं यन्नेत्याहानृतं हि तत्॥३८॥सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीयते ॥वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः॥३९॥तद्यथा वृक्ष उन्मूलश्शुष्यत्युद्वर्त्ततेऽचिरात्॥एवं नष्टानृतः सद्य आत्माशुष्येन्न संशयः ॥ ४० ॥ परांग्रिक्तमपूर्णं वा अक्षरं यत्तदोमिति ॥ यत्किंचिदोमिति ब्रूयात्तेन रिच्येत वै पुमान् ॥ ४१ ॥

॥ ३७ ॥ ऋग्वेदश्रुत्या सत्याऽनृतयोर्व्यवस्था प्रतिपादिता । वृत्तिसंकटादिष्वनृतमपि न निषिद्धमिति च । अत्रापि बह्वृचैर्गीतं शृणु । ओमिति सत्यं प्रोक्तं नेत्यनृतम् ॥ ३८ ॥ देहवृक्षस्य मूलमनृतम् । पुष्पफलं सत्यम् अतो देहे नष्टे तन्न स्यात् ॥ ३९ ॥ यथोत्पाटितमूलो वृक्षः सद्यः शुष्यति पतति च एवं नष्टाऽनृतो देहः शुष्येत् ॥ ४० ॥ तस्मादार्थिने यत्किंचिद्दास्यामीति ब्रूयात् तेन न्यूनो भवेत् ।

१ परांचति दूरेऽर्थं गृहीत्वा व्रजतीति पराक् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच भिक्षवे सर्वं दास्यामीत्यंगीकुर्वतः स्वस्य भोगो न सिध्यति ॥ ४१ ॥ यो नित्यं मम किंचिदपि नास्ति सीदामीति ब्रूते स तेनाऽनृतेन परेषामर्थानाकर्षति ॥ ४२॥ननु तर्ह्यनृतमेव सर्वदा सेव्यम् । नेत्याह । सर्वं नेति ब्रूयात् स दुष्कीर्तिः श्वसन् मृतः । स्त्रीषु परिहासे विवाहे वृत्त्यर्थे प्राणसंकटे गोब्राह्मणार्थे कस्यचित् प्राप्तायां हिंसायामनृतं निंद्यं न स्यात् ॥ ४३ ॥ इति श्रीभागव० अष्टमे० चू० एकोनविंशोऽध्यायः ॥ १९ ॥ विंशे त्वनृतभीतोऽसौ ज्ञात्वापि कपटं हरेः ॥ ददावेव ततो विष्णुः सहसाऽवर्द्धताद्भुतम् ॥ १ ॥ श्रीशुक उवाच ॥ एवं कुलगुरुणोक्तो

भिक्षवे सर्वमोंकुर्वन्नालं कामेन चात्मने ॥ अर्थेतत्पूर्णमभ्यात्मं यच्च नेत्यनृतं वचः ॥४२ ॥ सर्वं नेत्यनृतं ब्रूयात्स दुष्कीर्तिः श्वसन्मृतः॥स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे ॥गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम्॥४३॥ इति श्रीभागव० महा० अष्टम० वामनावतारे बलियाचनं नामैकोनविंशोऽध्यायः ॥ १९॥ श्रीशुक उवाच॥ बलिरेवं गृहपतिः कुलाचार्येण भाषितः ॥तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुम्॥१॥बलिरुवाच ॥ सत्यं भगवता प्रोक्तं धर्मोऽयं गृहमेधिनाम् ॥ अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित्॥२॥सचाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजम् ॥ प्रतिश्रुत्य ददामीति प्राह्रादिः कितवो यथा ॥३॥ न ह्यसत्यात्परोऽधर्म इति होवाच भूरियम् ॥ सर्वं सोढुमलं मन्ये ऋतेऽलीकपरं नरम् ॥४॥ नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात् ॥ न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलंभनात् ॥५॥ यद्यद्धास्यति लोकेऽस्मिन्संपरेतं धनादिकम् ॥ तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत् ॥६ ॥

बलिः क्षणं तूष्णीं भूत्वा प्राह ॥ १ ॥ बलिरुवाच । हे गुरो ! त्वया प्रोक्तोऽयं गृहमेधिनां धर्मः सत्यः ॥ २ ॥ अहो प्राह्रादिरहं दास्यामीति प्रतिज्ञाय वित्तलोभेन द्विजं कथं निराकरोमि ॥ ३ ॥ असत्यात् परोऽधर्मो न । निष्कपटं नरं विना सर्वं सोढुमलं मन्ये ॥ ४ ॥ अहं नरकाद् दारिद्र्यात् स्थानपतनाद् मृत्योरपि तथा न बिभेमि यथा विप्रावमानात् ॥ ५ ॥विप्रस्तेनार्थेन दत्तेनापि न तुष्येच्चेत् तर्हि तस्य दाने किं फलम् । अतो याचितं देयम् ॥ ६ ॥

१ आत्मनोऽभिमुखमन्यस्यार्थमाकर्षतीत्यभ्यात्मम् ।२ मृतम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दध्यङ्शिबिप्रभृतयः साधवो दुस्त्यजैः प्राणैरपि भूतानां श्रेयः कुर्वंति किं पुनः पृथिव्यादिषु विचारः ॥ ७ ॥ यैर्दैत्यैरियं भूरुपभुक्ता तेषां लोकान् भोगांश्च कालो जग्रास न तु यशः । अतः कीर्तिरेव साध्या ॥ ८ ॥ किंच युद्धे तनुत्यागिनः सुलभाः यथा तथा पात्रे प्राप्ते धनत्यागिनो न ॥ ९ ॥ अपि च शूरस्य दयालोः पुंसोऽर्थिनां कामपूरणेन यद् दैन्यं तद् भद्रमेव किं पुनर्भवादृशानां दानेन ॥ १० ॥ अतो भवंतो यज्ञैर्यं यजंति स एष वरदो विष्णुर्वा शत्रुर्वाऽस्तु अस्मै क्षितिं दास्यामि ॥ ११ ॥ यद्यपि निरपराधं मां बध्नीयात् तथापि भीतमेनं

श्रेयः कुर्वंति भूतानां साधवो दुस्त्यजासुभिः ॥ दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु ॥७॥ यैरियं बुभुजे ब्रह्म न्दैर्दैत्यैर्दुरनिवर्तिभिः ॥ तेषां कालोऽग्रसील्लोकान्न यशोऽधिगतं भुवि ॥८॥ सुलभा युधि विप्रर्षे ह्यनुवृत्तास्तनुत्यजः ॥ न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ॥९॥मनस्विनः कारुणिकस्य शोभनं यदर्थिकामोपनयेन दुर्गतिः॥ कुतः पुनर्ब्रह्मविदां भवादृशां ततो बटोरस्य ददामि वांछितम् ॥१०॥ यजंति यज्ञक्रतुभिर्यमादृता भवंत आम्नायविधान कोविदाः ॥ स एष विष्णुर्वरदोऽस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ॥११॥ तदप्यसावधर्मेण मां बध्नीया दनागसम् ॥ तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुम्॥१२॥एष वा उत्तमश्लोको न जिहासति यद्यशः॥ हत्वामैनां हरेद्युद्धे शयीत निहतो मया ॥ १३ ॥ श्रीशुक उवाच ॥ एवमश्रद्धितं शिष्यमनादेशकरं गुरुः ॥ शशाप दैवप्रहितः सत्यसंधं मनस्विनम् ॥ १४ ॥ दृढं पंडितमान्यज्ञः स्तब्धोऽस्यस्मदुपेक्षया ॥ मच्छासनातिगो यस्त्वमचिराद् भ्र श्यसे श्रियः ॥ १५ ॥ एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान् ॥ वामनाय ददावेनामर्चित्वोदकपूर्वकम् ॥ १६ ॥

ब्रह्मतनुं रिपुं न हिंसिष्ये ॥ १२ ॥ यदि युद्धे मां हत्वा भूमिं हरेत् तथापि यशो न नश्यति ॥ १३ ॥ श्रीशुक उवाच ॥ एवमनादेशकरं सत्य संधं शिष्यं गुरुः शशाप ॥ १४ ॥ हे बले ! पंडितमानी मदाज्ञायाः पराङ्मुखस्त्वम् । अतः शीघ्रं श्रियो भ्रश्यसे ॥ १५ ॥ एवं गुरुणा शप्तो पि सत्यान्न चलितो बलिर्वामनाय भूमिं ददौ ॥ १६ ॥

१ गर्वितः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा विंध्यावलिर्हैमं जलपूर्णं कलशमानिन्ये॥ १७॥ ततः स्वयं यजमानो भगवतः श्रीमत्पादयुगं मुदा प्रक्ष्याल्य तज्जलं विश्वपावनं मूर्ध्नि ददौ अत्र विशेषो नृसिंहे–"यावदस्य बलिस्तोयं करे दातुमुपस्थितः। तावच्छुक्रस्तु कलशाज्जलधारां रुरोध ह। ततस्तु वामनः क्रुद्धः पवित्रेण नृपोत्तम। तद्रुद्धकलशाद्वारि तच्छुक्राक्षिं न्यवेधयत्"इति ॥ १८ ॥ तदाऽसुरेंद्रं स्वर्गे देवगंधर्वादयस्तत्कर्म गृणंतः संतः पुष्पैर्ववृषुः ॥ १९ ॥ सहस्रशो दुंदुभयो नेदुः। गंधर्वादयो जगुः। अनेन बलिना शत्रवे जगत्त्रयं दत्तम्। इदं दुष्करं कृतम् ॥ २० ॥ एवं वदति सति तद्वामनं रूपमद्भु

विंध्यावलिस्तदाऽऽगत्य पत्नी जालकमालिनी ॥ आनिन्ये कलशं हैममवनेजन्यपां भृतम् ॥ १७॥ यजमानस्स्वयं तस्य श्रीमत्पादयुगं मुदा ॥ अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः ॥ १८ ॥ तदासुरेंद्रं दिवि देवतागणा गंधर्वविद्याधरसिद्धचारणाः ॥ तत्कर्म सर्वेऽपि गृणंत आर्जवं प्रसूनवर्षैर्ववृषुर्मुदाऽन्विताः ॥ १९॥ नेदुर्मुहुर्दुंदुभयः सहस्रशो गंधर्वकिंपूरुषकिन्नरा जगुः ॥ मनस्विनानेन कृतं सुदुष्करं विद्वानदाद्यद्रिपवे जगत्त्रयम् ॥ २० ॥ तं वामनं रूपमवर्धताद्भुतं हरेरनन्तस्य गुणत्रयात्मकम् ॥ भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत ॥ २१ ॥ काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसदस्य एतत् ॥ ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रियार्थाशयजीवयुक्तम् ॥ २२ ॥ रसामचष्टांघ्रितलेऽथ पादयोर्महीं महीध्रान्पुरुषस्य जंघयोः॥ पतत्रिणो जानुनि विश्वमूर्तेरूर्वोर्गणं मारुतमिंद्रसेनः ॥ २३ ॥ संध्यां विभोर्वाससि गुह्य ऐक्षत्प्रजापतीञ्जघने आत्ममुख्यान् ॥ नाभ्यां नभः कुक्षिषु सप्त सिन्धूनुरुक्रमस्योरसि चर्क्षमालाम् ॥ २४ ॥

मवर्धत। यत्र रूपे भूः खं स्वर्गो दिशः पातालानि समुद्रादयश्चाऽऽसत ॥ २१ ॥ ततो बलिस्तस्य देहे विश्वं सकलात्मकं ददर्श ॥ २२ ॥ तत्र तस्यांघ्रितले रसातलम् पादयोर्महीम्। जंघयोर्वृक्षान्। जान्वोः पक्षिणः। ऊर्वोर्मरुतः ॥ २३ ॥ गुह्ये प्रजापतीन्। जघने दैत्यान्। नाभौ नभः। कुक्षिषु समुद्रान्। उरसि नक्षत्राणि ॥ २४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हृदि धर्मम् । स्तनयोः सत्यानृते । मनसि चंद्रम् । वक्षसि श्रियम् ॥ २५ ॥ भुजेषु लोकपालान् । कर्णयोर्दिशः । मूर्ध्नि द्यौः । केशेषु मेघान् । नासिकायां वायुम् । अक्ष्णोः सूर्यम् । मुखेऽग्निम् ॥ २६ ॥ वाण्यां वेदान् । जिह्वायां वरुणम् । भ्रुवोर्विधिनिषेधौ । पक्ष्मस्वहोरात्रम् । ललाटे क्रोधम् । अधरोष्ठे लोभम् ॥ २७ ॥ रेतसि जलम् । पृष्ठेऽधर्मम् । छायासु मृत्युम् । हास्ये मायाम् । रोमस्वौषधीः ॥ २८ ॥ नाडीषु नदीः । नखेषु

हृद्यंग धर्मं स्तनयोर्मुरारेर्ऋतं च सत्यं च मनस्यथेंदुम् ॥ श्रियं च वक्षस्यरविंदहस्तां कंठे च सामानि समस्तरेफान् ॥ ॥ २५ ॥ इंद्रप्रधानानमरान्भुजेषु तत्कर्णयोः ककुभो द्यौश्च मूर्ध्नि ॥ केशेषु मेघाञ्छ्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निम् ॥ २६ ॥ वाण्यां च छन्दांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु ॥ अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटेऽधर एव लोभम् ॥ २७ ॥ स्पर्शे च कामं नृप रेतसोंभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञम् ॥ छायासु मृत्युं हसिते च मायां तनूरुहेष्वौषधिजातयश्च ॥ २८ ॥ नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणान्ऋषींश्च ॥ प्राणेषु गात्रे स्थिरजंगमानि सर्वाणि भूतानि ददर्श वीरः ॥२९॥ सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेऽसुराः कश्मलमापुरंग ॥ सुदर्शनं चक्रमसह्यतेजो धनुश्च शार्ङ्गस्तनयित्नुघोषम् ॥३०॥ पर्जन्यघोषो जलजः पाञ्चजन्यः कौमोदकी विष्णुगदा तरस्विनी ॥ विद्याधरोऽसिः शतचंद्रयुक्तस्तूणोत्तमावक्षयसायकौ च ॥ सुनंदमुख्या उपतस्थुरीशं पार्षद मुख्याः सह लोकपालाः ॥३१॥स्फुरत्किरीटांगदमीनकुंडलः श्रीवत्सरत्नोत्तममेखलांबरैः ॥ मधुव्रतस्रग्वनमालया वृतो रराज राजन्भगवानुरुक्रमः ॥ ३२ ॥

शिलाः । बुद्धौ ब्रह्माणम् । इंद्रियेषु देवगणान् ऋषींश्च । गात्रे स्थिरजंगमानि भूतानि ॥ २९ ॥ एवं सर्वात्मनि त्रिभुवनं वीक्ष्य सर्वेऽसुराः कश्मलं प्रापुः ॥ ३० ॥ तदा सुदर्शनं शार्ङ्गधनुः कौमोदकी गदा विद्याधरसंज्ञोऽसिः शतचंद्रयुक्तं चर्माऽक्षय्यसायकौ तूणौ सुनंदमुख्याःपार्षदा ईशमुपतस्थुः ॥ ३१ ॥ हे राजन् ! तदोरुक्रमः किरीटांगदमकरकुंडलः श्रीवत्सकौस्तुभमेखलांबरवनमालाभिर्युतो रराज ॥ ३२ ॥

१ पादन्यासेषु ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्त्रिविक्रमो बलेर्भूमिमेकेन पदा विचक्रमे । शरीरेण नभः । बाहुभिर्दिशः । द्वितीयेन पदा स्वर्गम् । तृतीयाय तदीयमण्वपि नावशिष्टम् ॥ ३३ ॥ इति श्रीभागवते अष्टमस्कन्धे चूर्णिकायां विंशतितमोऽध्यायः ॥ २० ॥ एकविंशे पदा पूर्तिमिषेण बलिबंधनम् । विष्णुना कृतमुत्कर्षं तस्य प्रथयितुं जने ॥ १ ॥ श्रीशुक उवाच । अथ सत्यलोके प्राप्तमंघ्रिं वीक्ष्य ब्रह्मा तथा मरीच्यादयः सनंदनाद्याः योगिनश्च ॥ १ ॥

क्षितिं पदैकेन बलेर्विचक्रमेनभश्शरीरेणदिशश्च बाहुभिः॥पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि॥ उरुक्रमस्यांघ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः ॥ ३३ ॥ इति श्रीभागवते म०अष्टम० विश्वरूपदर्शनं नाम विंशतितमोऽध्यायः॥२०॥श्रीशुक उवाच ॥ सत्यं समीक्ष्याब्जभवो नखेंदुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात् ॥ मरीचिमिश्रा ऋषयो बृहद्व्रताः सनंदनाद्या नरदेव योगिनः ॥ १ ॥ वेदोपवेदा नियमा यमान्वितास्तर्कैतिहासांगपुराणसंहिताः ॥ ये चापरे योगसमीरदीपितज्ञानाग्निना रंधितकर्मकल्मषाः॥ ववंदिरे यत्स्मरणानुभावतः स्वायंभुवं धाम गता अकर्मकम् ॥२॥ अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोऽर्हणोदकम् ॥ समर्च्य भक्त्याऽभ्यगृणाच्छुचिश्रवा यन्नाभिपंकेरुहसंभवः स्वयम् ॥३॥धातुः कमंडलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेंद्र ॥ स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ॥ ४ ॥ ब्रह्मादयो लोकनाथाः स्वनाथाय समाहृताः ॥ सानुगा बलिमाजहुः संक्षिप्तात्मविभूतये ॥ ५॥ तोयैः समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः ॥ धूपैर्दीपैः सुरभिभिर्लाजाक्षत फलांकुरैः ॥ ६ ॥ स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमांकितैः ॥ नृत्यवादित्रगीतैश्च शंखदुंदुभिनिस्स्वनैः ॥ ७ ॥

वेदोपवेदनियमयमतर्कैतिहासांगपुराणसंहिताः एतेऽन्ये च तत्रागमन् । ततस्तच्चरणकमलं ववंदिरे ॥ २ ॥ अथ विष्णोरंघ्रये पूजाद्रव्यमानीय भक्त्या समर्च्य ब्रह्माभ्यगृणात् ॥ ३ ॥ ब्रह्मणः कमंडलुजलं पादावनेजनपवित्रतया गंगा जाता । सा लोकत्रयं पवित्रयति ॥४ ॥ ततो ब्रह्मादयो लोकपालाः स्वनाथाय त्रिविक्रमाय बलिंदत्त्वा॥५॥तोयैः स्रग्भिर्गंधपुष्पधूपदीपैः फलांकुरैः॥६॥स्तुतिजयशब्दैर्नृत्यवादित्रगीतैःपूजयामासुः॥७॥

१ कर्मभिरप्राप्यम् । २ यथापूर्वं वामनरूपेण स्थिताय ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा ऋक्षराजो जांबवान्भेरीनादार्दीक्षु महोत्सवं घोषयन्प्रदक्षिणमकरोत् ॥ ८ ॥ अथ दैत्याः सर्वपृथिवीं त्रिपदयाच्ञामिषेण हृतां दृष्ट्वा क्रुद्धाः ऊचुः ॥ ९ ॥ अहो अयं ब्रह्मबन्धुर्न। तर्हि द्विजरूपधरो विष्णुर्देवकार्यं चिकीर्षति ॥ १० ॥ अनेन शत्रुरूपिणा सत्यव्रतस्य त्यक्तदण्डस्य दयावतो बलेः सर्वस्वं हृतम् ॥ ११ ॥ १२ ॥ अतोऽस्य वधो धर्मः भर्तुः शुश्रूषणं च स्यात्। एवमुक्ता बलेः सेवका आयुधानि जगृहुः ॥ १३ ॥ ते सर्वे शूलपट्टिशपाणयो वामनं हन्तुं प्राद्रवन् ॥ १४ ॥ धावमानान् तान् दृष्ट्वा प्रहस्य विष्णुदूताः ॥ १५ ॥ नन्दः सुनन्दो जयो विजयः प्रबलो

जांबवानृक्षराजस्तु भेरीशब्दैर्मनोजवः ॥ विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ॥ ८ ॥ महीं सर्वां हृतां दृष्ट्वा त्रिपद व्याजयाच्ञया ॥ ऊचुः स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः ॥ ९ ॥ न वा अयं ब्रह्मबन्धुर्विष्णुर्मायाविनां वरः ॥ द्विज रूपप्रतिच्छन्नो देवकार्यं चिकीर्षति ॥ १० ॥ अनेन याचमानेन शत्रुणा वटुरूपिणा ॥ सर्वस्वं नो हृतं भर्तुर्न्यस्तदण्ड स्य बर्हिषि ॥ ११ ॥ सत्यव्रतस्य सततं दीक्षितस्य विशेषतः ॥ नानृतं भवितुं शक्यं ब्रह्मण्यस्य दयावतः ॥ १२ ॥ तस्मादस्य वधो धर्मो भर्तुः शुश्रूषणं च नः ॥ इत्यायुधानि जगृहुर्बलेरनुचराऽसुराः ॥ १३ ॥ ते सर्वे वामनं हंतुं शूलप ट्टिशपाणयः ॥ अनिच्छतो बले राजन्प्राद्रवन्नातमन्यवः ॥ १४ ॥ तानभिद्रवतो दृष्ट्वा दितिजानीकपान्नृप ॥ प्रहस्या नुचरा विष्णोः प्रत्यषेधन्नुदायुधाः ॥ १५ ॥ नंदः सुनन्दोऽथ जयो विजयः प्रबलो बलः ॥ कुमुदः कुमुदाक्षश्च विष्व क्सेनः पतत्रिराट् ॥ १६ ॥ जयंतः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः ॥ सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीम् ॥ १७ ॥ हन्यमानान्स्वकान्दृष्ट्वा पुरुषानुचरैर्बलिः ॥ वारयामास संरब्धान्काव्यशापमनुस्मरन् ॥ १८ ॥ हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः ॥ मा युध्यत निवर्तध्वं न नः कालोऽयमर्थकृत् ॥ १९ ॥

बलः कुमुदः कुमुदाक्षो विष्वक्सेनो गरुडः ॥ १६ ॥ जयंतः श्रुतदेवः पुष्पदंतः सात्वतः एते सर्वे नागायुतबलाः धृतायुधाः सतो दैत्यसेनां जघ्नुः ॥ १७ ॥ अथ बलिः स्वकान्हन्यमानान्दृष्ट्वा शुक्रशापं स्मरन् तान्वारयामास ॥ १८ ॥ हे विप्रचित्ते ! हे राहो ! हे नेमे ! मम वचः श्रूयतां यूयं मा युध्यध्वम् ॥ १९ ॥

१ यज्ञे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो भूतानां सुखदुःखोपपत्तये समर्थः तं कालं पौरुषैर्जेतुं समर्थो न भवति ॥ २० ॥ यः पूर्वं देवानामभवायासीत् स कालोऽद्य विपरीतो वर्तते ॥२१॥ अयं जनो बलप्रधानबुद्धिदुर्गमंत्रादिभिः सामाद्युपायैश्च कालं नातिक्रमते ॥२२॥हे दैत्याः ! एते देवाः पूर्वं बहुशो जिताः । अधुना नः जित्वा नदंति ॥ २३ ॥ यदि दैवं प्रसीदति तर्हि तान् जेष्यामः तावत् यूयं प्रतीक्षध्वम् ॥ २४ ॥श्रीशुक उवाच ॥ एवं बलेर्वचः श्रुत्वा दैत्यदा

यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये ॥ तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् ॥ २० ॥ यो नो भवाय प्रागासी दभवाय दिवौकसाम् ॥ स एव भगवानद्य वर्तते तद्विपर्ययम् ॥ २१॥ बलेन सचिवैर्बुद्ध्या दुर्गैर्मंत्रौषधादिभिः ॥ सामादिभिरुपायैश्च कालं नात्येति वै जनः ॥ २२ ॥ भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः ॥ दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदंति नः ॥ २३ ॥ एतान्वयं विजेष्यामो यदि दैवं प्रसीदति ॥ तस्मात्कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते ॥ २४ ॥ श्रीशुक उवाच ॥ पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः ॥ रसां निविविशू राजन्विष्णुपार्षदताडिताः ॥ २५ ॥ अथ तार्क्ष्यसुतो ज्ञात्वा विराट्प्रभुचिकीर्षितम् ॥ बबंध वारुणैः पाशैर्बलिं सौत्येऽहनि क्रतौ ॥ २६ ॥ हाहाकारो महानासीद्रोदस्योः सर्वतो दिशम् ॥ गृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना ॥ २७ ॥ तं बद्ध्वा वारुणैः पाशैर्भगवानाह वामनः ॥ नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप ॥ २८ ॥ पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयाऽसुर ॥ द्वाभ्यां क्रांता मही सर्वा तृतीयमुपकल्पय ॥ २९ ॥ यावत्तपत्यसौ गोभिर्यावदिंदुः सहोडुभिः ॥ यावद्वर्षति पर्जन्य स्तावती भूरियं तव ॥ ३० ॥

नवाः पार्षदैस्ताडिताः संतो रंसातलं विविशुः॥२५॥अथ गरुडः प्रभुचिकीर्षितं ज्ञात्वा बलिं वारुणैः पाशैः सोमाभिषवदिने बबंध॥२६॥ तदा द्यावापृथिव्योर्महान् हाहाकारः आसीत् ॥२७॥ ततः पाशैर्बद्धं नष्टश्रियं बलिं वामनः आह ॥ २८॥ हे बले ! त्वया भूमेस्त्रीणि पदानि मे दत्तानि । तव सर्वा मही द्वाभ्यां क्रांता तृतीयं कल्पय ॥२९॥ यावत् सूर्यः किरणैस्तपति इन्दुर्नक्षत्रैः पर्जन्यो यावद्वर्षति तावती तव भूमिः ॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तव भूर्लोकः एकेन पदाक्रांतः शरीरेण खं दिशो द्वितीयेन स्वर्लोकस्तव पश्यतः क्रांतः ॥३१॥ तृतीयस्याऽभावात् प्रतिश्रुतमदातुस्ते नरक वासः इष्टः अतः शुक्रेणानुमोदितः सन् नरकं विश ॥ ३२ ॥ यो याचकं प्रतिश्रुत्य न ददाति तस्य स्वर्गो दूर एव सोऽधःपतति ॥३३॥ किं च अभिमानिना त्वया ददामीति तिरस्कृतोऽहम् ।अतः कतिचित् समाः निरयं भुंक्ष्व॥३४॥इति श्रीभागव० अष्टम०चू०एकविंशोऽध्यायः ॥२१॥

द्वाविंशे तु प्रसन्नः सन् प्रस्थाप्य सुतलं बलिम् । दत्त्वा वरान् हरिर्न्यूनं मत्वा तद्द्वारपोऽभवत् ॥१॥ समार्दिततनूवित्तनिर्मलाचलभक्तितः । छलि

पदैकेन मया क्रांतो भूर्लोकः खं दिशस्तनोः ॥ स्वर्लोकस्तु द्वितीयेन पश्यतस्ते स्वमात्मना ॥३१॥ प्रतिश्रुतमदातु स्ते निरये वास इष्यते ॥ विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः॥३३॥ वृथा मनोरथस्तस्य दूरे स्वर्गः पतत्यधः॥ प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलंभते ॥३३॥ विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना ॥ तद्वचलीकफलं भुंक्ष्व निरयं कतिचित्समाः ॥ ३४ ॥ इति श्रीभागव० अष्टम० बलिनिग्रहो नामैकविंशोऽध्यायः॥ २१॥ श्रीशुकउवाच॥ एवं विप्रकृतो राजन्बलिर्भगवताऽसुरः ॥ भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः ॥१ ॥ बलिरुवाच ॥ यद्युत्तम श्लोक भवान्ममेरितं वचोऽन्यलीकं सुरवर्य मन्यते ॥करोम्यृतं तन्न भवेत्प्रलंभनं पदं तृतीयं कुरु शीर्ष्णि मे निजम् ॥२॥ बिभेमि नाहं निरयात्पदच्युतो न पाशबंधाद्व्यसनाद्दुरत्ययात् ॥ नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भ्रश मुद्विजे यथा ॥ ३ ॥ पुंसां श्लाघ्यतमं मन्ये दंडमर्हत्तमार्पितम् ॥ यं न माता पिता भ्राता सुहृदश्चादिशंति हि ॥४ ॥ त्वं नूनमसुराणां नः पारोक्ष्यः परमो गुरुः ॥ यो नोऽनेकमदांधानां विभ्रंशं चक्षुरादिशत् ॥ ५ ॥

तो बलिना चित्रं स्वमेवार्पयदच्युतः॥ २॥ श्रीशुक उवाच ॥ एवं भगवता सत्त्वाच्चाल्यमानो बलिरविक्लवं वच आह ॥ १ ॥ बलिरुवाच ॥हे भगवन् ! मम प्रतिज्ञानं मिथ्या न यतस्त्वया वामनरूपेण भिक्षित्वा रूपांतरमाविष्कृतम् । अथापि त्वं यदि मिथ्या मन्यसे तर्हि सत्यं करो मि । मम शीर्ष्णि तृतीयं पदं कुरु ॥ २ ॥ हे भगवन् ! अहं निरयदुःखात् पाशबंधनात् स्थानभ्रंशात् तव दंडान्न बिभेमि यथाऽपकीर्तेः ॥ ३ ॥ श्रेष्ठैरर्पितं दंडं साधु मन्ये यतो मातापित्रादयस्तं दंडं न कुर्वंति ॥ ४ ॥ त्वमसुराणां नः शत्रुच्छलेन वर्तमानो गुरुरसि ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिन् त्वयि वैरानुबंधेन बहवो दैत्याः सिद्धिं प्राप्ताः ॥ ६ ॥ तेन गुरुणा त्वया निगृहीतः पाशैर्बद्धश्च नातिव्रीडे न च व्यथे ॥ ७ ॥ मम पितामहः प्रह्लादस्तव भक्तानां संमतः हिरण्यकशिपुना हिंसां प्रापितोऽपि ॥८॥ आयुषोंते देहेन सर्वस्वापहारिभिः पुत्रैः संसृतिहेतुभूतया जायया केवलमायुषो व्ययएव ॥ ९ ॥ एवं देहादीनामसारतां निश्चित्य तव ध्रुवं चरणारविंदं प्रपेदे ॥ १० ॥ अतो बलात् त्याजितश्रीरहमपि दैवेन

यस्मिन्वैरानुबंधेन रूढेन विबुधेतराः ॥ बहवो लेभिरे सिद्धिं यामु हैकांतयोगिनः ॥६ ॥ तेनाहं निगृहीतोऽस्मि भवता भूरिकर्मणा ॥ बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे॥७॥ पितामहो मे भवदीयसंमतः प्रह्लाद आविष्कृतसाधुवादः॥ भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा ॥ ८ ॥ किमात्मनाऽनेन जहाति योंततः किं रिक्थहारैः स्वजनाख्यदस्युभिः ॥ किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥ ९ ॥ इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्ममध्रुवं प्रपेदेह्यकुतोभयंजनाद्भीतः स्वपक्षक्षपणस्य सत्तम॥१०॥ अथाहमप्यात्मरिपोस्तवांतिकं दैवेन नीतः प्रसभं त्याजितश्रीः ॥ इदं कृतांतांतिकवार्ति जीवितं ययाऽध्रुवं स्तब्धमतिर्न बुध्यते ॥ ११॥ श्रीशुक उवाच ॥ तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः ॥ आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः॥१२॥तमिंद्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणम्॥ प्रांशुं पिशंगांबरमंजनत्विषं प्रलंबबाहुं सुभगं समैक्षत ॥ १३ ॥ तस्मै बलिर्वारुणपाशयंत्रितः समर्हणं नोपजहार पूर्ववत् ॥ ननाम मूर्ध्नाऽश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥१४ ॥ स तत्र हासीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्यनुगैरुपासितम् ॥ उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविह्वलः ॥ १५ ॥

स्वस्यैव भाग्येन तवान्तिकं प्राप्तः यया श्रिया स्तब्धमतिः पुमान् मृत्युसंमुखं जीवितमध्रुवं न जानाति ॥ ११ ॥ श्रीशुक उवाच ॥ एवं बलेरुक्तवतः सतः पूर्णेन्दुरिव प्रह्लादः आजगाम ॥ १२ ॥ ततः पाशबद्धो बलिस्तस्मै पूर्ववत् पूजां न चकार केवलं मूर्ध्ना ननाम ॥ १३ ॥ किंच स्वकृताहंकारादिरूपापराधस्य स्मरणेन सलज्जितो बभूव॥१४॥ततः पुलकाश्रुविह्वलः प्रह्लादः स्वपार्षदैर्युक्तं वामनं वीक्ष्य शिरसा ननाम॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रह्लाद उवाच ॥ हे भगवन् ! अस्मै त्वयेंद्रपदं दत्तं तद्धृतम् । तच्च शोभनं कृतम् । अहो त्वयैषः श्रीमदाद् भ्रंशितः ॥ अयं महान् प्रसादः कृतः इत्यहं मन्ये ॥ १६ ॥ यया श्रिया विद्वानपि मुह्यति । जगदीश्वराय कृपालवे तुभ्यं नमः ॥ १७ ॥ श्रीशुक उवाच ॥ प्रह्लादस्य शृण्वतः सतो ब्रह्मा भगवंतं किंचिद् वक्तुं प्रवृत्तः । तदैव विंध्यावलिरपि वक्तुं प्रवृत्ता । तां संमानयन् स ब्रह्मा क्षणं तूष्णीं स्थितः ॥ १८ ॥ ततः सा विंध्यावलिर्बद्धं पतिं वीक्ष्याधोमुखी प्रांजलिः सती बभाषे ॥ १९ ॥ विंध्यावलिरुवाच ॥ हे ईश ! इदं जगत् त्वया क्रीडार्थं कृतम् । तत्रान्ये कुबुद्धयः

प्रह्लाद उवाच ॥ त्वयैव दत्तं पदमैन्द्रमूर्जितं हृतं तदेवाद्य तथैव शोभनम्॥ मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् ॥ १६ ॥ यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा ॥ तस्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे॥१७॥श्रीशुक उवाच ॥ तस्यानुशृण्वतो राजन्प्रह्लादस्य कृतांजलेः ॥ हिरण्यगर्भो भगवानुवाच मधुसूदनम् ॥ १८ ॥ बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला ॥ प्रांजलिः प्रणतोपेंद्रं बभाषेऽवाङ्मुखी नृप ॥ १९ ॥ विंध्यावलिरुवाच ॥ क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्युः ॥ कर्तुः प्रभोस्तव किमस्य त आवहंति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः ॥२० ॥ ब्रह्मोवाच ॥ भूतभावन भूतेश देवदेव जगन्मय ॥ मुंचैनं हृतसर्वस्वं नायमर्हति निग्रहम् ॥ २१॥कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये ॥ निवेदितं च सर्वस्वमात्माऽविक्लवया धिया ॥ २२ ॥

स्वाम्यं कुर्युः । अस्तु । हे स्वामिन् ! अयं बलिरेवं वदति । किं तत् । मया ते लोकत्रयं दत्तम् । तृतीयपादाय देहं समर्प्य प्रतिश्रुतं सत्यं करोमीत्येवं देहादिषु स्वाम्याविष्कारणं ब्रुवन् कुबुद्धिर्निर्लज्जः यतस्त्वमेव सर्वस्वामी । अतो मंदबुद्धिमेनं केवलं कृपया पालय ॥ २० ॥ ब्रह्मोवाच ॥ हे देवदेव ! हृतसर्वस्वं बलिं मुंच मुंच निग्रहं नार्हति ॥ २१ ॥ अनेन तुभ्यं भूः सर्वस्वं देहश्च समार्पितानि ॥ २२ ॥

१ तस्यां सत्याम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो यस्य ते पादयोः सलिलमात्रं दत्त्वा जनः सद्गतिं याति तस्मै तुभ्यं बलिस्त्रिलोकीं दत्तवान् । स दुःखं कथमर्हति ॥ २३ ॥ श्रीभगवानुवाच ॥ हे ब्रह्मन् । अहं यमनुगृह्णामि तदर्थान् हरामि यतो द्रव्यमत्तः पुमान्लोकं मां चावमन्यते ॥ २४ ॥ जीवात्मा निजकर्मभिर्नानायोनिषु भ्रमन्कदाचित्पौरुषीं तनुं व्रजेत् ॥ २५ ॥ तत्र नृशरीरे जन्मकर्मविद्यैश्वर्यधनादिभिर्यदि स्तम्भो न भवेत्तर्हि मदनुग्रह एव ॥ २६ ॥ कथं तर्हि ध्रुवादिभ्यः संपदो ददासि इति चेत्तत्राह । हे ब्रह्मन् । मत्परः स जन्मकर्मविद्यैश्वर्यादिभिर्न मुह्यति । अतो भक्तेच्छया संपदो ददामि । अभक्तस्तु

यत्पादयोरशठधीः सलिलं प्रदाय द्वर्वाकुरैरपि विधाय सतीं सपर्याम्॥ अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वा
नविक्लवमनाः कथमार्तिमृच्छेत् ॥२३॥श्रीभगवानुवाच॥ब्रह्मन्यमनुगृह्णामि तद्विशो विधुनोम्यहम् ॥ यन्मदः पुरुषः
स्तब्धो लोकं मां चावमन्यते॥२४॥यदा कदाचिज्जीवात्मा संसरन्निजकर्मभिः॥नानायोनिष्वनीशोऽयं पौरुषीं गतिमा
व्रजेत् ॥२५॥जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ॥ यद्यस्य न भवेत्स्तंभस्तत्रायं मदनुग्रहः ॥२६॥मानस्तम्भनिमि
त्तानां जन्मादीनां समंततः ॥ सर्वश्रेयःप्रतीपानां हंत मुह्येन्न मत्परः ॥२७॥ एष दानवदैत्यानामग्रणीः कीर्तिवर्धनः ॥
अजैषीदजयां मायां सीदन्नपि न मुह्यति ॥२८॥क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तो बद्धश्च शत्रुभिः ॥ ज्ञातिभिश्च परि
त्यक्तो यातनामनुयापितः ॥२९॥ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः ॥ छलैरुक्तो मया धर्मो नायं त्यजति
सत्यवाक्॥३०॥एष मे प्रापितः स्थानं दुष्प्रापममरैरपि॥सावर्णेरंतरस्यायं भवितेन्द्रो मदाश्रयः॥३१॥तावत्सुतलमध्या
स्तां विश्वकर्मविनिर्मितम्॥ यन्नाधयो व्याधयश्च क्लमस्तद्रा परा भवः॥ नोपसर्गा निवसतां संभवंति ममेक्षया॥३२॥

मुह्येत् । अतस्तदपहाररूपमेव तस्यानुग्रहं करोमि ॥ २७ ॥ किं च एष दानवेन्द्रो मे मायामजैषीत् । अतः सीदन्नपि न मुह्यति ॥ २८ ॥
अपि च क्षीणधनः स्थानाद्भ्रष्टः शत्रुभिर्बद्धो ज्ञातिभिस्त्यक्तः ॥ २९ ॥ गुरुणा शप्तोऽपि सत्यं न जहौ ॥३० ॥ एष सावर्णिमन्वन्तरे मदाश्र
यादिन्द्रो भविता ॥ ३१ ॥ तावद्विश्वकर्मनिर्मितं सुतलमध्यास्तां यत्र क्लेशादयो न संति ३२ ॥

१ विशः अर्थान् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे बले ! त्वं ज्ञातिभिः सह सुतलं याहि तव भद्रम् ॥ ३३ ॥ यत्र त्वां लोकेशाः पराजयं न करिष्यंति । त्वदाज्ञालंघिनो दैत्यान् मे चक्रं पीड
यिष्यति ॥ ३४॥ सर्वतः सानुगं त्वां रक्षिष्ये । हे वीर ! तत्र मां भवान्द्रक्ष्यते ॥ ३५ ॥ दैत्यानां संगात् ते आसुरो भावो मदनुभावं दृष्ट्वा सद्यो
नश्यति ॥३६॥ इति श्रीभागवते अष्टम० चू० द्वाविंशोऽध्यायः ॥ २२ ॥ त्रयोविंशे बलौ याते सुतलं सपितामहे ॥ उपेंद्रेण दिवं गत्वा पूर्व
वन्मोदते हरिः ॥ १ ॥ श्रीशुक उवाच ॥ हे राजन् ! एवं ब्रुवाणं भगवंतं बद्धांजलिः प्रेमाश्रुव्याप्तनेत्रो बलिर्गद्गदया गिराऽब्रवीत् ॥ १ ॥ बलि

इन्द्रसेन महाराज याहि भो भद्रमस्तु ते॥सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः॥३३॥ न त्वामभिभविष्यंति
लोकेशाः किमुतापरे ॥त्वच्छासनातिगान्दैत्यांश्चक्रं मे सूदयिष्यति॥ ३४ ॥ रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छ
दम् ॥ सदा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान् ॥ ३५ ॥ तत्र दानवदैत्यानां संगात्ते भाव आसुरः॥ दृष्ट्वा मदनु
भावं वै सद्यः कुण्ठो विनंक्ष्यति॥ ३६ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे बलिवामनसंवादो नाम द्वाविंशो
ऽध्यायः ॥ २२ ॥ श्रीशुक उवाच ॥ इत्युक्तवन्तं पुरुषं पुरातनं महानुभावोऽखिलसाधुसंमतः ॥ बद्धांजलिर्बाष्पकला
कुलेक्षणो भक्त्युद्गलो गद्गदया गिराऽब्रवीत् ॥ १ ॥ बलिरुवाच ॥ अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ
समाहितः ॥ यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः॥ २॥ श्रीशुक उवाच ॥ इत्युक्त्वा हरिमानम्य
ब्रह्माणं सभवं ततः ॥ विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः॥३॥ एवमिन्द्राय भगवान्प्रत्यानीय त्रिविष्टपम् ॥ पूर
यित्वाऽदितेः काममशासत्सकलं जगत् ॥ ४ ॥

रुवाच ॥ हे भगवन् !अहं तुभ्यं त्रिलोकीं दत्तवान् । [illegible] तावदास्ताम् । प्रणामोपि सम्यक् न कृतः किंतु तदर्थमुद्यममात्रं कृतम् । तेन च कर्म
तपोदानादिकोटिभिरपि दुर्लभस्त्वदनुग्रहः संपादितः । अहो त्वत्प्रणामप्रभावः आश्चर्यम् ॥ २ ॥ श्रीशुक उवाच ॥ एवमुक्त्वा बलिर्हरिं नत्वा
ब्रह्माणं शिवं च नत्वा पार्श्वैर्मुक्तः सन् दैत्यैः सह सुतलं विवेश ॥ ३ ॥ एवं भगवानिन्द्राय स्वर्गं दत्त्वाऽदितेर्मनोरथं पूरयित्वा सकलं जगत्
पालयामास ॥ ४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो लब्धप्रसादं पौत्रं दृष्ट्वा प्रह्लादः इदं जगाद॥५॥प्रह्लाद उवाच ॥हे भगवन्! इमं प्रसादं ब्रह्मा शिवः श्रीश्च न लभते।कोऽसौ तमाह यस्त्वं नो दुर्गपालोऽसि॥६॥हे आश्रयप्रद! ब्रह्मादयो यत्पादसेवनाद्विभूतीः सेवन्ते तस्य ते दाक्षिण्यदृष्टिमाग वयमुग्रजातयो दुर्वृत्ताः कस्माद् हेतोः प्रापिताः अहो चित्रम् ॥ ७ ॥ सर्वज्ञस्य सर्वात्मनः सर्वदृशस्तवैवमीहितम् । अहो चित्र त्वं कल्पतरुस्वभावः सन् भक्तप्रियोऽसि ॥ ८ ॥ श्रीभगवानुवाच ॥ हे वत्स प्रह्लाद ! त्व पौत्रेण सह सुतलं याहि ॥ ९ ॥ तत्र गदापाणिं स्थितं मां नित्यं द्रक्ष्यसि ॥ १० ॥ श्रीशुक उवाच ॥ एवं

लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिम् ॥ निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ॥५॥ प्रह्लाद उवाच ॥नेमं विरिंचो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते ॥ यन्नो सुराणामसि दुर्गपालो विश्वाभिवंद्यैरपि वंदितांघ्रिः ॥६॥यत्पादपद्ममकरंदनिषेवणेन ब्रह्मादयः शरणदाऽश्नुवते विभूतीः ॥ कस्माद्वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥ ७ ॥ चित्रं तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य ॥ सर्वात्मनस्समदृशो विषमस्वभावो, भक्तप्रियो यदसि कल्पतरुस्वभावः ॥ ८ ॥ श्रीभगवानुवाच ॥ वत्स प्रह्लाद भंद्र ते प्रयाहि सुतलालयम् ॥ मोदमानस्स्वपौत्रेण ज्ञातीनां सुखमावह ॥९॥ नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितम्॥ मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः ॥ १० ॥ श्रीशुक उवाच ॥ आज्ञां भगवतो राजन् प्रह्लादो बलिना सह ॥ बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृतांजलिः ॥ ११॥परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः ॥ प्रणतस्तदनुज्ञातः प्रविवेश महाबिलम्॥१२॥ अथाहोशनसं राजन् हरिर्नारायणोऽन्तिके ॥ आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनाम् ॥ १३ ॥ ब्रह्मन् संतनु शिष्यस्य कर्मच्छिद्रं वितन्वतः ॥ यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् ॥ १४ ॥

भगवदाज्ञां गृहीत्वा बलिना सह प्रह्लादस्तथेत्युक्त्वा ॥ ११ ॥ आदिपुरुषं वामनं परिक्रम्य प्रणम्य तदनुज्ञातो रसातलं विवेश ॥ १२ ॥ अथ श्रीवामनो ब्रह्मवादिनां सदसि स्थितं शुक्रं जगाद ॥ १३ ॥ हे ब्रह्मन् ! शिष्यस्य यजमानस्य यज्ञे यन्न्यूनं तद् विस्तारय । यजमानं विना कथं भवेत् तत्राह । ब्राह्मणैर्दृष्टं समं भवेत् ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुक उवाच॥हे ईश!यस्य यज्ञपुरुषः कर्मेश्वरस्त्वं यस्य कर्मवैषम्यं कुतः॥१५॥तव नामकीर्तनान्मंत्रतन्त्रादिषु यन्यूयं तत् सर्वं पूर्णं भवति॥१६॥ तथापि तवाज्ञां करिष्यामि।त्वदाज्ञापालनमेव पुंसां श्रेयः॥१७॥श्रीशुक उवाच॥हे नृप! शुक्रो भगवदाज्ञां स्वीकृत्य ऋत्विग्भिः सह यज्ञच्छिद्रं संदधे॥१८॥हे राजन्! एवं बलेर्महीं भिक्षित्वा भ्रात्रे इन्द्राय स्वर्गं ददौ ॥१९॥ततो ब्रह्मा देवर्षिपितृमनुकुमारशिवदक्षमरीच्यादिभिः सह ॥२०॥

शुक्र उवाच॥कुतस्तत् कर्मवैषम्यं यस्य कर्मेश्वरो भवान् ॥यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः ॥१५॥मंत्रतस्तंत्रत श्छिद्रं देशकालार्हवस्तुतः ॥ सर्वं करोति निश्छिद्रं नामसंकीर्तनं तव ॥ १६ ॥ तथापि वदतो भूमन् करिष्याम्नुशा सनम् ॥ एतच्छ्रेयः परं पुंसां यत्तवाज्ञाऽनुपालनम् ॥ १७ ॥ श्रीशुक उवाच॥अभिनंद्य हरेराज्ञामुशना भगवानिति ॥ यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह ॥१८॥ एवं बलेर्महीं राजन् भिक्षित्वा वामनो हरिः ॥ ददौ भ्रात्रे महेंद्राय त्रिदिवं यत्परैर्हृतम् ॥ १९ ॥ प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः॥दक्षभृग्वंगिरोमुख्यैः कुमारेण भवेन च ॥ २० ॥ कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च ॥ लोकानां लोकपालानामकरोद्वामनं पतिम् ॥ २१ ॥ वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः ॥ मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥ २२ ॥ उपेंद्रं कल्पयांचक्रे पतिं सर्वविभूतये॥ तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप ॥ २३ ॥ ततस्त्विंद्रः पुरस्कृत्य देवयानेन वामनम्॥ लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः ॥ २४ ॥ प्राप्य त्रिभुवनं चेन्द्र उपेन्द्रभुजपालितः ॥ श्रिया परमया जुष्टो मुमुदे गतसाध्वसः ॥ २५ ॥ ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप ॥ पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये ॥ २६ ॥

कश्यपस्याऽदितेश्च प्रीत्यै सर्वेषां लोकपालादीनां पतिं वामनं चकार ॥ २१ ॥ सर्वेषामीशः इंद्रे सत्यपि वेददेवधर्मयशश्रीमंगलव्रता दीनां पालने ॥ २२॥ वामनमुपेन्द्रं कल्पयांचक्रे ।तदा सर्वभूतानि मुमुदिरे ॥ २३ ॥ ततः इंद्रो लोकपालैः सह विमानेन वामनं पुरस्कृत्य तं स्वर्गं निन्ये ॥ २४ ॥ वामनभुजरक्षितः इंद्रस्त्रिभुवनं प्राप्य मुमुदे ॥ २५ ॥ ततो ब्रह्मा शिवो भृग्वादयो मुनयः पितरः सिद्धादयः ॥ २६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एते सर्वे हरेस्तत् कर्म गायंतोऽदितिं च प्रशंसंतः स्वस्थानानि जग्मुः ॥ २७ ॥ हे नृप ! एवं श्रोतृणां पापहरं त्रिविक्रमचरितं ते कथितम् ॥२८॥ अहो यथा भूरजोगणनमशक्यं तथा हरिगुणानुवर्णनम् ॥ २९ ॥ यः इदं हरेरवतारचरितं शृणोति स परां गतिं याति ॥ ३० ॥ दैवे पित्र्येमानुषे कर्मणि क्रियमाणे यत्रेदं कीर्त्येत तत् कर्म सुकृतं विदुः ॥ ३१ ॥ इति श्रीभागव० अष्टमस्कंधे चू० त्रयोविंशोऽध्यायः ॥ २३ ॥ चतुर्विंशे प्रसंगेन मत्स्यरूपस्य शार्ङ्गिणः ॥ लीलोच्यते यतः सत्यव्रतरक्षा महार्णवे ॥ १ ॥ तनुंतनुं विदर्श्यादौ निजैश्वर्यनिदर्शनात् ॥ मत्स्यं पृच्छति

सुमहत् कर्म तद्विष्णोर्गायंतः परमाद्भुतम् ॥ धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे ॥ २७ ॥ सर्वमेतन्मया ख्यातं भवतः कुलनंदन ॥ उरुक्रमस्य चरितं श्रोतृणामघमोचनम्॥२८॥ पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः ॥ किं जायमान उत जात उपैति मर्त्य इत्याह मंत्रदृगृषिः पुरुषस्य यस्य ॥ २९ ॥ य इदं देवदेवस्य हरेरद्भुतकर्मणः ॥ अवतारानुचरितं शृण्वन् याति परां गतिम् ॥ ३० ॥ क्रियमाणे कर्मणीदं दैवे पित्र्येऽथ मानुषे ॥ यत्रयत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः ॥ ३१ ॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे वामनावतारचरिते त्रयोविंशतितमोऽध्यायः ॥२३॥ राजोवाच ॥ भगवञ्छ्रोतुमिच्छामि हरेरद्भुतकर्मणः ॥ अवतारकथामाद्यां मायामत्स्यविडंबनम् ॥ १ ॥ यदर्थमदधाद् रूपं मात्स्यं लोकजुगुप्सितम् ॥ तमःप्रकृति दुर्मर्षं कर्मग्रस्तमिवेश्वरः ॥ २ ॥ एतन्नो भगवन् सर्वं यथावद् वक्तुमर्हसि ॥ उत्तमश्लोकचरितं सर्वलोकसुखावहम् ॥३ ॥ सूत उवाच ॥ इत्युक्तो विष्णुरातेन भगवान् बादरायणिः ॥ उवाच चरितं विष्णोर्मत्स्यरूपेण यत् कृतम् ॥ ४ ॥ श्रीशुक उवाच ॥ गोविप्रसुरसाधूनां छंदसामपि चेश्वरः ॥ रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥ ५ ॥

पृथ्वीशो लीलया वामनोपमम् ॥ २ ॥ राजोवाच ॥ भगवन् ! हरेराद्यां मत्स्यावतारकथां श्रोतुमिच्छामि ॥ १ ॥ किंच इदं लोकर्निंद्यं मात्स्यं रूपं यदर्थं धृतम् ॥ २ ॥ एतद्यथावद् वक्तुमर्हसि ॥ ३ ॥ सूत उवाच ॥ हे शौनक ! राज्ञैव पृष्टः शुको मत्स्यरूपेण यत् कृतं चरितं तत् प्राह ॥ ४ ॥ श्रीशुकउवाच ॥ गोविप्रदेवसाधूनां वेदानां च रक्षामिच्छन् हरिरवतारं धत्ते ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरेर्निन्द्यत्वं परिहरति । उच्चनीचभूतेषु वायुरिव चरन् स निर्गुणत्वादुच्चनीचत्वं न भजते ॥६॥ अथ गतकल्पांते ब्रह्मनिद्रोद्भवो नैमित्तिको लयः आसीत । तत्र भूरादयो लोकाः समुद्रे मग्नाः आसन्॥७॥तस्मिन् प्रलये प्राप्तनिद्रस्य ब्रह्मणा मुखतो निर्गतान् वेदान् हयग्रीवोऽसुरो जहार ॥८॥ तज्ज्ञात्वा हरिर्मात्स्यं रूपं दधार ॥ ९॥ तत्र कश्चित् सत्यव्रतो नाम्ना राजर्षिस्तपस्तेपे ॥ १० ॥ योऽस्मिन् श्वेतवाराहकल्पे विवस्वतस्तनयः

उच्चावचेषु भूतेषु चरन् वायुरिवेश्वरः ॥ नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः॥६॥आसीदतीतकल्पांते ब्राह्मो नैमित्तिको लयः ॥ समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप॥७॥कालेनागतनिद्रस्य धातुः शिशयिषोर्बलात्॥मुखतो निस्सृतान् वेदान् हयग्रीवोंतिकेऽहरत् ॥८॥ ज्ञात्वा तद्दानवेंद्रस्य हयग्रीवस्य चेष्टितम् ॥ दधार शफरीरूपं भगवान् हरिरीश्वरः॥९॥ तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् ॥नारायणपरोऽतप्यत् तपः स सलिलाशनः ॥१०॥ योऽसावस्मिन् महाकल्पे तनयः स विवस्वतः ॥ श्राद्धदेव इति ख्यातो मनुत्वे हरिणाऽर्पितः ॥ ११ ॥ एकदा कृतमालायां कुर्वतो जलतर्पणम्॥तस्याञ्जल्युदके काचित् शफर्येकाऽभ्यपद्यत॥१२॥सत्यव्रतोंजलिगतां सह तोयेन भारत ॥ उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः॥१३॥ तमाह साऽतिकरुणं महाकारुणिकं नृपम् ॥ यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल ॥ कथं विसृजसे राजन् भीतामस्मिन् सरिज्जले ॥१४॥ तमात्मनोऽनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरम् ॥ अजानन् रक्षणार्थाय शफर्याः स मनो दधे॥१५॥तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः ॥ कलशाप्सु निधायैनां दयालुर्निन्य आश्रमम्॥१६॥सा तु तत्रैकरात्रेण वर्धमानाकमंडलौ॥अलब्ध्वात्मावकाशं वा इदमाह महीपतिम्॥१७॥

श्राद्धदेव इति हरिणा मनुत्वे योजितः ॥ ११ ॥ एकदा कृतमालायां नद्यां जलतर्पणं कुर्वतः सत्यव्रतस्यांजल्युदके शफरी प्राप्ता ॥ १२ ॥ सा तां नदीतोये उत्ससर्ज॥१३॥सा तं नृपं जगाद । हे दीनवत्सल ! ज्ञातिघातिभ्यो यादोभ्यो भीतां मां कथं विसृजसे॥१४॥राजा तद्दीनवाक्यं श्रुत्वा मत्स्यवपुर्धरं हरिमजानन् कलशजले तां शफरीं निधायाश्रमं निन्ये ॥ १५ ॥ १६ ॥ सैकरात्रेण कमंडलौ वर्धमाना नृपमाह ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे नृप ! अहं कमंडलौ वस्तुं नोत्सहे । विपुलं स्थानं कल्पय । यत्र सुखं निवसे ॥ १८ ॥ अतो मणिकस्थे जले तं मत्स्यं न्यधात् । तथापि तत्र मुहूर्तेन हस्तत्रयमवर्धत ॥ १९ ॥ एतदुदकं वस्तुं सुखं न । विपुलं स्थानं देहि। यतोहं त्वां शरणं गता ॥ २० ॥ ततस्तां गृहीत्वा सरोवरे प्राक्षिपत् । तदपि सरो व्याप्य महामत्स्योऽवर्धत॥ २१ ॥ हे राजन् । इदं सरो मे स्वस्तये न । अतो मामशुष्कह्रदे निधेहि ॥ २२ ॥ एवमुक्तः स यत्रयत्र जलाशये स्थापितवान् तत्र तत्र वर्धमानं मत्स्यं दृष्ट्वा समुद्रे प्राक्षिपत् ॥ २३ ॥ क्षिप्यमाणो मत्स्यः इदमाह । हे वीर ! अत्र

नाहं कमंडलावस्मिन् कृच्छ्रं वस्तुमिहोत्सहे ॥ कल्पयौकस्सुविपुलं यत्राहं निवसे सुखम् ॥१८॥स एनां तत आदाय न्यधादौदंचनोदके ॥ तत्र क्षिप्ता मुहूर्तेन हस्तत्रयमवर्धत ॥ १९ ॥ न म एतदलं राजन् सुखं वस्तुमुदंचनम्॥पृथुदेहि पदं मह्यं यत्त्वाऽहं शरणं गता ॥२०॥ तत आदाय सा राज्ञा क्षिप्ता राजन् सरोवरे॥तदावृत्त्यात्मना तोयं महामीनो न्ववर्धत ॥२१॥ नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः ॥ निधेहि रक्षायोगेन ह्रदे मामविदासिनि॥२२॥इत्युक्तः सोऽनयन्मत्स्यं तत्रतत्राविदासिनि ॥ जलाशये संमितं तं समुद्रे प्राक्षिपज्झषम् ॥२३ ॥ क्षिप्यमाणस्तमाहेदमिह मां मकरादयः ॥ अदंत्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि ॥ २४ ॥ एवं विमोहितस्तेन वदता वल्गुभारतीम् ॥ तमाह को भवानस्मान् मत्स्यरूपेण मोहयन् ॥२५॥ नैवंवीर्यो जलचरो दृष्टोऽस्माभिःश्रुतोऽपि च ॥ यो भवान् योजनशत महाऽभिव्यानशे सरः ॥ २६ ॥ नूनं त्वं भगवान् साक्षाद्धरिर्नारायणोऽव्ययः ॥ अनुग्रहाय भूतानां धत्से रूपं जलौकसाम् ॥ २७ ॥ नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर ॥ भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥ २८ ॥

मां महाबलाः मकरादयः खादंति । इह त्यक्तुं नार्हसि ॥ २४ ॥ एवं मोहितो राजा मत्स्यं प्राह । मत्स्यरूपेण मोहयन् वंचकोसि ॥ २५ ॥ एवं वीर्यो जलचरः पूर्वं न दृष्टो न श्रुतः यस्त्वं दिनेन योजनशतं सरो व्याप्तवान् ॥ २६ ॥ त्वं नूनं साक्षाद् भगवान्न भूतानामनुग्रहाय जलचर रूपं धत्से ॥ २७ ॥ अतो हे पुरुषश्रेष्ठ ! तुभ्यं नमः ॥ २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेऽवतारा: भूतानां सुखकरा: । त्वया यदर्थं रूपं धृतं तज्ज्ञातुमिच्छामि॥२९॥हेकमलनेत्र!देहाद्यभिमानिनां सतामितरेषांपादोपसर्पणं यथा मृषा भवेत्तथा तव पादोपसर्पणं मृषा न भवेत॥३०॥ श्रीशुक उवाच ॥ एवं ब्रुवाणं सत्यव्रतं मत्स्यवपुर्हरिराह ॥ ३१॥ श्रीभगवानुवाच ॥ हे नृपाइतः ऊर्ध्वं सप्तमेऽहनि समुद्रे त्रैलोक्यं निमज्जति ॥३२॥तस्मिन् प्रलयोदके त्रिलोक्यां लीयमानायां सत्यां मत्प्रेरिता काचिन्नौस्त्वां प्राप्स्यति॥३३॥

सर्वे लीलावतारास्ते भूतानां भूतिहेतवः ॥ ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् ॥ २९॥ न तेऽरविंदाक्ष पदोपसर्पणं मृषा भवेत् सर्वसुहृत्प्रियात्मनः ॥यथेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः॥३०॥श्रीशुकउवाच॥ इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये॥विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षुरेकांतजनप्रियः प्रियम् ॥३१॥ श्रीभगवानुवाच ॥ सप्तमेऽद्यतनाद्ब्रूर्ध्वमहन्येतदरिंदम ॥ निमंक्ष्यत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकम्॥३२॥ त्रिलोक्यां लीयमानायां संवर्तांभसि वै तदा ॥ उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता ॥ ३३॥ त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च ॥ सप्तर्षिभिः परिवृतस्सर्वसत्त्वोपबृंहितः॥ ३४॥ आरुह्य महतीं नावं विचरिष्यस्यविक्लवः ॥ एकार्णवे निरालोके ऋषीणामेव वर्चसा ॥ ३५॥दोधूयमानां तां नावं समीरेण बलीयसा ॥ उपस्थितस्य मे शृंगे निबध्नीहि महाहिना ॥ ३६ ॥ अहं त्वामृषिभिः साकं सहनावमुदन्वति ॥ विकर्षन् विचरिष्यामि यावद् ब्राह्मी निशा प्रभो ॥३७॥ मदीयं महिमानं च परं ब्रह्मेति शब्दितम् ॥ वेत्स्यस्यनुग्रहीतं मे संप्रश्नैर्विवृतं हृदि॥३८॥ श्रीशुक उवाच ॥ इत्थमादिश्य राजानं हरिरंतरधीयत ॥ सोऽन्ववैक्षत तं कालं यं हृषीकेश आदिशत॥ ३९ ॥

त्वं चौषधीः सर्वबीजानि गृहीत्वा सप्तर्षिभिः सह ॥ ३४ ॥ नावमारुह्य ऋषीणामेव तेजसैकार्णवे चरिष्यसि ॥ ३५ ॥ तत्र वायुवेगेन चंचलां नावं प्राप्तस्य मे शृंगे वासुकिना बध्नीहि ॥३६॥ अहं सप्तर्षिभिः साकं सनावं त्वां विकर्षन् यावद् ब्राह्मी निशा तावद्विचरिष्यामि ॥३७॥ तदा तव प्रश्नैर्मयोक्तं मन्महिमानं त्वं वेत्स्यसि ॥ ३८ ॥ श्रीशुक उवाच।। इत्थं राजानमादिश्य हरिरंतर्दधे । स तं कालमन्ववैक्षत॥३९॥

१ दृष्टवानसि ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ राजा प्राग्ग्रान्दर्भानास्तीर्योदङ्मुखो हरेःपादौ चिंतयन्निषसाद॥४०॥ततो वर्षद्भिर्मेघैर्वर्धमानः समुद्रो महीं प्लावयन् सन् ददृशे॥४१॥तदा सत्यव्रतो भगवदाज्ञां ध्यायन् तावन्नावं दृष्ट्वौषधिवीरुधः आदाय ऋषिभिः सह तामारुरोह ॥ ४२ ॥ ततः प्रीताः मुनयस्तमूचुः । हे राजन्! केशवं ध्यायस्व संकटान्नः शं करिष्यति ॥ ४३ ॥ ततो राज्ञा ध्यातो हरिः प्रलयार्णवे एकशृङ्गधरो हैमो लक्षयोजनो मत्स्यः प्रादुर्बभूव॥४४॥

आस्तीर्य दर्भान्प्राक्कूलान्राजर्षिः प्राग्दृङ्मुखः॥ निषसाद हरेः पादौ चिन्तयन्मत्स्यरूपिणः ॥ ४० ॥ ततः समुद्र उद्वेलः सर्वतः प्लावयन्महीम् ॥ वर्धमानो महामेघैर्वर्षद्भिः समदृश्यत ॥ ४१ ॥ ध्यायन्भगवदादेशं ददृशे नावमागताम् ॥ तामारुरोह विप्रेन्द्रैरादायौषधिवीरुधः ॥ ४२ ॥ तमूचुर्मुनयः प्रीता राजन्ध्यायस्व केशवम् ॥ स वै नः संकटादस्मादविता शं विधास्यति ॥ ४३ ॥ सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे॥ एकशृंगधरो मत्स्यो हैमो नियुतयोजनः ॥ ४४ ॥ निबद्ध्य नावं तच्छृङ्गे यथोक्तो हरिणा पुरा॥ वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनम्॥४५॥राजोवाच ॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः ॥ यदृच्छयेहोपसृता यदाप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान् ॥ ४६ ॥ जनोऽबुधोऽयं निजकर्मबंधनः सुखेच्छया कर्म समीहतेऽसुखम्॥यत्सेवया तां विधुनोत्यसन्मतिं ग्रंथिं स भिंद्याद्धृदयं स नो गुरुः ॥ ४७ ॥ यत्सेवयाऽग्नेरिव रुद्ररोदनं पुमांन्विजह्यान्मलमात्मनस्तमः ॥ भजेत वर्णं निजमेष सोऽव्ययो भूयात्स ईशः परमो गुरोर्गुरुः ॥ ४८ ॥

ततो राजा तस्य शृङ्गे वासुकिना नावं निबध्य हरिं तुष्टाव ॥ ४५ ॥ सत्यव्रत उवाच ॥ अविद्यया वेष्टिताः संसारपरिश्रमैः पीडिताः जनाःयदनुग्रहाद्यं प्राप्नुवंति स भवान् गुरुः सन् नो हृदयग्रंथिं भिंद्यात् ॥ ४६ ॥ स्वकर्मबद्धो जनः सुखेच्छया कर्म कुरुते तथाप्यसुखं प्राप्नोति । तां सुखेच्छारूपां नो हृदयग्रन्थिं भिन्द्यात् यतो भवान्परो गुरुः ॥४७॥यस्य सेवया पुमान्मनोमलं त्यक्त्वा स्वरूपं भजते स ईशो नो गुरुर्भूयात्॥४८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवादयो यत्प्रसादलेशमपि कर्तुं न समर्थाः तं त्वां शरणं प्रपद्ये ॥ ४९ ॥ यथांधस्यांधोऽग्रणीः तथाऽज्ञानिजनस्याविद्वान् गुरुर्न किमपि कर्तुं समर्थः । त्वं तु सर्वेंद्रियाणां प्रकाशकः स्वगतिं बोद्धुमिच्छद्भिरस्माभिर्गुरुः कृतोऽसि ॥ ५० ॥ किंच अयं जनो जनस्यासतीं मतिमुपदिशति यया संसारं प्राप्नोति । त्वंस्तु अमोघज्ञानमुपदिशसि येन निजं पदं प्राप्नोति ॥५१॥ हे ईश्वर ! त्वं सर्वलोकस्य गुरुः । तथापि जनोंधधीः सन् हृदि स्थितं त्वां न जानाति ॥ ५२ ॥ एवंभूतं त्वां शरणं प्रपद्ये । हे भगवन् ! परमार्थप्रकाशकैर्वचोभिर्नो हृदयग्रंथिं छिंधि स्वं रूपं प्रकाशय

न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयम् ॥ कर्तुं समेताः प्रभवंति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ॥४९ ॥ अचक्षुरंधस्य यथाग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः॥ त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सताम् ॥ ५० ॥ जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः ॥त्वं त्वव्ययं ज्ञानममोघमंजसा प्रपद्यते येन जनो निजं पदम् ॥ ५१ ॥ त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः ॥ तथापि लोको न भवंतमंधधीर्जानाति संतं हृदि बद्धकामः॥५२॥ तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय ॥ छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रन्थीन्हृदय्यान्विवृणु स्वमोकः ॥ ५३ ॥ श्रीशुक उवाच ॥इत्युक्तवंतं नृपतिं भगवानादिपूरुषः॥ मत्स्यरूपी महांभोधौ विहरंस्तत्त्वमब्रवीत् ॥ ५४ ॥ पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीम् ॥ सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ॥ ५५ ॥ अश्रौषीदृषिभिः साकमात्मतत्त्वमसंशयम् ॥ नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनम् ॥ ५६ ॥ अतीतप्रलयापाय उत्थिताय स वेधसे ॥ हत्वाऽसुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः ॥ ५७ ॥ स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः ॥ विष्णोः प्रसादात्कल्पेऽस्मिन्नासीद्वैवस्वतो मनुः ॥ ५८ ॥

॥५३॥ श्रीशुक उवाच ॥ एवं ब्रुवाणं नृपं मत्स्यरूपी हरिः प्रलयोदके विहरन् ॥ ५४ ॥ आत्मगुह्यं तत्त्वं मत्स्यपुराणमब्रवीत् ॥ ५५ ॥ नावि स्थितः स ऋषिभिः सह तदश्रौषीत् ॥ ५६ ॥ ततः प्रलयांते ब्रह्मण्युपस्थिते सति हरिर्हयग्रीवं हत्वा वेदानानीय ब्रह्मणे ददौ ॥ ५७ ॥ स तु सत्यव्रतोऽस्मिन्कल्पे हरेः प्रसादात् वैवस्वतो मनुर्जातः ॥ ५८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो मत्स्यरूपिणो हरेः सत्यव्रतस्य च संवादं शृणुते स पातकात् मुच्यते ॥ ५९ ॥ अहं हरेरवतारः । तं दिनेदिने यः कीर्तयेत् तस्य संकल्पाः सिध्यंति स परमां गतिं याति ॥६०॥ किंच हे राजन् ! यः प्रलयोदके दैत्यं हत्वा दैत्येन ब्रह्मणो मुखेभ्यो नीतं श्रुतिगणं गृहीत्वा सत्यव्रतस्य

सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः ॥ संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ॥५९॥ अवतारो हरेर्योऽयं कीर्तयेदन्वहं नरः ॥ संकल्पास्तस्य सिध्यंति स याति परमां गतिम् ॥ ६० ॥ प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमुपनीतं प्रत्युपादत्त हत्वा ॥ दितिजमकथयद्यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि ॥६१॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे मत्स्यावतारचरितानुवर्णनं नाम चतुर्विंशोऽध्यायः॥२४॥

॥ समाप्तोयमष्टमस्स्कन्धः ॥

ऋषीणां च तत्त्वं विवव्रे तं मायारूपं मत्स्यं नतोऽस्मि ॥ ६१ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे चूर्णिकायां चतुर्विंशोऽध्यायः ॥२४॥
आहत्यात्र स्कन्धे सामान्यतः चूर्णिकाश्लोकसंख्याः ८५० ॥

इदं पुस्तकं मुम्बय्यां क्षेमराज-श्रीकृष्णदास श्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्)मुद्रणयन्त्रालयेऽङ्कयित्वा प्रकाशितम् । संवत् १९८०, शके १८४५.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति सचूर्णिके श्रीमद्भागवते अष्टमस्कन्धः समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.02.20 15:45
,TRANSFERRED=2020/02/20 at 15:58:11
,PAGES=95
,TYPE=STD
,NAME=S0002860
,Book Name=M-2843-SHRIMAD BHAGWAT ASHTAM SKANDH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection